अनन्तशयनसंस्कृतग्रन्थावलिः— ग्रन्थाङ्कः २२०

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरळविश्वविद्यालयः

चक्रकविविरचितः

चित्ररत्नाकरः

सेनापतिविरचितया

शरच्चन्द्रिकाव्याख्यया समेतः ।

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः ।

१९६७/११४२

अनन्तशयने एल्. वी. जी. मुद्रणालये मुद्रितम् ।] [मूल्यं—रूप्यकचतुष्टयम्

INTRODUCTION

The *Citraratnākara* which we are now publishing as No. 220 in the Trivandrum Sanskrit Series is a rhetorical work dealing with the definition and illustration of the different types of Citrakāvyas or ingenious forms of poetic composition. The work has been serially published in the Quarterly Sanskrit Journal[1] of the Kerala University Oriental Research Institute and Manuscripts Library.

The author of the work is Cakrakavi. His parents were Lokanātha and Ambā and his brothers were Rāmacandra and Patanjali[2]. Based on the sources available from another poem by Cakrakavi called *Jānakīpariṇaya*[3] we are able to understand that he was a poetic genius even from the days of his Upanayana sacrament and that his work was admired by Pāndya and Cera kings

---

1. *From - Vol. XIII. No: 3 to Vol XV. No: 3.*

2. *See* - पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
Citraratnākara - I. verse 119.

See also - श्रीलोकनाथं जनकं रामचन्द्रपतञ्जली ।
नत्वाग्रजौ च क्रियते चित्ररत्नाकरो मया ॥
Citra - I. 3.

3. *Edited by Dr. T. Gaṇapati Sastri - T. S. S. No: 24.*

and also by Nīlakaṇṭha Adhvarin[4]. Based on another source namely a variant reading for the second half of the fiftieth stanza of the sixth Pariccheda in the *Citraratnākara*, T. S. Kuppuswami Sastri[5] has considered Cakrakavi as one of the contemporaries of Nīlakaṇṭhadīkṣita. It is possible therefore, that this Nīlakaṇṭha Adhvarin is the famous Nīlakaṇṭhadīkṣita, grandson of Appayyadīkṣita. Nīlakaṇṭhadīkṣita lived in the first half of the seventeenth century A. D. and hence Cakrakavi may also be assigned to the same period.

Dr. T. Ganapati Sastri[6] and others[7] have noticed that besides *Citraratnākara*, Cakrakavi wrote four

---

4. *See the following lines in the Jānakīpariṇaya -*

   सावित्र्या सममेव यं श्रितवती वाग्देवता सादरम् - *III-66.*
   पाण्ड्यमहीभुजा बहुमते नव्ये तदीये महाकाव्ये - *II-74.*
   चेरावनीवासवश्लाघासीमनि - *IV-70.*
   श्रीनीलकण्ठाध्वरिश्लाघासीमनि - *VI-76.*

5. *See Introduction to the Gangāvataraṇakāvya of Nīlakaṇṭhadīkṣita - Kāvyamāla edition No: 76 - P. 18-*

   षष्ठस्तस्य कृतावजायत परिच्छेदो नुते पाण्ड्यराट्-
   चोलोर्वीपतिनीलकण्ठमखिभिः श्रीचित्ररत्नाकरे ॥

   This reading is not available in the present edition.

6. *See Preface to the Jānakīpariṇaya - T. S. S. No. 24.*

7. *M. Krishnamachariar - History of Classical Sanskrit Literature: - 238*

other works also namely *Rukmiṇīpariṇaya*, *Jānakīpariṇaya*, *Pārvatīpariṇaya* and *Draupadīpariṇaya*. This is based on the first line[8] of the third stanza in the *Citraratnākara* which is noted as a variant reading in the present edition. But from the reading in the text of the present edition[9] and also from the first half of the last verse[10] in the sixth Pariccheda, it is clear that the author has also written a poem on the wedding of Nala with Damayanti.

Of these works, *Jānakīpariṇaya* is a poem in eight cantos describing the story of the Bālakāṇda in the Rāmāyaṇa from the birth of Rāma to his marriage at Mithila. *Rukmiṇīpariṇaya* is also a kāvya in twelve sargas[11] and the other two works are of the class of Campus[12].

Citraratnākara as its name indicates, deals with the Citrakāvyas. Citrakāvyas are generally understood

---

8. रुक्मिणीजानकीगौरीद्रौपदीपरिणीतय: ।

9. भीष्माद्रिभीमपाञ्चालभूपुत्रीपरिणीतय: ।

10. षष्ठोऽजायत तत्कृताविह परिच्छेदो हि भीमात्मजा-
कल्याणावरजे मनोहरतरश्रीचित्ररत्नाकरे ।

11. *See* - काव्ये तस्य हि रुक्मिणीपरिणये सर्गोऽजनि द्वादश । *ref: R. No. 2757*

12. *See for details of the Mss. of these works- M. Krishnamachariar - History of Classical Sanskrit Literature - P. 268.*

to be those ingenious forms of poetic compositions which treat such combinations and tricks of words as *Cakra-bandha*, *Murajabandha* etc. Several great poets like Māgha, Bhāravi and others have composed *Citrabandhās* in their works. Rhetoricians also have defined this form of poetic composition. Dandin in his *Kāvyādarśa* has dealt with such *Citrabandhas* as *Gomūtrikās*[13] etc. In his *Kāvyaprakāsa* Mammaṭabhaṭṭa has defined Citrakāvya as a kind of poetry in which the different letters are arranged in the form of 'Khadga' or a sword etc. according to the peculiar kind of composition[14] The ingenuity is displayed in the arrangement of letters or in the combination of letters making different words or different senses.

Certain rhetoricians like Jagannātha Pandita[15]

---

13. *See Kāvyādarśa third Pariccheda.*

14. *See* - 'तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता' - सन्निवेशविशेषेण यत्र न्यस्ताः वर्णाः खड्गमुरजपद्माद्याकार-मुल्लासयन्ति तच्चित्रं काव्यम् । *Kāvyaprakāśa - Ullāśa - IX verse 8 and its Vṛtti*

15. *See* - यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत् पञ्च-ममधमाधममपि काव्यविधासु गणयितुमुचितं, यथैकाक्षरपद्यार्धावृत्ति-यमकपद्मबन्धादि ; तथापि रमणीयार्थप्रतिपादकशब्दतारूपकाव्यसामा-न्यलक्षणानाक्रान्ततया वस्तुतः काव्यत्वाभावेन महाकविभिः प्राचीन-परम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम् । *Rasagaṅgādhara - Kāvyamāla edition No: 12 - P. 20.*

and others[16] do not accept the *Citrakāvya* as a kāvya or a poetic composition, since it cannot present a coherent and beautiful sense. But Cakrakavi takes such classification of kāvya as based on *Arthacitra* and *Śabdacitra* and he composes the *Citraratnākara* for the readers who wish to know the form of *Śabdacitra*[17]. The *Citraratnākara* comprising of six parts called *Paricchedas* is a work of humorous verses composed in an enigmatical manner. Each verse in the work is in the form of a question and an answer[18]. The verses may be classified into two namely *antarlāpi* and *bahirlāpi* the first being the verse in the form of a question in which the answer is also merged and the second being such verse the answer of which is dealt with separately[19]. This kind of citras has close similarity to the definition of *Citrottarālaṅkāra* given by Appayyadīkṣita in his *kuvalayānanda*[20]. Cakrakavi has also dealt with another kind of citras the ingenuity of which is displayed in the arrangement of letters. This kind is quite appropriate to the definition of citras

---

16. *Mammaṭabhaṭṭa* - कष्टं काव्यमेतदिति दिङ्मात्रं प्रदर्श्यते- *Kāvyaprakāśa - Vṛtti under the verse* तच्चित्रं यत्र वर्णानाम् *etc.*

17. *See* - शब्दचित्रस्वरूपं ये जिज्ञासन्ते सुखं जनाः ।
    तेषामेषोपकाराय क्रियते हि मया कृतिः ॥ *Citra - I - 8.*

18. *See* - प्रश्नोत्तरात्मकैः श्लोकैर्ग्रन्थः सन्दृभ्यते मया ।

19. अन्तर्लापिबहिर्लापिभेदात् स द्विविधो भवेत् ॥ *Citra - I - 7.*

20. प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते । *Kuvalayānanda - Nirṇayasāgar edition - P. 155.*

given in the *Kāvyānuśāsana* of Hemacandra[21]. The author has also added at the end of the work certain *citrabandhās* like *Sarvatobhadra* etc in accordance with the definition of citras given by Mammaṭabhaṭṭa in his Kāvyaprakāśa[22].

The arrangement of the composition in the *citraratnākara* is that the author first divides the citras into twenty-eight main classes and takes them one by one for illustration. He defines each kind with one stanza and gives illustrations in verses almost ten in number for each variety[23]. At the end of each illustrative stanza the author gives the respective word which contains the question and answer explained in the respective illustrative stanza. The main varieties[24] are–

1. Uttarapraśna
2. Vardhamānākṣara
3. Hīyamānākṣara
4. Vibhakti-bhinna
5. Liṅga-bhinna

15. Dvirāvṛtta
16. Vacanamātrabhinna
17. Kriyāguptādi
18. Akṣaracyutakādi
19. Binducyutaka

---

21. स्वरव्यञ्जनगत्याकारनियमच्युतगूढादि चित्रम् ।
Kāvyānuśāsana - Adhyāya - V. Sūtra - 5.

22. *See foot-note No: 14*

23. *See* - एकैकस्योत्तरप्रश्नप्रभृतिष्वत्र हि स्फुटम् ।
लक्ष्यश्लोका दश दश प्रोच्यन्ते प्रायशो मया ॥*Citra - I. 19.*

24. *In the* विषयानुक्रमणी, *the main Varieties are not shown and so these are enumerated here.*

6. Vacana-bhinna	20. Mātrācyutaka
7. Vibhakti-liṅga-bhinna	21. Vyañjanācyutaka
8. Liṅga-vacana-bhinna	22. Samastavyastarūpaka
9. Liṅga-vacana-vibhakti-bhinna	23. Tulyārthavarṇacyutaka
10. Pratilomānuloma	24. Praśnottarasama
11. Dattacyutākṣara	25. Bhedakabhedya
12. Cyutadattākṣara	26. Nāmākhyāta
13. Pūrṇakramacyuta	27. Aticitras and
14. Ekāvṛtta	28. Tulyākhyāta

These main varieties have subdivisions also and they are shown in the index of the subject matter. The *Citrabandhas* such as *Sarvatobhadra*, *Cakrabandha*, *Murajabandha* etc. are defined with illustrations under the variety of *Aticitrās* in the sixth *Pariceheda* and their illustrative pictures are given at the end of the work.

A short commentary called *Śaraccandrika* written by the author's son Senāpati, is also published along with the text in the present edition. The commentator's real name seems to be Rāmacandra, since Cakrakavi mentions his son Ramacandra as one having studied the whole sāmaveda[25] and since the commentator also has remarked that he was the son of Cakrakavi and that he himself was well-versed in repeating sāmagāna. But the

25. *cf.* यत्पुत्रो भुवि वेत्ति सामनिगमं श्रीरामचन्द्रोऽखिलम् ।
Jānakīpariṇaya - *VIII* - *67*

commentator has mentioned his name as Senāpati[26]. The commentary is useful since it is clear and elucidative.

The work was first published in Grantha script at Palghat in March 1882. This is a small book without the commentary and is used in the present edition marked as चपाठ. Besides this printed book we have used in this edition the following manuscripts and transcripts available in the library of this Institute:-

No. T. 647-A-	With commentary-Devanāgari script complete	— क
,, 3756-C-	Malayalam script - complete	— ख.
,, 12333-G	Do. Do.	— ग.
,, 1207-C-	Beginning with only 'aticitras'	— घ.
,, T. 51-	Malayalam script-beginning with a portion of second Pariccheda	— ङ.

In bringing out this publication I have been assisted by Sri. A. Ramachandra Sastri, Research Officer, Sri. M. Madhavan Unni, Assistant Research Officer, and Sri. E. Easwaran Namboodiri, Assistant Research Officer of this Institute.

Oriental Research Institute &
Manuscripts Library,
Trivandrum.
7 - 11 - 1966.

K. Raghavan Pillai
Director

---

26. *See* - इह खलु चक्रकविनाम्ना विपश्चिता प्रणीतं चित्ररत्नाकरं सामसागरपारगस्तत्सूनुः सेनापतिर्व्याचष्टे ।
Beginning of Śaraccandrika.

विषयानुक्रमणी

विषयः	पुटम्
प्रथमः परिच्छेदः ।	
मङ्गळाचरणम्	१–२
ग्रन्थकरणप्रतिज्ञा	२
स्वकृतान्यग्रन्थाख्यानम्	,,
एतद्ग्रन्थप्रयोजनम्	३
ग्रन्थस्वभावः	,,
उद्देशक्रमः	४–५
उत्तरप्रश्नाख्यचित्रम्—	
तल्लक्षणम्	५
लक्ष्याणि	६–१०
वर्धमानाक्षराख्यचित्रम्—	
तल्लक्षणम्	१०
लक्ष्याणि	१०–१४
हीयमानाक्षराख्यचित्रम्—	
तल्लक्षणम्	१४
लक्ष्याणि	१४–१८

विषयः	पुटम्
विभक्तिलिङ्गवचनव्यत्ययाख्य-चित्रम्—	
तल्लक्षणम्	१८
विभक्तिभिन्नस्य लक्ष्याणि	१९–२२
लिङ्गभिन्नस्य०	२२–२६
वचनभिन्नस्य०	२६–२९
विभक्तिलिङ्गभिन्नस्य०	३०–३३
लिङ्गवचनभिन्नस्य०	३३–३६
लिङ्गवचनविभक्ति-भिन्नस्य०	३७–४०
द्वितीयः परिच्छेदः ।	
प्रतिलोमानुलोमाख्यचित्रम्—	
द्विरूपोत्तरलक्षणम्	४१
द्विवर्णोत्तरलक्ष्याणि	४१–४३

विषयः	पृष्ठम्
त्रिवर्णोत्तरलक्ष्याणि	४३-४४
चतुर्वर्णोत्तर०	४४-४५
पञ्चवर्णोत्तर०	४५-४६
षड्वर्णोत्तर०	४७-४८
सप्तवर्णोत्तर०	४८-४९
एकरूपोत्तरलक्षणम्	५०
द्विवर्णोत्तरलक्ष्याणि	५०-५३
त्रिवर्णोत्तर०	५३-५५
चतुर्वर्णोत्तर०	५५-५७
पञ्चवर्णोत्तर०	५७-६०
षड्वर्णोत्तर०	६०-६२
सप्तवर्णोत्तर०	६२-६६
दत्तच्युताक्षराद्यन्तलक्षणम्	६६
तल्लक्ष्याणि	६६-७०
च्युतदत्ताक्षरलक्षणम्	७१
तल्लक्ष्याणि	७१-७४

तृतीयः परिच्छेदः ।

पूर्णक्रमच्युताख्यचित्रलक्षणम्	७५
तल्लक्ष्याणि	७५-७८
एकावृत्तद्विरावृत्तयोर्लक्षणम्	७८
एकावृत्तलक्ष्याणि	७९-८२
द्विरावृत्तलक्ष्याणि	८२-८६
वचनमात्रभिन्नाख्यचित्रलक्षणम्	८६
तल्लक्ष्याणि	८६-८९
क्रियागुप्तादिचित्रलक्षणम्	९०
क्रियागुप्तलक्ष्यम्	,,
क्रियाकर्तृगुप्तलक्ष्यम्	९१
क्रियाकर्मगुप्तलक्ष्यम्	,,
कर्तृमात्र०	९२
कर्ममात्र०	,,
करणगुप्त०	९३
सम्प्रदान०	,,
अपादान०	,,
सम्बन्ध०	९४
अधिकरण०	,,

चतुर्थः परिच्छेदः ।

अक्षरच्युतकादिचित्रलक्षणानि	९५

विषयः	पृष्ठम्
च्युतादेर्लक्ष्याणि	९६–९७
च्युतमध्यस्य०	९७–९८
च्युतान्तस्य०	९८
बिन्दुच्युतकस्य०	९९–१०१
मात्राच्युतकस्य०	१०२–१०४
व्यञ्जनच्युतकस्य०	१०४–१०७
समस्तव्यस्तरूपस्य लक्षणम्	१०७
तल्लक्ष्याणि	१०७–११०

पञ्चमः परिच्छेदः ।

तुल्यार्थाक्षरच्युतकादीनां लक्षणम्	१११
तुल्यार्थवर्णच्युतकस्य लक्ष्याणि	१११–११४
तुल्यार्थमात्रा-च्युतकस्य०	११४–११७
तुल्यार्थबिन्दु-च्युतकस्य०	११७-११९
तुल्यार्थव्यञ्जन-च्युतकस्य०	१२०-१२२
तुल्यार्थार्ध-च्युतकस्य०	१२२-१२५

विषयः	पृष्ठम्
प्रश्नोत्तरसमाख्यस्य चित्रस्य लक्षणम्	१२५
तल्लक्ष्याणि	१२५-१२६
भेदकभेद्यस्य चित्रस्य लक्षणम्	१२६
तल्लक्ष्याणि	१२६-१३५
नामाख्याताख्यस्य चित्रस्य लक्षणम्	१३५
तल्लक्ष्याणि	१३६-१४०

षष्ठः परिच्छेदः ।

अतिचित्राणि	१४१
सर्वतोभद्रबन्धः	१४१-१४२
चक्रबन्धः	१४३-१४४
मुरजबन्धः	१४५
गोमूत्रिकाबन्धः	१४६-१४७
अर्धभ्रमकम्	१४७-१४८
अष्टदलपद्मबन्धः	१४९
शृङ्खलाबन्धः	१५०
रथबन्धः	१५१
अर्धपादारोहावरोहः	१५२-१५३

विषयः	पृष्ठम्	विषयः	पृष्ठम्
पादारोहावरोहः	१५३-१५४	तुल्याख्यातम्	१६३-१६६
अर्धारोहावरोहः	१५४-१५५	सर्वतोभद्रादिबन्धचित्राणि—	
श्लोकारोहावरोहौ	१५५-१५६	१. सर्वतोभद्रबन्धः	i
पादैकाक्षरम्	१५७-१५८	२. कविकाव्यनामचक्रबन्धः	ii
अर्धैकाक्षरम्	१५८-१५९	३. मुरजबन्धः	iii
एकाक्षरम्	१६०	४. गोमूत्रिकाबन्धः	iv
द्व्यक्षरम्	१६१	५. अर्धभ्रमकबन्धः	v
गूढचतुर्थम्	१६२	६. अष्टदलपद्मबन्धः	vi
निरोष्ठ्यम्	१६२-१६३	७. रथबन्धः	vii

॥ श्री ॥

चक्रकविविरचितः

चित्ररत्नाकरः

सेनापतिविरचित-
शरच्चन्द्रिकाख्यया व्याख्यया समेतः ॥

॥ प्रथमः परिच्छेदः ॥

वन्दे वपुस्तद् घटितं विचित्रमर्धेन शृङ्गारतरङ्गितेन ।
अर्धेन च क्ष्वेळकराळकाळभुजङ्गसङ्घातभयङ्करेण ॥ १ ॥

शरच्चन्द्रिका

अर्धं वधूः पत्युरितीरयन्तीं प्रत्नां गिरं कर्तुमिव प्रमाणम् ।
स्त्रीपुंसरूपार्धयुगान्वितं मे द्वन्द्वं तदानन्दभरं विधत्ताम् ॥

इह खलु **चक्रकवि**नाम्ना विपश्चिता प्रणीतं **चित्ररत्नाकरं** सामसागरपारगस्तत्सूनुः **सेनापति**र्व्याचष्टे । स कविः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमि'त्यालङ्कारिकवचनान्नमस्क्रियायाः काव्यमुखत्वेन प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये शिष्टाचारपरिप्राप्तं विशिष्टेष्टदेवतानमस्काररूपं मङ्गलमादौ निबध्नाति– **वन्द** इति । तद्वपुर्वन्द इति क्रियाकारकसम्बन्धः । तद्विशिनष्टि– **घटित**मिति । घटितं योजितम् । केनेत्याकाङ्क्षायामाह– **अर्धे**नेति । **अर्धेन** समांशकेन । **'अर्धं समेंऽशक' इत्यमरः** । कीदृशेन **शृङ्गारतरङ्गितेन**

शृङ्गाररसपरिपूरितेन । पार्वत्याः शृङ्गाररसोत्पाद(क)त्वेन तत्स्वरूपेणेत्यर्थः । क्ष्वेळकराळकाळभुजङ्गसङ्घातभयङ्करेण क्ष्वेळेन कराळाः काळभुजङ्गाः कृष्णसर्पाः तेषां सङ्घातः समूहः तेन भयङ्करेण रुद्रात्मकेनेत्यर्थः । एवंभूतेनार्धेन च घटितमर्धनारीश्वरात्मकमित्यर्थः । तद्वपुर्वन्द इति सामान्यतो निर्देशात् कायिकवाचिकमानसिकानां प्रणामानां ग्रहणम् ॥

ऐक्यस्य तेजस्तमसोः समानमाचक्षते यद् भुवने सुधीन्द्राः ।
स्त्रीत्वस्य पुंस्त्वस्य च सन्ततं तदपूर्वमैकाधिकरण्यमीडे ॥ २ ॥

श्रीलोकनाथं जनकं रामचंन्द्रपतञ्जली[1] ।
नत्वाग्रेजौ[2] च क्रियते चित्ररत्नाकरो मया ॥ ३ ॥

गुरुं नमस्कृत्य ग्रन्थकरणं प्रतिजानीते– श्रीलोकनाथमिति । स्फुटोऽर्थः ॥

[3]भीष्माद्रिभीमपाञ्चालभूपुत्रीपरिणीतयः ।
कृतयो यस्य तस्यैषा कृतिश्चक्रकवेः शुभा[4] ॥ ४ ॥

काव्ये गुणाः प्रकथ्यन्ते कस्यचित् कविना भुवि ।
ब्रह्मविष्णुशिवादीनां कथ्यन्तेऽत्र कृतौ गुणाः ॥ ५ ॥

कविः स्वस्य शब्दचित्रमात्रे न पाण्डित्यमर्थचित्रेऽप्यस्तीति ज्ञापयन्नाह– भीष्मेति । भीष्मनाम्नो राज्ञः अद्रेः हिमवतः भीमाख्यस्य विदर्भराजस्य पाञ्चालस्य द्रुपदस्य भुवः भूमेश्च याः पुत्र्यः तासां परिणीतयः परिणयाः रुक्मिणीपरिणय–पार्वतीपरिणयचम्पू–द्रौपदीपरिणयचम्पू – जानकी-

---

१. ‘ चन्द्रं पतञ्जलिं ख. च. २. ‘ ग्रजं च ’ ख. च.

३. ‘ रुक्मिणीजानकीगौरीद्रौपदीपरिणीतयः । ’ ख. च.

४. ‘ शुभा ॥ परवाङ् ’ ख. च.

परिणयसंज्ञका यस्य कृतयः प्रबन्धास्तस्यैषा कृतिश्चित्ररत्नाकराभिधा इत्यर्थः । अस्मिन् प्रबन्धे तत्र तत्र ब्रह्मविष्णुशिवादीनां चरितकथनेन रामायणादिवत् सत्काव्यता ॥

अस्य ग्रन्थस्य प्रयोजनमुखेनादरणीयतामाह—

परवाङ्मुद्रणं[1] स्वस्य पाण्डित्यस्य प्रदर्शनम्[2] ।
[3]चिकीर्षितं चेदुभयं ग्रन्थोऽयं क्रियतां मुखे[4] ॥ ६ ॥

परवागिति । परवाङ्मुद्रणं परवाक्स्तम्भनं स्वस्य पाण्डित्यस्य प्रदर्शनं प्रकाशनम् एतदुभयं येन चिकीर्षितं तेन अयं ग्रन्थो मुखे क्रियतां मुखारूढं क्रियतामित्यर्थः ॥

कीदृशोऽयं ग्रन्थ इत्याकाङ्क्षायामाह—

प्रश्नोत्तरात्मकैः श्लोकैर्ग्रन्थः सन्दृभ्यते[5] मया ।
अन्तर्लापिबहिर्लापिभेदात् स द्विविधो भवेत् ॥ ७ ॥

प्रश्नोत्तर इति । प्रश्नोत्तरात्मको ग्रन्थः मया श्लोकैस्सन्दृभ्यते । स च अन्तर्लापिबहिर्लापिभेदाद् द्विविधो भवति । तत्रान्तर्लापिनो नाम प्रश्नश्लोकानामन्तरेव येषामुत्तरस्य लापः कथनं तेऽन्तर्लापिनः । प्रश्नश्लोकाद् बहिरेव येषामुत्तरस्य लापस्ते बहिर्लापिनः । एत(दा)त्मकभेदाद् द्वैविध्यम् ॥

शब्दचित्रस्वरूपं ये जिज्ञासन्ते सुखं जनाः ।
तेषामेषोपकाराय क्रियते हि मया कृतिः ॥ ८ ॥

---

१. ' मुद्रिणः ' ख. २. ' प्रदर्शनः ' ख.
३. ' चित्ररत्नाकरो नाम ग्रन्थो ' ख-च.
४. ' मुखे ॥ शब्दचित्र ' ख-च. ५. ' सन्दर्भ्यते ' ग.

प्रथमं चित्राणामुद्देशं कृत्वा पश्चाल्लक्षणं लक्ष्यं च द्वयमत्र प्रकाश्यते इति कविः प्रतिजानीते —

उद्देशं प्रथमं कृत्वा चित्राणां तदनन्तरम् ।
लक्षणं चाथ लक्ष्यं च द्वयमत्रप्रकाश्यते ॥ ९ ॥

उद्देशमिति । प्रकाश्यते स्पष्टं प्रदर्श्यते ॥

अथोद्देशः —

उत्तरप्रश्नानामाद्यं वर्धमानाक्षरं ततः ।[1]
हीयमानाक्षरं चैव प्रभिन्नं चाथ षड्विधम् ॥ १० ॥

विभक्तिभिन्नं प्रथमं लिङ्गभिन्नमतः परम् ।
ततो[2] वचनभिन्नं स्यादसङ्कीर्णमिदं[3] त्रयम् ॥ ११ ॥

विभक्तिलिङ्गभिन्नं तु सङ्कीर्णे प्रथमं भवेत् ।
तथैव लिङ्गवचनभिन्नं तत्र द्वितीयकम् ॥ १२ ॥

विभक्तिलिङ्गवचनभिन्नं तत्र तृतीयकम् ।
तथारोहावरोहाभ्यां द्विरूपं चैकरूपकम् ॥ १३ ॥

दत्तच्युताक्षराद्यन्तं च्युतदत्ताक्षरं ततः ।
पूर्णक्रमच्युतं पश्चादेकावृत्तमतः परम् ॥ १४ ॥

द्विरावृत्तं च वचनमात्र[4]भिन्नमतः परम् ।
क्रियाकर्त्रादिगुप्तं स्यादक्षरच्युतकं तथा ॥ १५ ॥

---

१. 'रं ततः' ख.   २. 'तथा' ख. च

३. 'चाप्यसङ्कीर्णं' ख.   ४. 'वचनं मात्रा' ख. ग. च.

तथैव बिन्दुच्युतकं मात्राच्युतकमेव च ।
व्यञ्जनच्युतकं चैव समस्तव्यस्तरूपकम् ॥ १६ ॥

तुल्यार्थकं[1] वर्णमात्राबिन्दुव्यञ्जनकच्युतम् ।
तुल्यार्थमर्धच्युतकं प्रश्नोत्तरसमं ततः ॥ १७ ॥

भेद्यभेदकसंज्ञं च नामाख्यातमतः परम् ।
तथाति[2]चित्र[3]बन्धाश्च तुल्याख्यातमतः परम् ॥ १८ ॥

इत्युद्देशक्रमः ।

अवान्तरभेदं विनाऽष्टाविंशतिसंख्याकानि चित्राणि सार्धश्लोकषट्केनान्वर्थसंज्ञयोद्दिशति– उत्तरप्रश्नेत्यादिना ।

एकैकस्योत्तरप्रश्नप्रभृतिष्वत्र हि स्फुटम् ।
लक्ष्यश्लोका दश दश प्रोच्यन्ते प्रायशो मया ॥ १९ ॥

अत्र लक्षणकथनानन्तरं कति लक्ष्यश्लोकाः कथ्यन्त इत्याकाङ्क्षायामाह– दश दशेति । प्रायश एवम् । क्वचिदधिकसंख्याः क्वचिन्न्यूनसंख्याश्च सन्ति ॥

तत्र प्रथमोद्दिष्टस्य उत्तरप्रश्नाख्यस्य चित्रस्य लक्षणमाह—

उक्तप्रश्नस्योत्तरं यत् तच्चेत् प्रश्नस्य[4] कस्यचित्
कथितस्योत्तरस्य स्यादुत्तरप्रश्ननाम तत् ॥ २० ॥

---

१. 'तुल्यार्थवर्णमात्रं च' ख, 'तुल्यार्थकं वर्णमात्रं' च.
२. 'तथाहि' ग.
३. 'चित्रमस्वद्धा' क., 'चित्रबन्धश्च' च.
४. 'प्रश्नश्च' च.

उक्तेति । अयं बहिर्लापि । उत्तरप्रश्नस्य लक्ष्यश्लोके कण्ठरवेणोक्तस्य प्रश्नस्य यदुत्तरं तल्लक्ष्यश्लोक एव कथितस्य कस्यचिदुत्तरस्य प्रश्नश्च स्याच्चेत् तदुत्तरप्रश्न एवं चित्रं भवति । कस्यचिदुत्तरस्येत्यनेन तद् ग्रन्थस्थप्रश्न-स्योत्तरं न भवतीत्यर्थः । ग्रन्थस्थप्रश्नस्य ग्रन्थस्थोत्तरस्य च परस्परं न सम्बन्धगन्धः । ततश्च ग्रन्थस्थप्रश्नस्य केनाचिदुत्तरेण भवितव्यम् । ग्रन्थ एव स्थितस्योत्तरस्य च केनाचित् प्रश्नेन भवितव्यम् । तस्माद् ग्रन्थस्थस्य प्रश्नस्योत्तरत्वेन ग्रन्थस्थोत्तरस्य प्रश्नत्वेन च मध्ये कश्चन शब्दः कल्पनीयः । तस्यैकरूपेणोत्तरत्वं किंशब्दघटितपदद्वयस्वरूपेण प्रश्नत्वं चेत्युभयकार्य-धुर्यत्वं वाच्यम् । तदा उक्तसंज्ञं चित्रं भवति । उत्तरं प्रश्नो यस्य तदुत्तर-प्रश्नं चित्रमित्यर्थः । सर्वं समञ्जसम् ॥

उक्तलक्षणस्य लक्ष्यं दर्शयति—

तद्यथा ।

धरणीमण्डलेऽस्मिन् का माधुर्यं वहते भृशम् ।
अत्रोत्तरं यत् प्रश्नः स्यान्मालतीत्युत्तरस्य तत् ॥ २१ ॥

॥ मृद्वीका ॥१॥

धरणीमण्डल इति । अत्र पूर्वार्धे स्थितस्य का माधुर्यं वहत इति प्रश्नस्य यदुत्तरं भवति तदेवोत्तरार्धे स्थितस्य मालतीत्युत्तरस्य प्रश्नश्च भवेत् । मृद्वीकेत्ययं शब्दस्तादृशः । मृद्वीका द्राक्षा । एवमेकपदात्मकतया मृद्वीकेति शब्दस्य का माधुर्यं वहते इति प्रश्नस्योत्तरत्वमस्यैव मृद्वी का इति किंशब्द-घटितपदद्वयात्मकतया मालतीत्युत्तरस्य प्रश्नत्वं च । मालत्या मृदुत्वात् । एवमुत्तरत्राप्युदाहृतेषु लक्ष्यश्लोकेषु नवस्वपि लक्षणानुगतिर्द्रष्टव्या ॥

तृतीये विग्रहः कीदृगवतारे मधुद्विषः ।
अत्रोत्तरं यत् प्रश्नः स्याद् द्रुम इत्युत्तरस्य तत् ॥ २२ ॥

॥ कोलताश्रयः ॥२॥

तृतीय इति । तृतीयेऽवतारे मधुद्विषो विग्रहः कीदृगिति प्रश्नस्य कोलताश्रय इत्युत्तरं वराहत्वाश्रय इत्येकपदात्मकम् । एतदेव द्रुम इत्यन्यविषयस्योत्तरस्य किंशब्दघटितपदद्वयात्मकः प्रश्नोऽपि भवति । को लताश्रयः इति ॥

शरत्समयभिन्नानामृतूनां श्रीस्तु कीदृशी ।
अत्रोत्तरं यत् प्रश्नः स्याद्रजनीत्युत्तरस्य तत् ॥ २३ ॥

॥ काशरहिता ॥३॥

शरदिति । शरत्समयभिन्नानां शरत्कालव्यतिरिक्तानां हेमन्तादिपञ्चऋतूनामित्यर्थः । श्रीः कीदृशी इति प्रश्नः । काशरहितेत्युत्तरम् । काशैः काशपुष्पैर्विहीना । इदमेवोत्तरार्धे स्थितस्यान्यविषयस्य रजनीत्युत्तरस्य प्रश्नोऽपि भवति । का आशरहिता राक्षसहिता एवं पदद्वयात्मकप्रश्नोऽपि भवति ॥

अम्भोजिनीवल्लभस्य दुहिता कीदृशी नदी ।
अत्रोत्तरं यत् प्रश्नः स्यादुदीचीत्युत्तरस्य तत् ॥ २४ ॥

॥ काळकान्विता ॥४॥

---

१. 'विटपीत्यु' ख, च.

अम्भोजिनीति । सूर्यपुत्री नदी यमुना कीदृशीति प्रश्नः । काळकान्वितेत्युत्तरम् । कृष्ण(जो)युतेत्यर्थः । इदमेवोदीचीत्युत्तरस्य का अळकान्विता इति पदद्वयात्मकः प्रश्नोऽपि भवति । उदीची दिगळकायुक्ता भवति ॥

*जलैर्विरहिता शुष्का सरसी[1] कीदृशी भवेत् ।
अत्रोत्तरं यत् प्रश्नः स्याद् वनितेत्युत्तरस्य तत् ॥ २५ ॥

॥ अबलाका ॥५॥

अम्भोविरहितेति । जलरहिता अत एव शुष्का सरसी कीदृशी इति प्रश्नः । तस्य अबलाकेत्युत्तरम् । बलाकारहिता । इदमेवोत्तरार्धे स्थितस्य वनितेत्युत्तरस्य अबला बलरहिता का इति पदद्वयात्मकः प्रश्नोऽपि भवति ॥

तपस्विनां का वसतिस्तपश्चरितुमिच्छताम् ।
अत्रोत्तरं यत् प्रश्नः स्यादुक्तिरित्युत्तरस्य तत् ॥ २६ ॥

॥ काननभूः ॥६॥

तपस्विनामिति । तपश्चरितुमिच्छतां तपस्विनां का वसतिर्निवासभूः इति प्रश्नः । काननभूरित्युत्तरम् । इदमेवोत्तरार्धे स्थितस्य उक्तिरित्युत्तरस्य का अननभूः, आननाद् भवति इत्याननभूरिति किंशब्दघटितपदद्वयात्मकः प्रश्नोऽपि भवति ॥

पुरुषं तनुते को वा परुषाक्षरवादिनम् ।
अत्रोत्तरं यत् प्रश्नः स्याज्जळ[2] इत्युत्तरस्य तत् ॥ २७ ॥

---

* 'अम्भोविरहिते'ति व्याख्यानुसारी पाठः ।

---

१. 'कीदृशी सरसी' ख, च.   २. 'जड' च

॥ कोपोदयः ॥ ७ ॥

पुरुषमिति । को वा पुरुषं परुषाक्षरवादिनं तनोति इति प्रश्नः । अत्र कोपोदय इति उत्तरम् । इदमेवोत्तरार्धे स्थितस्य जळ इत्यन्यविषयस्योत्तरस्य प्रश्नोऽपि भवति । कः अपोदयः अपगतोन्मेष इति पदद्वयात्मकः प्रश्नो भवति ॥

वृक्षषण्डेन निबिडा कीदृशी काननस्थली ।
अत्रोत्तरं यत् प्रश्नः स्यात् सुश्रोणीत्युत्तरस्य तत् ॥ २८ ॥

॥ कासरस्तोमसहिता ॥ ८ ॥

वृक्षेति । वृक्षसमूहनिबिडा वनस्थली कीदृशीति प्रश्नः । अत्रोत्तरं कासरस्तोमसहितेति । महिषव्यूहसहिता । इदमेव शुभोर्वीत्यन्यविषयस्योत्तरस्य का सरस्तोमसहितेति प्रश्नो भवति ॥

कासूत कुञ्जरमुखं[1] तारकस्य च विद्विषम् ।
अत्रोत्तरं यत् प्रश्नः स्यात् सस्नेहेत्युत्तरस्य तत् ॥ २९ ॥

॥ काळी ॥ ९ ॥

केति । गजमुखं स्कन्दं च का असूत इति प्रश्नः । अत्र काळीत्युत्तरम् । इदमेव सस्नेहेत्युत्तरार्धे स्थितस्योत्तरस्य का आळी इति पदद्वयात्मकप्रश्नोऽपि भवति ॥

सखिभिस्सहिता[2] बाला भवन्ति भुवि कीदृशाः ।
अत्रोत्तरं यत् प्रश्नः स्याद् गुच्छा इत्युत्तरस्य तत् ॥ ३० ॥

---

१. 'वेतण्डमुखं' ख. च. २. 'सखीभिस्सहिता' ग. च.

॥ केलियुता[1]ः ॥ १० ॥

सखिभिरिति । सखिभिर्युक्ता बालाः कीदृशा भवन्ति इति प्रश्नः । केलियुता इत्युत्तरम् । तदेव गुच्छाः स्तबका इत्युत्तरार्धे स्थितस्योत्तरस्य के अलियुताः इति प्रश्नोऽपि भवति ॥

अथ वर्धमानाक्षरम्[2] । तल्लक्षणमाह—

प्रश्नोत्तरस्य क्रमशो वर्णवृद्धिर्भवेद्यदि ।
वर्धमानाक्षरं प्राहुस्तच्चित्रज्ञा मनीषिणः ॥ ३१ ॥

प्रश्नोत्तरस्येति । अत्र केचन प्रश्ना वक्ष्यन्ते । तेषु प्रथमस्य प्रश्नस्य किञ्चिदुत्तरं सम्पाद्य तदादौ पुनः किञ्चिदक्षरं दत्त्वा द्वितीयप्रश्नस्योत्तरं ब्रूयात् । एवं तृतीयचतुर्थयोरपि ॥

त[3]द्यथा—

कः कर्माणि करोति किञ्च विरहं ब्रूते पदं केन वा
　कीर्तिर्दिक्षु वितन्यते नरवचः केनोच्यते पक्षिणा ।
एकैकाक्षरदानतः प्रथमतस्तेषां चतुर्णामपि
　ब्रूयात् सत्वरमुत्तरं मतिमतामग्रेसरः कश्चन ॥ ३२ ॥

॥ ना, विना, कविना, शुकविना ॥ १ ॥

उदाहरति-क इति । कः कर्माणि करोतीत्याद्यः प्रश्नः । अन्ये

---

१. 'ताः ॥ प्रश्नोत्तरस्य' ख, 'ताः ॥ विभक्तिभिन्नादि' ग.
२. 'रम् । प्रश्नोत्तरस्य' च　　　　३. 'यथा' ख.

त्रयोऽपि स्पष्टाः । तत्राद्यप्रश्नस्य ना इत्युत्तरम् । मनुष्य इत्यर्थः । तस्योत्तरस्यादौ वि इत्यक्षरस्य दाने विना इति द्वितीयस्योत्तरम् । तदादौ ककारे कृते कविना इति तृतीयस्योत्तरम् । तदादौ शुशब्दे कृते शुकविना इति चतुर्थप्रश्नस्योत्तरं भवति । एवमुत्तरत्र नवसु लक्ष्यश्लोकेषु लक्षणानामनुगतिर्द्रष्टव्या । अस्मिंश्चित्रे चत्वार एव प्रश्नाः । इदं बहिर्लापि । तत्रादौ श्लोकचतुष्टयस्य शार्दूलविक्रीडितवृत्तम् । द्वयोः शालिनीवृत्तम् । पुनश्चतुर्णां मन्दाक्रान्तावृत्तम् ॥

किं लोकैरभिलष्यते तटभुवः सिन्धोश्च किं भूषणं
 किं साम्ये पदमीरयन्ति सुधियो राजन्यकं कीदृशम् ।
एकैकाक्षर० ॥ ३३ ॥

॥ शं, काशं, नीकाशं, सानीकाशम् ॥ २ ॥

किमिति । चत्वारः प्रश्नाः स्पष्टाः । उत्तराणि-शं सुखं, काशं काशपुष्पं, नीकाशं 'निभसङ्काशनीकाशा' इत्यमरः। सानीकाशं अनीके आशा अनीकाशा तया सहितमिति तथोक्तम् ॥

कः शब्दः प्रतिषेधमीरयति का[1] संज्ञा श्रियः का पुनः
 सीतायाः प्रियवादिनी स्फुरति का सम्फुल्लपद्मेक्षणा ।
एकैकाक्षर० ॥ ३४ ॥

॥ मा, रमा, सरमा, वासरमा ॥ ३ ॥

क इति । प्रश्नाः स्पष्टाः । उत्तराणि तु– मा, रमा, सरमा, (वासरमा) वासरश्रीरित्यर्थः ॥

---

१. 'का पद्माश्रया का पुनः' ख. च.

ध्वान्तं का विनिहन्ति काः कविबुधस्तोमैः सदा भूषिताः
कर्णारुन्तुदराविणो जगति के काः सन्ति युद्धक्षितौ ।
एकैकाक्षर० ॥ ३५ ॥

॥ भाः, सभाः, रासभाः, शरासभाः ॥ ४ ॥

ध्वान्तमिति । प्रश्नाः स्पष्टाः । उत्तराणि तु— भाः, सभाः, रासभाः, शरासभाः ॥

आभीरः काः पाति को वा न दण्ड्यो
युद्धोत्काः[1] के केन केऽब्धौ निमग्नाः ।
आदावादावाहितैकैकवर्णैः
शब्दैरेषामुत्तराणीरितानि ॥ ३६ ॥

॥ गाः, नागाः, सेनागाः, त्रासेनागाः ॥ ५ ॥

आभीर इति । प्रश्नचतुष्टयोत्तराणि— गाः, नागाः न विद्यते आगः यस्य सः । सेनां गच्छन्तीति सेनागाः सैनिका इति यावत् । त्रासेनागाः त्रासेन भयेन अगाः पर्वताः ॥

लोकेशः कः शुभ्रपक्षः खगः को
माध्वीं धत्ते कश्च भीमश्च कीदृक् ।
आदावादा० ॥ ३७ ॥

॥ कः, बकः, स्तबकः, शस्तबकः ॥ ६ ॥

---

१. 'युद्धोत्थाः' च.

लोकेश इति । प्रश्नेषूत्तराणि— कः, बकः, स्तबकः, शस्तबकः ॥

का प्रार्थ्या का युवजनमनःप्रीतिदा कीदृशी पू-
वाणी कीदृक् सुभटपटलीमात्रसम्पादनेच्छोः ।
आदावादौ स्फुटतरसमावेशितैकैकवर्णैः
शब्दैस्तेषां कथयतु रसादुत्तराणि प्रवीणः ॥ ३८ ॥

॥ मा, रामा, सारामा, असारामा ॥ ७ ।

केति । प्रश्नेषूत्तराणि— मा, रामा, सारामा, असारामा ॥

सम्बुद्धिः का भवति पततः कुत्र नेच्छा यतीनां
कस्मै कन्यामदिशदचलः कीदृशार्यमनश्च ।
आदावादौ० ॥ ३९ ॥

॥ वे, भवे, शम्भवे, माशम्भवे ॥ ८ ॥

सम्बुद्धिरिति । प्रश्नाः स्पष्टाः । उत्तराणि—वे, भवे, शम्भवे, साशं भवे ॥

को भूमिस्थः पशुविशसनोर्वी च का क्षुद्रराज-
श्रेणी कीदृक् सुरभिसमये कीदृशी भूरुहाली[3] ।
आदावादौ० ॥ ४० ॥

॥ ना, सूना, वसूना, नवसूना ॥ ९ ॥

---

१. ‘ रयादुत्त ’ च. २. ‘ आसारामा ’ ख.
३. ‘ हालिः ’ ख. च.

क इति । प्रश्नोत्तराणि– ना, सूना, वसूना, नवसूना ॥

का सम्बुद्धिर्भवति वयसः सौरभं कीदृशेऽब्जे
कस्मै चार्घ्यं प्रदिशति जनो ग्लौश्च कस्मै सुधां स्वाम् ।
आदावादौ० ॥ ४१ ॥

॥ वे, नव, भानवे, स्वर्भानवे ॥ १० ॥

केति । ग्लौश्चन्द्रः प्रदिशतीत्यर्थः । उत्तराणि– वे, नवे, भानवे स्वर्भानवे ॥

अथ हीयमानाक्षरम्—

प्रश्नोत्तरस्य क्रमशो वर्णह्रासो भवेद् यदि ।
निगदन्ति कवीन्द्रास्तद्धीयमानाक्षराभिधम् ॥ ४२ ॥

अथ हीयमानाक्षरम् । तल्लक्षणमाह– प्रश्नोत्तरस्येति । जातावेकवचनम् । प्रश्नोत्तराणां क्रमेण वर्णह्रासः वर्णन्यूनता चेद् हीयमानाक्षरसंज्ञं स्यात् ॥

तद्यथा[1] –

शम्भुः कीदृक् कीदृगेल्पाटवी[2]
द्रोः सम्बुद्धः काभाववाच्यक्षरं किम् ।
अन्तादन्तादुद्धृतैकैकवर्णः[3]
शब्दस्त्वेतेषूत्तरं नैवमाद्ये ॥ ४३ ॥

॥ नगजाप्तः, नगजा, नग, न ॥ १ ॥

---

१. 'यथा' ख. २. 'गार्याटवी' ख. च. ३. 'वर्णैः' ख.

उदाहरति—तद्यथा इति । अत्र लक्ष्यश्लोकेषु दशस्वपि शालिनीवृत्तम् । शम्भुरिति । द्रोर्वृक्षस्य अभाववाचीति पदविभागः । अन्तादन्तादुद्धृतैकैकवर्णः शब्दस्त्वेतेषु उत्तरं भवति । आद्येऽप्युत्तरे उद्धृतवर्णत्वं किमस्तीत्यत आह- नैवमाद्ये इति । अयं भावः-कैश्चिदक्षरैराद्यमुत्तरं सम्पाद्यम् । तस्य पुष्कलत्वेनैवोत्तरत्वम् । वर्णोद्धृतिर्नास्ति । सा द्वितीयादिषूत्तरेषु । उद्धरणं च अन्तादन्तात् । उत्तराणि तु- नगजाप्त इत्याद्यम् । नगजाया गौर्या आप्त इति प्रथमम् । नगजा इति द्वितीयम् । नगेति तृतीयम् । नेति चतुर्थम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥

सुभ्रूः कीदृक् साधुवाणी च कीदृक् पद्मः कीदृग् वर्तते कश्च भूमौ ।
अन्तादन्ताद्० ॥ ४४ ॥

॥ नाळीकाक्षी, नाळीका, नाळी, ना ॥ २ ॥

सुभ्रूरिति । पद्मः 'वा पुंसि पद्म'मित्यमरः । उत्तराणि- नाळीकाक्षी, नाळीका, नाळी, ना ॥

इतः परमष्टसु श्लोकेषु अन्तादन्ताद् वर्णोद्धरणं नास्ति । आदेरादेरेव ।

पूः कीदृक् का माधवेष्टा यतेर्वाक्
कीदृक् कं पाहीश्वरेत्याह भक्तः ।
[2]आदेरादेरुद्धृतैकैकवर्णः
शब्दस्त्वेतेषूत्तरं [3]नैवमन्ते ॥ ४५ ॥

॥ रामारामा, सारामा, रामा, मा ॥ ३ ॥

---

१. 'पद्मा कीदृग्' ख, च. २. 'आदेरादेरित्यादि । रामारामा' ख.
३. नैवमाद्ये(?)' क.

(पू:) कीदृगिति । प्रश्नाः स्पष्टाः । उत्तराणि– रामारामा, रामः अभिरामः आरामः यस्याः सा । मारामा- मेति रामा मारामा । रा मा– राः ऐश्वर्यं मा मास्तु । मा– मामित्यर्थः ॥

कुत्रास्ते श्रीः शूरधीः[1] क्व क विभ्राभ्यासो लक्ष्म्याः कश्च सम्बुद्धिशब्दः ।
आदेरादे:० ॥ ४६ ॥

॥ त्रिविक्रमे, विक्रमे, क्रमे, मे ॥ ४ ॥

कुत्रेति । प्रश्नाः स्पष्टाः । उत्तराणि– त्रिविक्रमे, विक्रमे, क्रमे, मे ॥

कीदृङ् मूर्तिर्धूर्जटेः का विशिष्टाः कीदृग् भूः का व्याहृतिर्भाति चाद्या ।
आदेरादे:० ॥ ४७ ॥

॥ रामाभाभूः, माभाभूः, भाभूः, भूः ॥ ५ ॥

कीदृगिति । प्रश्नाः स्पष्टाः । उत्तराणि–रामाभाभूः, रामा स्त्री तस्याः भाः शोभा तस्याः भूः स्थानम् । मा श्रीः भाः तेजः भूः भूमिः ता विशिष्टाः । भाभूः भानामु ... नामभूः(?) आस्थानं विश्वमिति । भूः ॥

हस्ती कीदृग् देवविद्वेषिणः[2] के सामोदाः का मालिकाः किं सरित्सु ।
आदेरादे:० ॥ ४८ ॥

॥ सदानवाः, दानवाः, नवाः, वाः ॥ ६ ॥

हस्तीति । अत्रोत्तराणि– सदानवाः दानवारिभिः सहितः । दानवाः, नवाः, वाः ॥

---

१. 'धोः शूर' ख. च.   २. 'वेदविद्वे' ख. च.

विश्वं कीदृग् भूर्जगत्कीदृगेतत्तीरे नद्याः किं जनैः प्राथ्यते किम् ।
आदेरादेः० ॥ ४९ ॥

॥ सनाकाशं, नाकाशं, काशं, शम् ॥ ७ ॥

विश्वमिति । अत्रोत्तराणि– सनाकाशं– नाकशया सहितम् । नाकाशम्– आकाशं न भवत् । काशम् । शम् ॥

यूनोः क्रीडा कुत्र का वाक् स्ववध्वा
नार्या लक्ष्म्याः कौ[2] च सम्बुद्धिशब्दौ ॥
आदेरादेः० ॥ ५० ॥

॥ सदारामे, दारा मे, रामे, मे ॥ ८ ॥

यूनोरिति । अत्रोत्तराणि—सदारामे– समीचीनोद्याने । दारा मे । रामे । मे ॥

अब्धिः कीदृग् भूचराः के सगन्धाः पुष्पौघाः के शीतलं किं प्रकृत्या ।
आदेरादेः० ॥ ५१ ॥

॥ अमानवाः, मानवाः, नवाः, वाः ॥ ९ ॥

अब्धिरिति । अत्रोत्तराणि— अमानवाः– अमानं वाः यस्य सः । मानवाः । नवाः । वाः ॥

कस्य स्यात् का कीदृगिन्दुर्निशायां
ध्वान्तघ्नः कः कस्य कर्मा[3]न्वितत्वम् ।
आदेरादेः० ॥ ५२ ॥

---

१. ' भूजगत् ' ख. च २. ' कथ सम्बुद्धिशब्दः ' ख. च.
३. ' धर्मा ' ख. च.

॥ द्योसभानुः, सभानुः, भानुः, नुः[1] ॥ १० ॥

केति । का पुनः कस्य स्यात् । अन्ये प्रश्नाः स्पष्टाः । उत्तराणि— द्योसभानुः- स्वर्गसभा अनुः अमनुष्यस्य । सभानुः- सकिरणः । भानुः । नुः— नरस्य ॥

अथ विभक्तिलिङ्गवचनव्यत्ययाः —

विभक्तिलिङ्गवचनैः[2] सङ्करेण च भिन्नयोः ।
प्रश्नयोरुत्तरैकत्वे तत्तद्भिन्नाभिधं भवेत् ॥ ५३ ॥

विभक्तीति । विभक्त्यादिभिः प्रश्नयोर्भिन्नत्वं कृत्वा कयाचिद्विभक्त्या कश्चन प्रश्नः कृतः । अन्यया विभक्त्याऽन्यः प्रश्नः । तौ ताभ्यां विभक्तिभ्यां भिन्नौ भवतः । एवं केनचिल्लिङ्गेन कश्चित् प्रश्नः कृतः । अन्येन लिङ्गेनापरः प्रश्नः कृतः । एवमेव केनचिद्वचनेन कश्चित् प्रश्न उक्तः । अन्येन वचनेनापरः प्रश्नः । ताभ्यां ताभ्यां भिन्नयोस्तयोस्तयोरुत्तरैकत्वे उक्तसंज्ञा स्यात् । सङ्करेण च भिन्नयोस्तथा । सङ्करो नाम विभक्त्यादिषु द्वयोस्त्रयाणां वा संसर्गः । स च त्रिविधः । विभक्तिलिङ्गयोः लिङ्गवचनयोर्विभक्तिलिङ्गवचनानां च सङ्करः । कयाचन विभक्त्या केनचिल्लिङ्गेन च कश्चन प्रश्नः कृतः, तदन्यविभक्त्या तदन्यलिङ्गेन कृतोऽपरः प्रश्नश्च तयोश्च । केनचिल्लिङ्गेन केनचिद्वचनेन कश्चन प्रश्नः कृतः, तदन्येन लिङ्गेन तदन्येन वचनेन चापरः प्रश्न उक्तः । तयोर्द्वयोर्द्वयोरुत्तरैकत्वे एकोत्तरत्व इत्यर्थः । तत्तद्भिन्नमिति । विभक्तिभ्यां भिन्नं विभक्तिभिन्नम् । लिङ्गाभ्यां भिन्नं लिङ्गभिन्नम् । वचनाभ्यां भिन्नं वचनभिन्नम् । एवं विभक्तिलिङ्गाभ्यां भिन्नं विभक्तिलिङ्गभिन्नम् । लिङ्ग-

---

१. 'नुः ॥ विभक्तिलिङ्गवचनैः' ख. २. वचनतत्सङ्करविभिन्नयोः' ख.ग.च.

वचनाभ्यां भिन्नं लिङ्गवचनभिन्नम् । विभक्तिलिङ्गवचनैर्भिन्नं विभक्तिलिङ्गवचनभिन्नम् । तेष्वाद्यानि त्रीणि शुद्धानि । अन्त्यानि त्रीणि मिश्राणि । एवं भिन्नानि षड्विधानि । तेषां प्रत्येकं दश दश लक्ष्यश्लोका आर्यावृत्तेन कथ्यन्ते । बाहिर्लापिनः षष्टिसंख्याकाः ॥

तत्र विभक्तिभिन्नं यथा--

पालयति को धरित्रीं केन पुनः पाल्यते धरित्रीयम् ।
वक्तुमिहोत्तरमेकं कमलभवस्यायुरेव परमवधिः ॥ ५४ ॥

॥ राजा ॥ १ ॥

तत्राद्यं विभक्तिभिन्नमुदाहरति- पालयति को धरित्रीमिति । पालयतीति प्रथमाविभक्त्यन्तोऽयं प्रश्नः । केन धरित्री पाल्यत इति प्रश्नस्तृतीयान्तः । एतयोः प्रथमान्ततृतीयान्तयोः प्रश्नयो राजेत्येकमुत्तरम् । तत्र नकारान्तशब्दः प्रथमप्रश्नस्य । जकारान्तशब्दो द्वितीयप्रश्नस्य । वक्तुमिहोत्तरमेकं कमलभवस्यायुरेव परमवधिरित्युत्तरार्धं षष्टिकानां साधारणम् । एवमुत्तरत्रापि लक्ष्यश्लोकेषु लक्षणानुगतिर्द्रष्टव्या ॥

सुभटकदम्बं कीदृग् विद्या कुत्र प्रकाशते पुंसाम् ।
वक्तुमिहोत्तरमेकं० ॥ ५५ ॥

॥ सदसि ॥ २ ॥

सुभटेति । प्रश्नद्वयं स्पष्टम् । प्रथमासप्तम्यन्तयोः प्रश्नयोः सदसीत्युत्तरम् । सन् असिर्यत्र तत[1] । अन्यत्र सदसि सभायाम् ॥

---

1. 'यत्र' ख.

कां तनुते कुटिलजनः कस्यामनुरागमच्युतः कुरुते ।
वक्तुमिहोत्तरमेकं० ॥ ५६ ॥

॥ मायाम् ॥ ३ ॥

कामिति । अत्र द्वितीयासप्तम्यन्तयोर्मायामित्येकमुत्तरम् । एकत्र मायामिति द्वितीयान्तम् । अन्यत्र लक्ष्म्यामिति ॥

वार्षुकजलदः कीदृग् बिभ्यति कस्मादपौरुषाः पुरुषाः ।
वक्तुमिहोत्तरमेकं० ॥ ५७ ॥

॥ असितः ॥ ४ ॥

वार्षुकेति । अत्र प्रथमापञ्चम्यन्तौ प्रश्नौ । उत्तरम् असितः इति । एकत्र असितः कृष्णः । अन्यत्र असितः खड्गात् ॥

कस्मात् स्रवति मदाम्भो भुवने कर्माधिकारी कः ।
वक्तुमिहोत्तरमेकं० ॥ ५८ ॥

॥ द्विपात् ॥ ५ ॥

कस्मादिति । अत्र पञ्चम्यन्तप्रथमान्तयोः प्रश्नयोर्द्विपादित्युत्तरम् । एकत्र गजात् । अन्यत्र मनुष्यः ॥

कस्माद् बिभेति लोको जैनस्य को वा विरोधमाचरति ।
वक्तुमिहोत्तरमेकं० ॥ ५९ ॥

---

१. 'कां शम्बरो विधत्ते कस्या' ख. च. २. 'तंस्तनुते' ख. च.
३. 'वार्षिक' ख. च. ४. 'कस्माद् भयं न भीमो भजते कर्मा' ग.
५. 'जनश्च को' ख. च.

॥ अहितः ॥ ६ ॥

कस्मादिति । अत्र पञ्चम्यन्तप्रथमान्तयोः अहितः इत्युत्तरम् । एकत्र अहितः सर्पात् । अन्यत्र शत्रुः ।

कुत्र चरन्ति विहङ्गाः शूद्राणामपि च मन्दिरं कीदृक् ।
वक्तुमिहोत्तरमेकं० ॥ ६० ॥

॥ वियति ॥ ७ ॥

कुत्रेति । अत्र सप्तमीप्रथमान्तयोः वियति इत्युत्तरम् । एकत्र आकाशे । अन्यत्र वियति यतिरहितम् ।

¶स्थूलाङ्गे सम्बुद्धिः का स्यात् कस्मै स्पृहानपत्यस्य ।
वक्तुमिहोत्तरमेकं० ॥ ६१ ॥

॥ पृथुकाय ॥ ८ ॥

*[स्थूलाङ्ग इति । अत्र सम्बोधनप्रथमाचतुर्थ्यन्तयोः प्रश्नयोः पृथुकाय इत्युत्तरम् । एकत्र पृथुकाय इत्यस्य स्थूलाङ्गेत्यर्थः । अन्यत्र शिशवे ॥]

कस्मादुदभूद् भीमः को राजा यज्ञकर्मणि प्रथितः ।
वक्तुमिहोत्तरमेकं० ॥ ६२ ॥

॥ मरुत्तः ॥ ९ ॥

¶ खचपाठयोः पद्यानामयं क्रमः– 'ध्वान्तध्वंस०' 'श्रेयोऽर्थं०' 'कस्मादुदभूद्०' 'स्थूलाङ्गे०' इति ।

* व्याख्येयमादर्शे नास्ति ।

[*कस्मादिति । अत्र पञ्चमीप्रथमान्तयोः प्रश्नयोः मरुत्तः इत्युत्तरम् । एकत्र मरुत्तः वायोः । अन्यत्र मरुत्तस्तन्नामकः सूर्यवंशजः कश्चिद् राजा ।।]

[1]श्रेयोर्थी कलयेत् कं कथमिव निर्दिश्यते जनोऽग्रस्थः ।
वक्तुमिहोत्तरमेकं० ।। ६३ ।।

।। अयम् ।। १० ।।

श्रेय इति । अत्र द्वितीयाप्रथमान्तयोः प्रश्नयोः अयम् इत्युत्तरम् । एकत्र शुभावहविधिः । अन्यत्र इदंशब्दे पुंसि प्रथमा ।।

¶ध्वान्तध्वंसः कस्माद् भवति विधोः कीदृशश्च सम्भोगः ।
वक्तुमिहोत्तरमेकं० ।। ६४ ।।

।। भानुमतः ।। ११ ।।

ध्वान्तेति । अत्र पञ्चम्यन्तप्रथमान्तप्रश्नयोः भानुमतः इत्युत्तरम् । एकत्र भानुमतः सूर्यात् । अन्यत्र भैर्नक्षत्रैरनुमत इति ।।

लिङ्गभिन्नं यथा—

किं विचिनोति किरातो भजति जनो दैववैपरीत्ये काम् ।
वक्तुमिहोत्तरमेकं० ।। ६५ ।।

।। विपदम् ।। १ ।।

---

* व्याख्येयमादर्शे नास्ति ।

¶ कपाठे गपाठे चायं श्लोको नास्ति । किन्तु कपाठे व्याख्या दृश्यते ।

---

१. 'श्रेयोर्थं' ख. च.

किमिति । अत्र नपुंसकस्त्रीलिङ्गयोः प्रश्नयोः विपदम् इत्युत्तरम् । एकत्र वेः पदमिति । अन्यत्र आपदम् ॥

किं विनिहन्ति ध्वान्तं प्रीतिं को वा जनस्य विदधाति ।
वक्तुमिहोत्तरमेकं० ॥ ६६ ॥

॥ महः ॥ २ ॥

किमिति । अत्र नपुंसकपुल्लिङ्गयोः महः इत्युत्तरम् । एकत्र सकारान्तः शब्दः । अन्यत्र अकारान्तः ॥

अद्रिः कीदृक् तरुभिः कीदृक् च जगन्निशासु गतचन्द्रम् ।
वक्तुमिहोत्तरमेकं० ॥ ६७ ॥

॥ [1]निबिडतमः ॥ ३ ॥

अद्रिरिति । अत्र पुल्लिङ्गनपुंसकलिङ्गयोः प्रश्नयोः निबिडतम इत्युत्तरम् । एकत्र अतिशयेन निबिडः निबिडतमः । अन्यत्र निबिडं तमो यस्य तत् तथोक्तम् ॥

आह्लादयति किमिन्दुस्तनोति कां भूपतिः [2]समीचीनः ।
वक्तुमिहोत्तरमेकं० ॥ ६८ ॥

॥ कुमुदम् ॥ ४ ॥

आह्लादयतीति । अत्र नपुंसकस्त्रीलिङ्गयोः प्रश्नयोः कुमुदमित्युत्तरम् । एकत्र कैरवम् । अन्यत्र कोः भुवः मुदं प्रीतिम् ॥

---

१. 'सान्द्रतमः' ख. ग. च.   २. 'भूपतिश्च नीतिपरः' ग.

को रामेण कृतोऽच्युतहृतचेलं गोपिकाकुलं कीदृक् ।
वक्तुमिहोत्तरमेकं० ॥ ६९ ॥

॥ वनवासः ॥ ५ ॥

क इति । अत्र पुंनपुंसकलिङ्गयोः प्रश्नयोः वनवास इत्युत्तरम् । एकत्रारण्यवासः । अन्यत्र वनं जलमेव वासो यस्य तत्तथोक्तम् ॥

किं भिद्यते जलौघैर्विन्ध्येनाकारि कश्च पुष्पवतोः ।
वक्तुमिहोत्तरमेकं० ॥ ७० ॥

॥ रोधः ॥ ६ ॥

किमिति । अत्र नपुंसकपुल्लिङ्गयोः प्रश्नयो रोध इत्युत्तरम् । एकत्र सकारान्तम् । अन्यत्र अकारान्तम् ॥

मेना का कन्दर्पत्रिपुरान्धकशमनदमनः कः ।
वक्तुमिहोत्तरमेकं० ॥ ७१ ॥

॥ [1]गिरिजामाता ॥ ७ ॥

मेनेति । अत्र स्त्रीलिङ्गपुल्लिङ्गयोः प्रश्नयोः गिरिजामातेत्युत्तरम् । एकत्र गिरिजाया माता । अन्यत्र गिरेर्जामाता ॥

कीदृक् तटिनीवल्लभदुहिता देवस्त्रिविक्रमः कीदृक् ।
वक्तुमिहोत्तरमेकं० ॥ ७२ ॥

---

१. 'अद्रिजामाता' ग.

॥ जगन्माता ॥ ८ ॥

कीदृगिति । अत्र स्त्रीलिङ्गपुल्लिङ्गयोः प्रश्नयोः जगन्मातेत्युत्तरम् । एकत्र जगतां माता प्रसूः । अन्यत्र जगन्ति मातीति जगन्माता ॥

मैनाकेन हिमाद्रिः कीदृक् का हिमवतश्च रुद्राणी ।
वक्तुमिहोत्तरमेकं० ॥ ७३ ॥

॥ पुत्री ॥ ९ ॥

मैनाकेनेति । अत्र पुल्लिङ्गस्त्रीलिङ्गयोः प्रश्नयोः उत्तरं पुत्रीति । एकत्र पुत्रवान् । अन्यत्र दुहिता ॥

कः क्रूरस्फुरकिरणो माहात्म्यविधायि किं मुनीन्द्राणाम् ।
वक्तुमिहोत्तरमेकं० ॥ ७४ ॥

॥ तपः ॥ १० ॥

क इति । अत्र पुल्लिङ्गनपुंसकलिङ्गयोरुत्तरं तप इति । एकत्र अकारान्तः । अन्यत्र सकारान्तः ॥

तप्तं किं मृदु भवति क्रियते श्रेयोर्थिना जनेन च कः ।
वक्तुमिहोत्तरमेकं० ॥ ७५ ॥

॥ अयः ॥ ११ ॥

तप्तमिति । अत्र नपुंसकपुल्लिङ्गयोः प्रश्नयोः अयः इत्युत्तरम् । एकत्र सकारान्तः । अन्यत्र अकारान्तः ।

लङ्कानगरं कीदृङ् मात्रा क्रियते च कीदृशो बालः ।
वक्तुमिहोत्तरमेकं० ॥ ७६ ॥

॥ उपचितरक्षः ॥ १२ ॥

लङ्केति । अत्र नपुंसकपुंल्लिङ्गयोः प्रश्नयोरुपचितरक्ष इत्युत्तरम् । एकत्र उपचितानि रक्षांसि येन तत् । अन्यत्र उपचिता रक्षा यस्य सः ॥

किं परिहार्यं लोकैः श्रीकामैः स्यादनिन्द्यजन्मा कः ।
वक्तुमिहोत्तरमेकं० ॥ ७७ ॥

॥ अजारजः ॥ १३ ॥

*[किमिति । अत्र नपुंसकपुंल्लिङ्गयोः प्रश्नयोरजारज इत्युत्तरम् । एकत्र सकारान्तः । अन्यत्र अकारान्तः ॥]

[1]वचनभिन्नं यथा—

कीदृक् प्रदोषसमयः के च पुनः सर्व[2]लोकहितनिरताः ।
वक्तुमिहोत्तरमेकं० ॥ ७८ ॥

॥ उत्तमाः ॥ १ ॥

अथ वचनभिन्नम् । कीदृगिति । अत्रैकवचनबहुवचनान्तप्रश्नयोः उत्तमा इत्येकमुत्तरम् । एकत्र उद्गतं तमो यस्य स तथोक्तः । अन्यत्र उत्तमाः श्रेष्ठाः ॥

---

* व्याख्येयमादर्शे नास्ति ।

---

१. 'अथ वचन' ग. २. 'शुभनिरताः' ख. च.

कीदृगगस्त्यमहर्षिः कीदृक्षा वासरा निदाघर्तौ ।
वक्तुमिहोत्तरमेकं० ॥ ७९ ॥

॥ महातपाः ॥ २ ॥

कीदृगिति । अत्र एकवचनबहुवचनयोः प्रश्नयोः उत्तरं महातपा इति । एकत्र महत् तपो यस्य स तथोक्तः । अन्यत्र महानातपो येषां ते तथोक्ताः ॥

कीदृक्षाः साधुजनाः क्रूरजनस्यापि मनसि को नास्ति ।
वक्तुमिहोत्तरमेकं० ॥ ८० ॥

॥ दयालवः ॥ ३ ॥

कीदृक्षा इति । अत्र बहुवचनैकवचनान्तयोः प्रश्नयोः दयालव इत्युत्तरम् । एकत्र दयालवः दयावन्तः । अन्यत्र दयायाः लवो लेशः ॥

के मधु पुष्पप्रभवं पिबन्ति परमेश्वरश्च कीदृक्षः ।
वक्तुमिहोत्तरमेकं० ॥ ८१ ॥

॥ अलयः ॥ ४ ॥

क इति । अत्र बहुवचनैकवचनयोः प्रश्नयोरुत्तरम् अलय इति । एकत्र भृङ्गाः । अन्यत्र लयरहितः ॥

कीदृङ् मलयाद्रिमरुत् प्रतिकूलं कर्म के वितन्वन्ति ।
वक्तुमिहोत्तरमेकं० ॥ ८२ ॥

॥ अरयः ॥ ५ ॥

कीदृगिति । अत्रैकवचनबहुवचनयोः प्रश्नयोरुत्तरम् अरय इति । एकत्र रयेण वेगेन रहितः । अन्यत्र अरयः शत्रवः ॥

रञ्जयति कः समस्तान् प्रार्थयते[1] कति जनश्च पुरुषार्थान् ।
वक्तुमिहोत्तरमेकं० ॥ ८३ ॥

॥ चतुरः ॥ ६ ॥

रञ्जयतीति । अत्र एकवचनबहुवचनयोः प्रश्नयोरुत्तरं चतुर इति । एकत्र चतुरः समर्थः । अन्यत्र चतुरः चतुःसङ्ख्याकान् ॥

के सञ्चरन्ति कुटिलं को गन्तुं शीघ्रमक्षमोऽध्वानम् ।
वक्तुमिहोत्तरमेकं० ॥ ८४ ॥

॥ अहयः ॥ ७ ॥

क इति । अत्र बहुवचनैकवचनयोः प्रश्नयोरुत्तरम् अहय इति । एकत्र अहयः सर्पाः । अन्यत्र हयरहितः ॥

चेष्टन्ते भुवने[2] के कीदृग् गङ्गालयश्च भवति पुनः ।
वक्तुमिहोत्तरमेकं० ॥ ८५ ॥

॥ सासवः ॥ ८ ॥

चेष्टन्त इति । अत्र बहुवचनैकवचनान्तयोः प्रश्नयोरुत्तरं सासव इति । एकत्र सासवः असुसहिताः । अन्यत्र आसवसहितः ॥

---

१. 'कति पुत्रान् प्राप दशरथक्षितिपः' ख. च.

२. 'भुवि के वा कीदृग्' ग.

कः काठिन्यविमुक्तः के क्रान्तैरध्वगैर्निषेव्यन्ते ।
वक्तुमिहोत्तरमेकं ॥ ८६ ॥

॥ द्रवः ॥ ९ ॥

क इति । अत्रैकवचनबहुवचनान्तयोः प्रश्नयोरुत्तरं द्रव इति । एकत्र द्रवो द्रवपदार्थः । अन्यत्र द्रवः वृक्षाः ॥

के पाण्डवैर्व्यरुन्धन् बलिपुष्टः कीदृशश्च भवति भुवि ।
वक्तुमिहोत्तरमेकं० ॥ ८७ ॥

॥ कुरवः ॥ १० ॥

क इति । अत्र बहुवचनैकवचनान्तयाः प्रश्नयोरुत्तरं कुरव इति । एकत्र कुरवो दुर्योधनादयः । अन्यत्र कुत्सितरवः ॥

कीदृग् भिन्नः पटहः सुखगमने के च साधनीभूताः ।
वक्तुमिहोत्तरमेकं० ॥ ८८ ॥

॥ अध्वानः ॥ ११ ॥

कीदृगिति । अत्र एकवचनबहुवचनान्तयोः प्रश्नयोः अध्वान इत्युत्तरम् । एकत्र अध्वानः ध्वानरहितः । अन्यत्र अध्वानो मार्गाः ॥

अथ सङ्कीर्णोदाहरणानि । तत्र[3] विभक्तिलिङ्गभिन्नं यथा—

---

१. श्लोकोऽयं खपाठे नास्ति । २. 'पुनः' ख. च.
३. 'लिङ्गविभक्तिभिन्नं' ख. च.

केनानस्य ध्वंसः कैटभमथनस्य कीदृशी मूर्तिः ।
वक्तुमिहोत्तरमेकं० ॥ ८९ ॥

॥ बहुभुजा ॥ १ ॥

अथ सङ्करभिन्नोदाहरणानि ॥ तत्र विभक्तिभिन्नलिङ्गभिन्नमुदाहरति—केनेति । अत्र तृतीयाविभक्तिकः कश्चित् प्रश्नवाचकशब्दः प्रथमाविभक्तिकः स्त्रीलिङ्गश्चान्यः प्रश्नः । तयोर्बहुभुजा इत्युत्तरम् । बहु भुङ्क्ते इति बहुभुक् । तेनेति प्रथमस्य प्रश्नस्य । बहवो भुजा यस्याः सा बहुभुजा इति द्वितीयस्य ॥

कस्मादुदेति नलिनं को वा साहित्यमाधुरीं वेद ।
वक्तुमिहोत्तरमेकं० ॥ ९० ॥

॥ सरसः ॥ २ ॥

कस्मादिति । अत्र पञ्चमीविभक्त्या नपुंसकलिङ्गेन च कश्चन प्रश्नः । प्रथमापुल्लिङ्गाभ्यामपरः प्रश्नः । तयोः सरस इत्येकमुत्तरम् । एकत्र सरसः कासारात् । अन्यत्र सरसः शृङ्गारादिरसविशिष्टः पुरुष इत्यर्थः ॥

राक्षसलोकः कीदृक् पुष्टिः कस्मादुदेति गृध्रस्य ।
वक्तुमिहोत्तरमेकं० ॥ ९१ ॥

॥ क्रव्यात् ॥ ३ ॥

राक्षसलोक इति । अत्र प्रथमापुल्लिङ्गाभ्यां कश्चित् प्रश्नः । पञ्चमीपुल्लिङ्गाभ्यामपरः । तयोः क्रव्याद् इति उत्तरम् । एकत्र क्रव्यमत्तीति क्रव्यात् । अन्यत्र क्रव्यान्मांसात् ॥

इन्दोर्मूर्तिः कीदृक् नन्दगृहे कीदृशा स्थितं हलिना ।
वक्तुमिहोत्तरमेकं० ॥ ९२ ॥

॥ सहरिणा ॥ ४ ॥

इन्दोरिति । अत्र प्रथमास्त्रीलिङ्गाभ्यां कश्चित् प्रश्नः । तृतीया-पुल्लिङ्गाभ्यामन्यः । तयोः सहरिणा इत्युत्तरम् । एकत्र सहरिणा हरिणेन सहिता । अन्यत्र सहरिणा हरिसहितेन ॥

केन श्रुत्योः प्रीतिर्यौवनसहिता च कीदृशी वनिता ।
वक्तुमिहोत्तरमेकं० ॥ ९३ ॥

॥ सुगात्रा ॥ ५ ॥

केनेति । अत्र तृतीयापुल्लिङ्गाभ्यां कश्चित् प्रश्नः । प्रथमास्त्रीलिङ्गाभ्यामन्यः । तयोः सुगात्रा इत्युत्तरम् । एकत्र शोभनो गाता सुगाता तेन । अन्यत्र शोभनं गात्रं यस्याः सा ॥

सन्ति गुणौघाः कस्मिन् सम्बुद्धिः कीदृशी च वनितायाः ।
वक्तुमिहोत्तरमेकं० ॥ ९४ ॥

॥ रामे ॥ ६ ॥

सन्तीति । अत्र सप्तमीपुल्लिङ्गाभ्यामेकः प्रश्नः । सम्बोधनप्रथमा-स्त्रीलिङ्गाभ्यामन्यः । तयो रामे इत्युत्तरम् । एकत्र रामे राघवे । अन्यत्र रामाशब्दस्य सम्बुद्धिः ॥

केन विनिर्मीति रथं रथकारः कीदृशी च शूर्पणखा[1] ।
वक्तुमिहोत्तरमेकं० ॥ ९५ ॥

॥ दारुणा[2] ॥ ७ ॥

केनेति । अत्र तृतीयानपुंसकलिङ्गाभ्यामेकः प्रश्नः । प्रथमास्त्रीलिङ्गाभ्यामन्यः । तयोः दारुणा इत्युत्तरम् । एकत्र दारुणा काष्ठेन । अन्यत्र भीषणा ॥

हृष्टा जनता कीदृङ् मासेन हिमं विकीर्यते केन ।
वक्तुमिहोत्तरमेकं० ॥ ९६ ॥

॥ सहसा ॥ ८ ॥

हृष्टेति । अत्र प्रथमास्त्रीलिङ्गाभ्यां कश्चित् प्रश्नः । तृतीयापुंलिङ्गाभ्यामन्यः । तयोः सहसा इत्युत्तरम् । एकत्र हसेन हासेन सहिता । अन्यत्र सहसा सहोमासेन ॥

साधोर्वाणी कीदृक् केन पुनः प्राप्यते यशः पुंसा ।
वक्तुमिहोत्तरमेकं० ॥ ९७ ॥

॥ अपरुषा ॥ ९ ॥

साधोरिति । अत्र प्रथमास्त्रीलिङ्गाभ्यां कश्चित् प्रश्नः । तृतीयापुंलिङ्गाभ्यामन्यः । तयोः अपरुषा इत्युत्तरम् । एकत्र परुषा न भवतीत्यपरुषा । अन्यत्र अपगता रुड् यस्य सः तेन ॥

---

१. 'खी' ख. च. २. 'सुदारुणा' क. ग.

तरुणी चकास्ति कीदृक् सेना[1] केनाभिपालिता जयति ।
वक्तुमिहोत्तरमेकं ॥ ९८ ॥

॥ सुनेत्रा ॥ १० ॥

तरुणीति । अत्र प्रथमास्त्रीलिङ्गाभ्यां कश्चित् प्रश्नः । तृतीयापुलिङ्गाभ्यामन्यः । तयोः सुनेत्रा इत्युत्तरम् । एकत्र शोभननेत्रा सुदृगित्यर्थः । अन्यत्र शोभननायकेन ॥

लिङ्गवचनभिन्नं यथा —

पाणिर्विलासिनीनां मध्यभुवश्चापि कीदृशस्तासाम् ।
वक्तुमिहोत्तरमेकं० ॥ ९९ ॥

॥ सवलयः ॥ १ ॥

इदमेकरूपप्रश्नं[2] च । कीदृश इति[3] पदस्य पुल्लिङ्गैकवचनस्त्रीलिङ्गबहुवचनरूपत्वात्[4] ।

अथ लिङ्गवचनभिन्नमुदाहरति — पाणिरिति । अत्र विलासिनीनां पाणिः कीदृशः । अत्राकारान्तोऽयं शब्दः पुलिङ्गश्चैकवचनान्तश्च । तासां मध्यभुवश्च कीदृश इति शकारान्तोऽयं शब्दो बहुवचनान्तः स्त्रीलिङ्गश्च । एवंविधयोः प्रश्नयोः सवलय इत्युत्तरम् । एकत्र वलयैः सहितः सवलयः

---

१. 'भूमिः केना' ख. 'मैनाकेनाभि' च.

२. 'प्रश्नपदं च' ख. च. ३. 'इत्यस्य पुंस्येकवचने स्त्रियां बहुवचने चैकरूपत्वात् । दावप्लुष्ट०' ख. च.

४. 'परत्वत्' ग.

इति पुलिङ्गैकवचनम् । अन्यत्र वलिभिः सहिता इति स्त्रीलिङ्गबहुवचनम् । अत्र कीदृश इति प्रश्नपदस्याप्येकरूपत्वं विशेषः ॥

*कीदृश्यः स्वैरिण्यः कीदृक् च विभाति नन्दनोद्देशः ।
वक्तुमिहोत्तरमेकं० ॥ १०० ॥

॥ ससुरतरुचयः ॥ २ ॥

दावप्लुष्टमरण्यं कीदृक् के दुर्बलाश्चतुष्पात्सु ।
वक्तुमिहोत्तरमेकं० ॥ १०१ ॥

॥ अवयः ॥ ३ ॥

दावेति । अत्र नपुंसकैकवचनाभ्यां कश्चित् प्रश्नः । पुलिङ्गबहुवचनाभ्यामन्यः । तयोः अवयः इत्युत्तरम् । एकत्र अवयः वयोभिः पक्षिभिर्विरहितम् । अन्यत्र अवयः अविशब्दे बहुवचनम् ॥

कीदृश्यः सारसुत्रः कीदृक् क्षोणीपतिश्च नीतिपरः ।
वक्तुमिहोत्तरमेकं० ॥ १०२ ॥

॥ बहुसुखनयः ॥ ४ ॥

कीदृश्य इति । अत्र स्त्रीलिङ्गबहुवचनाभ्यां कश्चित् प्रश्नः । पुलिङ्गैकवचनाभ्यामन्यः । एकत्र शोभनाः खनयः सुखनयः । बह्व्यः सुखनयो यासु तास्तथोक्ताः । अन्यत्र सुखानि नयाश्च सुखनयाः । बहवः सुखनया यस्य स तथोक्तः ॥

---

* मातृकायामस्य पद्यस्य व्याख्या नास्ति ।

क्रोऽधारि त्रिपुरभिदा भान्ति सभा रक्षसां च कीदृश्यः ।
वक्तुमिहोत्तरमेकं० ॥ १०३ ॥

॥ भीष्मसूरयः ॥ ५ ॥

क इति । अत्र पुंल्लिङ्गैकवचनाभ्यां कश्चित् प्रश्नः । स्त्रीलिङ्गबहुवचनाभ्यामन्यः । तयोर्भीष्मसूरय इत्युत्तरम् । एकत्र भीष्मसूरयः गङ्गावेगः । अन्यत्र भीष्माः सूरयो यासु ताः ॥

निबिडानि कानि तरुभिः सम्बुद्धिः का पुनर्महाटव्याः ।
वक्तुमिहोत्तरमेकं० ॥ १०४ ॥

॥ अरण्यानि ॥ ६ ॥

निबिडानीति । अत्र नपुंसकलिङ्गबहुवचनाभ्यां कश्चित प्रश्नः । संम्बोधनप्रथमैकवचनाभ्यामन्यः । तयोः अरण्यानि इत्युत्तरम् । एकत्र अरण्यशब्दबहुवचनम् । अन्यत्र अरण्यानीशब्दसम्बुद्धिः ॥

राक्षसराजः कीदृक् पुराणपुष्पच्छटाश्च कीदृश्यः ।
वक्तुमिहोत्तरमेकं० ॥ १०५ ॥

॥ असुरभयः ॥ ७ ॥

राक्षसराज इति । अत्र पुंल्लिङ्गैकवचनाभ्यामेकः प्रश्नः । स्त्रीलिङ्गबहुवचनाभ्यामन्यः । तयोः असुरभय इत्युत्तरम् । एकत्र सुरेभ्यो भयं सुरभयम् । तन्न विद्यते यस्य सः । अन्यत्र सुरभयो न भवन्तीति असुरभयः ॥

कमलैर्विराजते का कथ्येते कथमपां तथाधारौ ।
वक्तुमिहोत्तरमेकं० ॥ १०६ ॥

॥ सरसी ॥ ८ ॥

कमलैरिति । अत्र स्त्रीलिङ्गैकवचनाभ्यां कश्चित् प्रश्नः । नपुंसकलिङ्गद्विवचनाभ्यामन्यः । तयोः सरसी इत्युत्तरम् । एकत्र सरसी इति ईकारान्तम् । अन्यत्र सकारान्तं द्विवचनम् ॥

कीदृंशि शशिमहांसि प्रालेयचयस्य का च सम्बुद्धिः ।
वक्तुमिहोत्तरमेकं० ॥ १०७ ॥

॥ हिमानि[1] ॥ ९ ॥

कीदृंशीति । अत्र नपुंसकलिङ्गबहुवचनाभ्यां कश्चित् प्रश्नः । स्त्रीलिङ्गैकवचनाभ्यामन्यः । तयोर्हिमानि इत्युत्तरम् । एकत्र हिमशब्दाद् बहुवचनम् । अन्यत्र हिमानीशब्दात् सम्बुद्धिः* ॥

कलकण्ठमिथुनसङ्घः कीदृक्षः कीदृशोऽभ्रसीमानः ।
वक्तुमिहोत्तरमेकं० ॥ १०८ ॥

॥ समरुतः ॥ १० ॥

---

* सम्बुद्धिः । जायत इति । अत्र स्त्रीलिङ्गबहुवचनाभ्यां कश्चित् प्रश्नः । पुल्लिङ्गैकवचनाभ्यामन्यः । तयोः विद्युद्रुचय इत्युत्तरम् । एकत्र विद्युतां रुचयः । अन्यत्र विगतो द्युद्रुचयः स्वर्द्रुसमूहो यस्य स तथोक्तः ॥" व्याख्येयं मातृकायां दृश्यते । अस्या मूलश्लोकः कुत्रापि ग्रन्थे नास्ति ।

---

१. 'नि ॥ कीदृश्यः स्वैरिण्यः०' ख. ग. च.

अन्यत्र आर्या न भवन्तीति नार्याः ॥

रक्षन्तीन्द्रप्रमुखाः काः प्रावृट्पुष्पितो[1] द्रुमः कः स्यात् ॥
वक्तुमिहोत्तरमेकं० ॥ १११ ॥

॥ ककुभः[2] ॥ ३ ॥

रक्षन्तीति । अत्र द्वितीयास्त्रीलिङ्गबहुवचनैर्भिन्नः कश्चित् प्रश्नः । प्रथमापुल्लिङ्गैकवचनैरन्यः । तयोः ककुभ इत्युत्तरम् । एकत्र ककुभः दिशः । अन्यत्र अर्जुनवृक्षः ॥

केषां रात्रौ[3] वृद्धिः कां वा पापापहां वदन्ति नदीम् ।
वक्तुमिहोत्तरमेकं० ॥ ११२ ॥

॥ तमसाम् ॥ ४ ॥

केषामिति । अत्र षष्ठीनपुंसकलिङ्गबहुवचनैः भिन्नः कश्चित् प्रश्नः । द्वितीयास्त्रीलिङ्गैकवचनैरन्यः । तयोः तमसामित्युत्तरम् । एकत्र अन्धकाराणाम् । अन्यत्र तमसाख्यां नदीम् ॥

कस्याश्चक्षुर्विपुलं सत्पुरुषाः कीदृशा भवन्ति भुवि ।
वक्तुमिहोत्तरमेकं० ॥ ११३ ॥*

॥ मृग्यः ॥ ५ ॥

---

* ११३–११४ तमश्लोकयोर्व्याख्या मातृकायां नास्ति ।

---

१. ' प्रावृषि पुष्पितो ' ख. ग. च.

२. ' भः ॥ कस्याश्चक्षु० । केषां रात्रौ० ' ख. च.

३. ' राज्यां ' च.

[कस्या इति । अत्र षष्ठीस्त्रीलिङ्गैकवचनैः भिन्नः कश्चित् प्रश्नः ॥ प्रथमापुल्लिङ्गबहुवचनैः अन्यः । तयोर्मृग्या इत्युत्तरम् । एकत्र हरिण्याः ॥ अन्यत्र अन्वेषणीयाः ॥]

शाड्वलदेशः कीदृग् व्याप्नोति च सज्जनस्य कीर्तिः काः ।
वक्तुमिहोत्तरमेकं० ॥ ११४ ॥

॥ हरितः ॥ ६ ॥

[शाड्वलेति । अत्र प्रथमापुल्लिङ्गैकवचनैः कश्चित् प्रश्नः । द्वितीया-स्त्रीलिङ्गबहुवचनैः अन्यः । तयोर्हरित इत्युत्तरम् । एकत्र हरितः श्यामलः । अन्यत्र हरितः दिशः ॥]

शेषः केषामधिभूरखिलगुणैः कीदृशीं रमामाहुः ।
वक्तुमिहोत्तरमेकं० ॥ ११५ ॥

॥ अहीनाम् ॥ ७ ॥

शेष इति । अत्र षष्ठीपुल्लिङ्गैकवचनैः भिन्नः कश्चित् प्रश्नः । द्वितीया-स्त्रीलिङ्गैकवचनैः अन्यः । तयोरहीनामित्युत्तरम् । एकत्र अहीनां सर्पाणाम् । अन्यत्र अहीनामविरहिताम् ॥

कस्याः सर्वसहता काननसञ्चारकातराः के वा ।
वक्तुमिहोत्तरमेकं० ॥ ११६ ॥

॥ अवन्याः ॥ ८ ॥

कस्या इति । अत्र षष्ठीस्त्रीलिङ्गैकवचनैः भिन्नः कश्चित् प्रश्नः । प्रथमापुल्लिङ्गबहुवचनैरन्यः । तयोरवन्याः इत्युत्तरम् । एकत्र अवन्याः भूमेः । अन्यत्र वन्यां न भवन्तीत्यवन्याः ॥

गृह्णन्ति चापलतिका योद्धारः कीदृशीरसन् कीदृक् ।
वक्तुमिहोत्तरमेकं० ॥ ११७ ॥

॥ खरपरुषः[1] ॥ ९ ॥

गृह्णन्तीति । अत्र द्वितीयास्त्रीलिङ्गबहुवचनैर्भिन्नः कश्चित् प्रश्नः । प्रथमापुल्लिङ्गबहुवचनैरन्यः । तयोः खरपरुष इत्युत्तरम् । एकत्र खराणि परूंषि यासां ताः । अन्यत्र खर इव परुषः ॥

के विलसन्ति निशायां ग्रहाः सुखं नायकस्य कस्याः स्यात् ।
वक्तुमिहोत्तरमेकं० ॥ ११८ ॥

॥ चन्द्रमुख्याः ॥ १० ॥

क इति । अत्र प्रथमापुल्लिङ्गबहुवचनैः भिन्नः कश्चित् प्रश्नः । पञ्चमीस्त्रीलिङ्गैकवचनैरन्यः । तयोः चन्द्रमुख्या इत्येकमुत्तरम् । एकत्र चन्द्रमुख्या चन्द्रप्रमुखाः । अन्यत्र चन्द्रमुख्याः इन्दुवदनायाः स्त्रिया इत्यर्थः ॥

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
तस्याभूत् प्रथमः कृताविह परिच्छेदः सभारञ्जकः
शब्दालङ्कृतिधोरणीसमुदितः श्रीचित्ररत्नाकरे ॥

इति[2] प्रथमः परिच्छेदः ॥

---

१. "घः ॥ मुखतः केषां प्रभवो भुवने का वा, *तनुं दहति जनः वक्तुमिहोत्तरमेकं० ' ॥ विप्राणाम् ॥ के विलसन्ति० । ' ख. च.

२. इति चक्रकविकृतिषु चित्ररत्नाकरे अयं प्रथमः परिच्छेदः ।

---

* 'तनुं दहन्ति जनाः ' च.

कलकण्ठेति । अत्र पुल्लिङ्गैकवचनाभ्यां कश्चित् प्रश्नः । स्त्रीलिङ्गबहुवचनाभ्यामन्यः । एकत्र समं रुतं यस्य सः तथोक्तः । अन्यत्र समरुतः सवायवः ॥

त्रिभक्तिवचनै[1]रूपस्य सङ्कीर्णस्य हलन्तषु बहुत्वान्नोदाहृतम् । यथा— सरितः मरुतः मधुलिहः जलमुचः । एतेषां प्रथमाबहुवचनस्य षष्ठ्येकवचनस्य च तुल्यत्वात् ।

लिङ्ग[2]वचनविभक्तिभिन्नं यथा—

केषां पङ्कजशोभा धूर्तजनः कीदृशीं वधूमिच्छेत् ।
वक्तुमिहोत्तरमेकं० ॥ १०९ ॥

॥ सरसाम्[3] ॥ १ ॥

अथ विभक्तिलिङ्गवचनभिन्नम् उदाहरति— **केषा**मिति । अत्र षष्ठीनपुंसकलिङ्गबहुवचनेन कश्चित् प्रश्नोऽभिहितः । द्वितीयास्त्रीलिङ्गैकवचनैरन्यः । तयोः सरसामित्येकमुत्तरम् । एकत्र सरसां पद्माकराणाम् । अन्यत्र सरसां शृङ्गाररसविशिष्टाम् ॥

कस्याः क्रौर्यं प्रार्थितं के वा न विदन्ति सज्जनमहत्त्वम् ।
वक्तुमिहोत्तरमेकं० ॥ ११० ॥

॥ नार्याः ॥ २ ॥

कस्या इति । अत्र षष्ठीस्त्रीलिङ्गैकवचनैः भिन्नः कश्चित् प्रश्नः । प्रथमापुल्लिङ्गबहुवचनैरन्यः । तयोर्नार्या इत्युत्तरम् । एकत्र नार्याः स्त्रियाः',

---

१. ' नभेदरूपस्य हल ' ख. ' नभेदरूपस्य सङ्कीर्णस्य हल ' च.
२. ' अथ विभक्तिलिङ्गवचनभिन्नं ' ग.
३. ' साम् ॥ रक्षन्तीन्द्र० ॥ कस्याः क्रौर्यं० ॥ केषां रात्रौ० ग. ' ॥

द्वितीयः परिच्छेदः ।

प्रतिलोमानुलोमाभ्यां यदि स्यादुत्तरद्वयम् ।
[1]प्रश्नयोरुभयोः प्राहुस्तद् द्विरूपोत्तरं बुधाः ॥ १ ॥

अथ प्रतिलोमानुलोमाख्यं चित्रम् । तद् द्विरूपोत्तरम् एकरूपोत्तरं चेति द्विविधम् । तत्र प्रथमं द्विरूपोत्तरलक्षणमाह– प्रतिलोमेति । उभयोः प्रश्नयोः प्रतिलोमानुलोमाभ्यामुत्तरद्वयं स्याद् यदि तद् बुधा द्विरूपोत्तरमाहुः ॥

वर्णैर्द्वित्रिचतुःपञ्चषट्सप्तक्रमसंयुतैः ।
[2]ग्रथ्यन्ते ह्युत्तराणीह पञ्चश्लोकैः पृथक् पृथक् ॥ २ ॥

कतिभिरक्षरैरुत्तराणि ग्रथ्यन्ते तानि च कतीत्याकाङ्क्षायामाह— **वर्णै**रिति । द्वित्रिचतुःपञ्चषट्सप्तरूपक्रमसंयुतैर्वर्णैर्ग्रथितान्युत्तराणि । एकस्य वर्णस्यानुलोम्ये प्रातिलोम्ये च चमत्कारो नास्तीति तदुपेक्ष्य वर्णद्वयमारभ्य सप्तवर्णपर्यन्तं वर्णानुलोम्यप्रातिलोम्याभ्यां ग्रथ्यन्ते । तानि च द्व्यादिसङ्ख्यासु पृथक् पृथक् प्रत्येकं पञ्चसङ्ख्याकानि सम्भूय त्रिंशत्सङ्ख्याकानि भवन्ति ॥

तद्यथा—

कया विराजते रत्नं कीदृशं युवतेर्वपुः ।
प्रतिलोमानुलोमाभ्यां [3]प्रश्नयोरुत्तरे वदेत् ॥ ३ ॥

---

१. ' तद् द्विरूपोत्तरं प्राहुः प्रश्नयोरुभयोर्बुधाः । ' ख. च.

२. ' गृह्यन्ते ' च.   ३. ' प्रश्नयोरेकमुत्तरम् ' ख.

॥ रुचा, चारु ॥ १ ॥

उदाहरति— तद्यथेति । कयेति । रत्नं कया विराजत इत्येकः प्रश्नः । युवतेर्वपुः कीदृशमित्यपरः । तत्र प्रथमस्य रुचेत्युत्तरं, द्वितीयस्य तत्प्रातिलोम्येन चारु इत्युत्तरम् । अत्र 'प्रतिलोमानुलोमाभ्यां प्रश्नयोरुत्तरे वदेद्' इति त्रिंशत्सङ्ख्याकानां द्विरूपोत्तरलक्ष्यश्लोकानामिदमेवोत्तरार्धम् ॥

मध्येसमुद्रमास्ते का कमसूत दिवाकरः ।
प्रतिलोमा० ॥ ४ ॥

॥ लंका, कालं ॥ २ ॥

मध्य इति । प्रश्नौ स्पष्टौ । लंका कालं इति क्रमादुत्तरे ॥

कुत्रास्ते बन्धुभिः सार्धं भुक्तिः का बर्हिणां मुखे ।
प्रतिलोमा० ॥ ५ ॥

॥ काके, केका ॥ ३ ॥

भयाकुलः कं भजते गजाः[1] परिहरन्ति कम्[2] ।
प्रतिलोमा० ॥ ६ ॥

॥ कंपं, पंकं ॥ ४ ॥

का हेमकान्ति वहते धत्ते कं वरुणः करे ।
प्रतिलोमा० ॥ ७ ॥

---

१. 'नागाः' ख. च.   २. 'किम्' ख.

॥ शंपा, पाशं ॥ ५ ॥

केति । प्रश्नौ स्पष्टौ । उत्तरे शंपा पाशं इति ॥

अथ त्रिवर्णोत्तरम्—

आस्ते कस्मिन् मुखे शोभा चत्वार्यङ्गानि कासु च ।
प्रतिलोमा० ॥ ८ ॥

॥ सुनासे, सेनासु ॥ १ ॥

अकृत्रिमं किं कचस्य कृत्रिमं भूषणं च किम् ।
प्रतिलोमा० ॥ ९ ॥

॥ कालिमा[1], मालिका ॥ २ ॥

क कच्छजत्वं पाषाणाः सिन्धौ कस्मै कपीरिताः ।
प्रतिलोमा० ॥ १० ॥

॥ वेतसे, सेतवे ॥ ३ ॥

का स्यान्मग्ना चक्रतनुर्वेश्या कस्मै स्पृहावती ।
प्रतिलोमा० ॥ ११ ॥

॥ नेमिका, कामिने ॥ ४ ॥

केति । प्रश्नौ स्पष्टौ । उत्तरे- नेमिका, कामिने ॥

---

१. 'काळिमा माळिका । ळलयोरभेदः' ग.

भुवनं सृज्यते केन दाता कस्मै धनं दिशेत् ।
प्रतिलोमा० ॥ १२ ॥

॥ वेधसा, साधवे ॥ ५ ॥

भुवनमिति । प्रश्नौ स्पष्टौ । उत्तरे—वेधसा, साधवे ॥

अथ चतुर्वर्णोत्तरम्—

प्रवहत्युपविन्ध्यं का कुत्र देहीति भाषणम् ।
प्रतिलोमा० ॥ १३ ॥

॥ रेवानदी, दीनवारे ॥ १ ॥

प्रवहतीति । प्रश्नौ स्पष्टौ । उत्तरे- रेवानदी, दीनवारे दीनसमूहे । 'वारसङ्घातसञ्चयाः' इत्यमरः ॥

पीतासवा कीदृशी स्याद् रामः किमिषुणाभिनत् ।
प्रतिलोमा० ॥ १४ ॥

॥ मदालसा, सालदाम ॥ २ ॥

अथ चतुर्वर्णोत्तरम्- पीतासवेति । प्रश्नौ स्पष्टौ । उत्तरे मदालसा, सालदाम ॥

अहारि केन भूभारो भूयते कीदृशा स्त्रिया ।
प्रतिलोमा० ॥ १५ ॥

॥ यादवेन, नवेदया ॥ ३ ॥

अहारीति । प्रश्नौ स्पष्टौ । उत्तरे– यादवेन कृष्णेन । नवदेया वेदरहितया ॥

[1]के काननस्य सम्बुद्धी सम्बुद्धिः का च वाग्मिनः ।
प्रतिलोमा० ॥ १६ ॥

॥ दव दाव, वदावद ॥ ४ ॥

के इति । काननस्य वनस्य के सम्बुद्धी । अन्यः प्रश्नः स्पष्टः । दव, दाव इत्येते वनसम्बुद्धी । वदावद इति द्वितीयमुत्तरम् ॥

जिता कया वनच्छाया राजपुत्री च कीदृशी ।
प्रतिलोमा० ॥ १७ ॥

॥ [2]काळीभासा, साभाळीका ॥ ५ ॥

जितेति । प्रश्नौ स्पष्टौ । उत्तरे– काळीभासा, साभाळीका ।

अथ पञ्चवर्णोत्तरम्—

[3]कस्मिन् सति वनी कीदृक् स्यात् कृतं केन भारतम् ।
प्रतिलोमा० ॥ १८ ॥

॥ न सेव्या दवे, वेदव्यासेन ॥ १ ॥

अथ पञ्चवर्णोत्तरम्– कस्मिन्निति । प्रश्नौ स्पष्टौ । उत्तरे न सेव्या दवे, दवे वनाग्नौ सति । ‘ दवदावौ वनानलौ ’ इत्यमरः । वेदव्यासेनेत्यपरम् ॥

---

१. ‘ का काननाग्नेः सम्बुद्धिः ’ ख, च.

२. ‘ काळिभासा, साभाळिका ’ ग च. ‘ काळभासा, साभाळका ’ ख.

३. ‘ कस्मिन्स्थिते वनी ’ च.

[1]चरतीन्दुः कीदृशे खे कीदृग् भृत्यावली [2]प्रभौ ।
प्रतिलोमा० ॥ १९ ॥

॥ तारनिवासे, सेवानिरता ॥ २ ॥

चरतीति । प्रश्नौ स्पष्टौ । उत्तरे– तारनिवासे, सेवानिरता ॥

अबाणः किं वदेद् धन्वी कीदृग् गाधिजधीरभृत् ।
प्रतिलोमा० ॥ २० ॥

॥ [3]नालीका न मे, मेनकालीना ॥ ३ ॥

अबाण इति । प्रश्नौ स्पष्टौ । उत्तरे– नालीका न मे, मेनकालीना ॥

सुरभिः का भर्जि[4]र्तालीन रागः कासु कामिनाम् ।
प्रतिलोमा० ॥ २१ ॥

॥ सुकाळशाका, काशाळकासु ॥ ४ ॥

(सुरभिः)केति । प्रश्नौ स्पष्टौ । उत्तरे– सुकाळशाका, काशाळकासु ॥

वनीषु कीदृक्षु मृगाः कीदृग् गन्धर्वसंहतिः ।
प्रतिलोमा० ॥ २२ ॥

॥ सारनगासु, सुगानरसा ॥ ५ ॥

वनीष्विति । प्रश्नौ स्पष्टौ । उत्तरे– सारनगासु, सुगानरसा ॥

---

१. 'विशतीन्दुः' ख. च. २. 'बभौ' ख. ग.
३. 'नाळीका न मे, मेनकाळीना । ळळयोरभेदः' ग.
४. 'तालिः' ख. च.

अथ षड्वर्णोत्तरम्—

कीदृश्यौ मधुमत्यास्थ्नोः सम्बुद्धी कीदृशी सिता ।
प्रतिलोमा० ॥ २३ ॥

॥ सारघ नरास्थि, स्थिरानघरसा ॥ १ ॥

अथ षड्वर्णोत्तरम्— कीदृश्याविति । प्रश्नौ स्पष्टौ । उत्तरे— सारघ नरास्थि, स्थिरानघरसा ॥

का कीदृक् कं ज्ञापयितुं निशि का रावणालये ।
प्रतिलोमा० ॥ २४ ॥

॥ तारकालं कालं, लंकालंकारता ॥ २ ॥

केति । निशि कं ज्ञापयितुं का कीदृग् भवतीत्येकः प्रश्नः । रावणालये केत्यन्यः । तारकालं कालमित्येकमुत्तरम् । अश्विन्यादितारका कालं ज्ञापयितुमलम् । उच्चस्थतारकादर्शनेन कालज्ञानं भवति । लंकालंकारता इत्यन्यत् ॥

धारागृहार्यसम्बुद्धी के कीदृक् का हरेः प्रिया ।
प्रतिलोमा० ॥ २५ ॥

॥ धारागारानघ, घनरागा राधा ॥ ३ ॥

धारेति । धारागृहस्य आर्यस्य च सम्बुद्धी के इत्येकः प्रश्नः । तत्र धारागार अनघ इत्येकमुत्तरम् । घनरागा राधेत्यपरमुत्तरम् ॥

वनस्त्रियोः के सम्बुद्धी के स्तुतखनवाग्मिनोः ।
प्रतिलोमा० ॥ २६ ॥

॥ दव, बरतनु । नुतरव वद ॥ ४ ॥

वनेति । वनस्य स्त्रियाश्च सम्बुद्धी के इत्येकः प्रश्नः । स्तुतध्वनेः वाग्मिनश्च के सम्बुद्धी । दव बरतनु इत्येकमुत्तरम् । नुतरव वदेत्यपरम् ॥

गौणी का तार्क्ष्यसम्बुद्धिः कीदृक् सुभटमण्डलम् ।
प्रतिलोमा० ॥ २७ ॥

॥ जिताहिसाहस, सहसाहिताजि ॥ ५ ॥

गौणीति । गुणादागता तार्क्ष्यसम्बुद्धिः का इत्येकः प्रश्नः । अन्यः स्पष्टः । तत्र जिताहिसाहसेत्येकमुत्तरम् । सहसाहिताजि इत्यन्यत् ॥

अथ सप्तवर्णोत्तरम्—

कृष्णपक्षनिशा कीदृक् कीदृग् युवतिसंहतिः ।
प्रतिलोमा० ॥ २८ ॥

॥ तारनिवहरामा, माराहवनिरता ॥ १ ॥

अथ सप्तवर्णोत्तरम्– कृष्णेति । प्रश्नौ स्पष्टौ । उत्तरे– तारनिवहरामा, माराहवनिरता ॥

मुखपूर्णेन्दुभिः [1]स्त्रैणे का स्यात् का कीदृशी भवेत् ।
प्रतिलोमा० ॥ २९ ॥

॥ राकाजालाकारता, तारका लाजाकारा ॥ २ ॥

मुखेति । मुखपूर्णेन्दुभिः स्त्रैणे स्त्रीसमूहे का स्यादित्येकः प्रश्नः ।

---

१. 'स्त्रीणां' ख. च.

का कीदृशी स्यादित्यन्यः । उत्तरे— राकाजालाकारता इत्येकमुत्तरम् । तारका जालाकारा इत्यन्यः ॥

गौणी का ग्रीष्मसम्बुद्धिः कीदृशं विफलं[1] वनम् ।
प्रतिलोमा० ॥ ३० ॥

॥ पिकरुतदमन[2], नमदतरुकपि[3] ॥ ३ ॥

गौणीति । गुणत आगता ग्रीष्मसम्बुद्धिः का इत्येकः प्रश्नः । विफलं वनं कीदृशमित्यपरः । तयोः पिकरुतदमनेति प्रथमस्योत्तरम् । नमदतरुकपि इति द्वितीयस्योत्तरम् ॥

किं कीदृशं शरत्काले सम्बुद्धिः काल्पदन्तिनः ।
प्रतिलोमा० ॥ ३१ ॥

॥ जगदमलरवि, विरलमदगज ॥ ४ ॥

किमिति । शरत्काले किं कीदृशं भवतीत्येकः प्रश्नः । अल्पदन्तिनः पुंसः का सम्बुद्धिरिति द्वितीयः । तयोरेकस्य जगदमलरवि इत्युत्तरम् । विरलमदगजेत्यन्यदुत्तरम् ॥

कृष्णपक्षक्षपा कीदृगूर्जे राधा च कीदृशी ।
प्रतिलोमा० ॥ ३२ ॥

॥ तारकरदायामा, मायादारकरता ॥ ५ ॥

अथैकरूपोत्तरम्—

---

१. 'विपुलं' ख. २. 'मनि, निमदतरुकपि' ग.
३. 'पि ॥ अथैकरूपोत्तरम्—' ख.

प्रतिलोमानुलोमाभ्यां सरूपं चेदिहोत्तरम् ।
प्रश्नस्यैकस्य तत् प्राहुरेकरूपोत्तरं बुधाः ॥ ३३ ॥

वर्णैर्द्वित्रिचतुःपञ्चषट्सप्तक्रमसंयुतैः ।
पृथक्पृथङ् नव नव प्रोच्यन्तेऽत्रोत्तराणि हि ॥ ३४ ॥

तद्यथा —

कलयामास कं सभ्यं विराटधरणीपतिः ।
प्रतिलोमानुलोमाभ्यामेकरूपमिहोत्तरम् ॥ ३५ ॥

॥ कंकं ॥ १ ॥

अथैकरूपाख्यं चित्रं कथ्यते । तस्य लक्षणमाह— **प्रतिलोमेति** । अत्रैकमेव प्रश्नस्योत्तरं प्रतिलोमानुलोमाभ्यां सरूपं समानरूपं चेत् तच्चित्रं बुधा एकरूपोत्तरं प्राहुः । कियत्सङ्ख्याकैर्वर्णैरुत्तराणि ग्रथ्यन्ते इत्यत आह— **वर्णै-रिति** । एकवर्णरूपोत्तराणां गौर्भूरित्यादीनामानुलोम्ये प्रातिलोम्ये च एकाकारत्वे न चमत्कारः द्व्यादिसङ्ख्यानां वर्णानामानुलोम्यप्रातिलोम्ययोरेकरूपत्वे चमत्कारोऽस्तीत्युक्तं— **द्वित्रीति** । द्विसङ्ख्यामारभ्य सप्तसङ्ख्यापर्यन्तं क्रमाद् वर्धितैर्वर्णैरुत्तराणि ग्रथ्यन्ते । तानि च प्रत्येकं नवनवसङ्ख्याकानि सम्भूय चतुःपञ्चाशत्सङ्ख्याकानि । पूर्वोक्ता द्विरूपलक्ष्यश्लोका वक्ष्यमाणैकरूपोत्तर-लक्ष्यश्लोकाश्च बहिर्लापिन इति ज्ञेयम् । उदाहरति— **तद्यथेति** । वर्णद्वयात्मकान्येकरूपाणि नवोत्तराणि दर्शयति— **कलयामासेति** । विराटराजः कं सभ्यं सामाजिकं कलयामास इत्येक एव प्रश्नः । तस्योत्तरं कंकमिति । तद् आनुलोम्ये प्रातिलोम्ये चैकरूपम् । 'प्रतिलोमानुलोमाभ्यामेकरूपमिहोत्तरम्' इतीदमेव चतुःपञ्चाशल्लक्ष्यश्लोकानामुत्तरार्धम् ॥

---

१. 'च्यन्ते ह्योत्तराणि' च. २. 'कारयामास' च.

अचन्द्रिकायां शर्वर्यां कान्तरिक्षे प्रकाशते ।
प्रतिलोमा० ॥ ३६ ॥

॥ भाभा ॥ २ ।

अचन्द्रिकायामिति । अत्र एक एव प्रश्नः स्पष्टः । तस्योत्तरं भाभा भानाभाभा इत्येकरूपम् ॥

भर्तारं स्वमतिक्रम्य कान्यं पुरुषमिच्छति ।
प्रतिलोमा[1]० ॥ ३७ ॥

॥ पापा ॥ ३ ॥

भर्तारमिति । प्रश्नः स्पष्टः । उत्तरं पापा* ॥

¶दावदग्धलतागुल्मपादपं कीदृशं वनम् ।
प्रतिलोमा० ॥ ३८ ॥

॥ विवि ॥ ४ ॥

दावेति । प्रश्नः स्पष्टः । उत्तरं विवि इति$ ॥

---

१. 'मा० ॥ वीणादिकस्य' ख. च.

---

* 'पपा ॥ नीलकण्ठस्येति । प्रश्नः स्पष्टः । उत्तरं- केके इत्येकरूपम् ॥ वृद्धस्य' इति व्याख्या दृश्यते ।

¶ 'नीलकण्ठस्य' ३८ 'वृद्धस्य०' ३९ 'दावदग्ध' ४० 'कस्य०' ४१ 'वीणादिकस्य०' ४२ 'मृगस्य०' ४३ इति व्याख्यानुसारी उदाहरणक्रमः ।

$ 'इति ॥ कस्येति । जनः स्वं वस्तु कस्येदमिति पृष्टः किं वदेदिति प्रश्नः, ममेत्युत्तरम् ॥' इति व्याख्यया ममेत्युत्तरस्योदाहरणपद्यम् अन्यदुद्दिष्टं भाति ।

षष्ठीविभक्तावेकत्ववाचि किं पदमस्यादि ।
प्रतिलोमा० ॥ ३९ ॥

॥ मम ॥ ५ ॥

वीणादिकस्य वाद्यस्य सम्बुद्धिः क्रियते कथम् ।
प्रतिलोमा० ॥ ४० ॥

॥ तत[1] ॥ ६ ॥

वीणेति । प्रश्नः स्पष्टः । उत्तरं ततेति ॥

सम्बुद्धिः[2] कीदृशी जन्तोर्विधोरुत्सङ्गशायिनः ।
प्रतिलोमा० ॥ ४१ ॥

॥ शश ॥ ७ ॥

मृगस्येति । प्रश्नः स्पष्टः । उत्तरं– शशेति ॥

याचकं प्रति किं ब्रूयाद् वचो लुब्धः पुनः पुनः ।
प्रतिलोमा० ॥ ४२ ॥

॥ नन ॥ ८ ॥

वृद्धस्य[3] च्युतदन्तस्य का भवत्यास्यरन्ध्रतः ।
प्रतिलोमा० ॥ ४३ ॥

---

१. 'नन' च.

२. 'मृगस्य का वा सम्बुद्धिर्विधोः' इति स्याद् व्याख्यानुसारी पाठः ।

३. 'वृद्धप्रच्युत' च.

॥ लाला ॥ ९ ॥

वृद्धस्येति । प्रश्नः स्पष्टः । लालेति प्रतिलोमानुलोमयोरेकरूपमुत्तरम् ।

अथ त्रिवर्णोत्तरम्—

किं कान्ताजनवक्षोजस्पर्धाबद्धादरं सदा ।
प्रतिलोमा० ॥ ४४ ॥

॥ कन्दुकम्[1] ॥ १ ॥

अथ त्रिवर्णोत्तरम् । किमिति । प्रश्नः स्पष्टः । तस्य कन्दुकमित्येकरूपमुत्तरम् ॥

किं विहारपदं देवग्रामणीरमणीमणेः[2] ।
प्रतिलोमा० ॥ ४५ ॥

॥ नन्दनम् ॥ २ ॥

किमिति । प्रश्नः स्पष्टः । उत्तरं नन्दनमिति ।

पुम्भावविभ्रमे कीदृग् भवेदम्भोजलोचना ।
प्रतिलोमा० ॥ ४६ ॥

॥ सायासा ॥ ३ ॥

पुम्भावेति । प्रश्नः स्पष्टः । उत्तरं सायासेति ॥

नभस्तलं प्रावृषि का प्रच्छादयति निर्भरम् ।
प्रतिलोमा० ॥ ४७ ॥

---

१. 'कन्तुकं' क. ख. ग. च. २. 'मणे रमणी' ख. च.

॥ कालिका ॥ ४ ॥

नभ इति । प्रश्नः स्पष्टः । उत्तरं कालिकेति ॥

किं वहन्ति नरेन्द्राणां द्वारदेशस्थिता जनाः ।
प्रतिलोमा० ॥ ४८ ॥

॥ कञ्चुकम् ॥ ५ ॥

किमिति । प्रश्नः स्पष्टः । उत्तरं कञ्चुकमिति ॥

छन्दोरूपं वहन्ती का शास्त्रार्थं वदति स्फुटम् ।
प्रतिलोमा० ॥ ४९ ॥

॥ कारिका ॥ ६ ॥

छन्द इति । प्रश्नः स्पष्टः । उत्तरं कारिकेति ॥

वात्सल्यं बिभ्रति भृशं केष्वपत्येषु मातरः ।
प्रतिलोमा० ॥ ५० ॥

॥ सुतासु ॥ ७ ॥

वात्सल्यमिति प्रश्नः स्पष्टः । उत्तरं सुतास्विति ।

कीदृशेनारविन्देन प्रीतिर्मधुलिहो भवेत् ।
प्रतिलोमा० ॥ ५१ ॥

॥ नवेन ॥ ८ ॥

---

१. 'तरां वहति सौरभ्यं धरा वर्षेण कीदृशा' ख. च.

कीदृशेनेति । प्रश्नः स्पष्टः । उत्तरं नवेनेति ।

कङ्कणाब्जाक्षिकलशीहेम्नां सम्बुद्धयः कथम् ।
प्रतिलोमा० ॥ ५२ ॥

॥ कटक, नळिन जलज, नयन, करक, कनक ॥ १ ॥

कङ्कणेति । प्रश्नः स्पष्टः । उत्तरं कट(कमिति[1]केत्यादि ।)

अथ चतुर्वर्णोत्तरम्—

विरहार्तिविनिद्राणां कीदृशी रजनी भवेत् ।
प्रतिलोमा० ॥ ५३ ॥

॥ मासस मा ॥ १ ॥

अथ प्रतिलोमानुलोमचतुर्वर्णोत्तरम् । विरहार्तीति । प्रश्नः स्पष्टः । उत्तरं माससमेति । एतत्प्रातिलोम्येऽपि माससमेत्येकरूपम् ॥

पृच्छन्तीं किं वदेच्छम्भुर्हेमाद्रिः[2] कोऽयमित्युमाम् ।
प्रतिलोमा० ॥ ५४ ॥

॥ मेरुरुमे ॥ २ ॥

पृच्छन्तीमिति । प्रश्नः स्पष्टः । उत्तरं मेरुरुमे इति ॥

हरिः कुत्रेति पृष्टस्तत्पार्श्वस्थः किं वदेज्जनः ।
प्रतिलोमा० ॥ ५५ ॥

---

१. 'क, जळज, ख. च २. 'हैमाद्रिः' च.

॥ हरिरिह ॥ ३ ॥

हरिरिति । प्रश्नः स्पष्टः । उत्तरं हरिरिहेति ॥

फलितैः पादपैर्युक्तं काननं कीदृशं भवेत् ।
प्रतिलोमा० ॥ ५६ ॥

॥ विततवि ॥ ४ ॥

फलितैरिति । प्रश्नः स्पष्टः । उत्तरं विततवि इति ॥

सम्बुद्धिः का च देशस्य नूतनारण्यशालिनः ।
प्रतिलोमा० ॥ ५७ ॥

॥ नववन ॥ ५ ॥

सम्बुद्धिरिति । प्रश्नः स्पष्टः । उत्तरं नववनेति ॥

कुन्तिभोजस्य[1] कन्यायां भीमं कोऽजनयत् पुरा ।
प्रतिलोमा० ॥ ५८ ॥

॥ वायुयुवा ॥ ६ ॥

कुन्तिभोजस्येति । प्रश्नः स्पष्टः । उत्तरं वायुयुवेति ॥

कीदृशा भिषजा क्षिप्रं सन्निपातो निवार्यते ।
प्रतिलोमा० ॥ ५९ ॥

॥ जायुयुजा ॥ ७ ॥

---

१. ‘ कुन्तीभोजस्य ’ च

कीदृशेति । प्रश्नः स्पष्टः । उत्तरं जायुयुजेति । जायुमौषधं युङ्क्ते प्रयुङ्क्ते इति जायुयुक् । तेन रोगः क्षिप्रं निवार्यते ॥

यौवतं युवभिः कीदृग् भवेत् तन्न्यस्तदृष्टिभिः ।
प्रतिलोमा० ॥ ६० ॥

॥ नुततनु ॥ ८ ॥

यौवतमिति । प्रश्नः स्पष्टः । उत्तरं नुततनु इति ॥

कीदृशी प्रेमसम्पत्तिर्नन्दगोपव्रजे हरेः ।
प्रतिलोमा० ॥ ६१ ॥

॥ राधाधारा ॥ ९ ॥

कीदृशीति । प्रश्नः स्पष्टः । उत्तरं राधाधारेति ॥

कळं कूजन्[1] कथं लोकैः कळकण्ठः प्रशस्यते ।
प्रतिलोमा० ॥ ६२ ॥

॥ वररव ॥ १० ॥

अथ पञ्चवर्णोत्तरम्[2]—

नूतनतारुण्यसहिते सम्बुद्धिः क्रियते कथम् ।
प्रतिलोमा० ॥ ६३ ॥

॥ नवयौवन ॥ १ ॥

---

१. 'गर्जन्' ख. च.   २. 'रम्— यथा नूत' ख.

नूत्नेति । नूतनतारुण्यसहिते पुरुष इत्यर्थः । सम्बुद्धिः कथं क्रियत इति प्रश्नः । नवयौवन इति अनुलोमप्रतिलोमयोरेकरूपं पञ्चवर्णात्मकमुत्तरम् ॥

काहळीनां विरावे का वर्ततेऽम्बरचुम्बिनि ।
प्रतिलोमा० ॥ ६४ ॥

॥ तारतारता ॥ २ ॥

काहळीनामिति । प्रश्नः स्पष्टः । उत्तरं तारतारतेति । अतिशयेन तारस्तारतारः तत्त्वम् ॥

मदान्धसिन्धुरघंटा[1] कीदृशी स्याद्दळि[2]व्रजे ।
प्रतिलोमा० ॥ ६५ ॥

॥ दानपानदा ॥ ३ ॥

मदान्धेति । प्रश्नः स्पष्टः । उत्तरं दानपानदेति ॥

उपक्रमे रतेः कीदृक् कान्तदृक् सुतनौ भवेत् ।
प्रतिलोमा० ॥ ६६ ॥

॥ नीविधाविनी ॥ ४ ॥

उपक्रम इति । प्रश्नः स्पष्टः । उत्तरं नीविधाविनीति ॥

श्रेणिका चञ्चरीकाणां कासारे कीदृशी भवेत् ।
प्रतिलोमा० ॥ ६७ ॥

---

१. 'घटी' च.

२. 'दळी' ख. च.

॥ नाळीकाळीना ॥ ५ ॥

श्रेणिकृति । प्रश्नः स्पष्टः । उत्तरं नाळीकाळीनेति । नाळीकेष्वाळीना ॥

कीदृशीषु वनक्षोणीष्वासते मुनयः सदा ।
प्रतिलोमा० ॥ ६८ ॥

॥ सुपादपासु ॥ ६ ॥

कीदृशीष्विति । प्रश्नः स्पष्टः । उत्तरं सुपादपास्विति ॥

प्रतिकूला क्षितिरुहां कीदृशी नियतिर्भवेत् ।
प्रतिलोमा० ॥ ६९ ॥

॥ दावदावदा ॥ ७ ॥

प्रतिकूलेति । अत्र दावदावदेत्युत्तरम् । दावो वनं दावो वनाग्निः । अत्राग्निविशेषवाचिनो दावशब्दस्य तत्सामान्ये पर्यवसानं करिकळभवत् ॥

विदार्यन्ते शरीराणि प्राणिनां केन सङ्गरे ।
प्रतिलोमा० ॥ ७० ॥

॥ सायकायसा ॥ ८ ॥

विदार्यन्त इति । प्रश्नः स्पष्टः । उत्तरं– सायकायसेति । सायकस्य अयः शल्यरूपं तेन ॥

कामयन्ते स्म कं बालं निखिला व्रजयोषितः ।
प्रतिलोमा० ॥ ७१ ॥

---

१. 'भटानां' क. २. 'कनज' ख.

॥ नन्दनन्दनम्[1] ॥ ९ ॥

कामयन्त इति । प्रश्नः स्पष्टः । उत्तरं- नन्दनन्दनमिति ॥

बृंहितैर्हेषितैर्युक्ता वाहिनी कीदृशी भवेत् ।
प्रतिलोमा० ॥ ७२ ॥

॥ वाराशिरावा ॥ १० ॥

बृंहितैरिति । प्रश्नः स्पष्टः । उत्तरं- वाराशिरावेति ।

अथ षड्वर्णोत्तरम्—

कीदृशी नाटककृतिर्महाकविविनिर्मिता ।
प्रतिलोमा० ॥ ७३ ॥

॥ सारनानारसा ॥ १ ॥

अथ वर्णषट्कोत्तरम् । कीदृशीति । स्पष्टः प्रश्नः । उत्तरं—सारनानारसेति ॥

[2]निम्बवृक्षाटवीच्छन्नकामिनी कीदृशी भवेत् ।
प्रतिलोमा० ॥ ७४ ॥

॥ काळकाकाळका ॥ २ ॥

निम्बेति । निम्बद्रुमवनीच्छन्नकामिनी कीदृशीति प्रश्नः । उत्तरं—काळकाकाळका । काळाः काका एवाळका यस्याः सा तथोक्ता ॥

---

१. 'नम् कीदृशी' ङ. २. 'निम्बभूमीरुहवनी कामिनी' ङ. च

वर्षेत् कानि मधून्युक्तिमिषात् कर्णद्वये शिशुः ।
प्रतिलोमा० ॥ ७५ ॥

॥ निजाननजानि ॥ ३ ॥

वर्षेदिति । शिशुः कर्णबिले उक्तिमिषात् कीदृशानि मधूनि वर्षेदिति प्रश्नः । उत्तरं– निजाननजानि ॥

घोषभूर्नन्दगोपस्य कीदृशी कृष्णदर्शने ।
प्रतिलोमा० ॥ ७६ ॥

॥ रामाततमारा ॥ ४ ॥

घोषभूरिति । स्फुटः प्रश्नः । उत्तरं– रामाततमारेति । रामासु ततो विस्तृतः मारो यस्याः सा तथोक्ता ॥

कीदृशं दृश्यते व्योम्नि पाण्डरं विधुमण्डलम् ।
प्रतिलोमा० ॥ ७७ ॥

॥ चारुशशरुचा ॥ ५ ॥

कीदृशमिति । स्फुटः प्रश्नः । उत्तरं– चारुशशरुचा ॥

तरङ्गिणीवल्लभस्य कीदृग् वेलावनी भवेत् ।
प्रतिलोमा० ॥ ७८ ॥

---

१. ‘ कर्णेषु बालकाः ’ ङ.   २. ‘ भूपस्य ’ ख. च.

३. ‘ रुचा । विहङ्गपङ्क्त्या कीदृश्या प्राप्यन्ते निखिका दिशः । प्रतिलोमा० ॥ यानगगनया ॥ जनानां० ’ ङ.

॥ तालततलता ॥ ६ ॥

तरङ्गिणीति । प्रश्नः स्फुटः । उत्तरं– तालततलता ॥

जनानां कास्वसह्यत्वं राजन्वद्[1]देशवर्तिनाम् ।
प्रतिलोमा० ॥ ७९ ॥

॥ सुराजजरासु ॥ ७ ॥

जनानामिति । स्फुटः प्रश्नः । उत्तरं– सुराजजरासु ॥

मृतमद्यपदेशस्य सम्बुद्धिः क्रियते कथम् ।
प्रतिलोमा० ॥ ८० ॥

॥ परासुसु[2]राप ॥ ८ ॥

मृतेति । स्फुटः प्रश्नः । उत्तरं– परासुसुरापेति । परासुर्मृतः सुरापो यस्य स तथोक्तः ॥

उक्तवन्तं कविं पद्यं किं पृच्छेच्छुष्कतार्किकः ।
प्रतिलोमा० ॥ ८१ ॥

॥ कारिकाकारि का ॥ ९ ॥

उक्तवन्तमिति । स्फुटः प्रश्नः । उत्तरं – कारिकाकारि केति । कारिका अकारि का त्वयेत्यर्थः ॥

अथ सप्तवर्णोत्तरम्—

सम्बोध्य शम्भुं यक्षेन्द्रपुरीं पृच्छेदुमा कथम् ।

---

१. 'राजन् त्वद्देश' च

२. 'सुराप । सम्बोध्य' ङ.

प्रतिलोमा० ॥ ८२ ॥

॥ कालकाल कालका ॥ १ ॥

अथ वर्णसप्तकरचितानि नवोत्तराणि । सम्बोध्येति । उमा शम्भुं सम्बोध्य यक्षेन्द्रपुरीं कथं पृच्छादिति प्रश्नः । उत्तरं– कालकाल कालका इति । हे कालकाल का अलकेति ॥

समागते शरद्वतौ कीदृशी सरसी भवेत् ।
प्रतिलोमा० ॥ ८३ ॥

॥ सारसारसारसा ॥ २ ॥

समागत इति । स्फुटः प्रश्नः । उत्तरं— सारसारसारसेति । अतिशयेन साराः श्लाघ्याः सारसा जलपक्षिणो यस्यां सा तथोक्ता ॥

भक्तोऽनन्ते[1] शयानां किं [2]विश्वेशां देवतां वदेत् ।
प्रतिलोमा० ॥ ८४ ॥

॥ शेषे शेषेऽशेषेश ॥ ३ ॥

भक्त इति । भक्तः अ(न)न्ते शयानां विश्वेशां देवतां किं वदेदिति प्रश्नः । उत्तरं— शेषे शेषेऽशेषेश इति । फणिपतौ शेषे स्वपिषि अशेषेशे अशेषस्य ईशा अशेषेशा, अत्र सम्बुद्धिः ॥

संवर्तपवने वाति कीदृशी कीदृशी च भूः ।

---

१. 'नन्तशया' ख. च. २. 'विश्वेशं खेगतो व' ख. च,

प्रतिलोमा० ॥ ८५ ॥

॥ चला चलाचला च ॥ ४ ॥

संवर्तेति । संवर्तपवने प्रळयमारुते वाति सति भूः भूमिः कीदृशी । पुनश्च कीदृशीति प्रश्नः। (उत्तरं)- चला चलाचला च इति । चला चञ्चला । चलाचला चला अचलाः शैला यस्यां सा चलाचला । च समुच्चयार्थश्चकारः ॥

[1]कथं शिष्येभ्य आचार्यस्तपआर्जनमादिशेत् ।
प्रतिलोमा० ॥ ८६ ॥

॥ तनुतनु तनुत ॥ ५ ॥

कथमिति । आचार्यः शिष्येभ्यस्तपश्चर्यां कथं समादिशेदिति प्रश्नः । उत्तरं — तनुतनु तनुत । तनुः कृशा तनुः शरीरं यथा भवति तथा तनुत कुरुध्वम् ॥

कियत्पर्यन्तमात्मार्थे [2]काब्धिम[3]थे कलिं व्यधात् ।
प्रतिलोमा० ॥ ८७ ॥

॥ सुरासुरासुरासु ॥ ६ ॥

कियदिति । अब्धिमाथे समुद्रमथने का आत्मार्थे स्वनिमित्तं कियत्पर्यन्तं कलिं कलहं व्यधादिति प्रश्नः । उत्तरं — सुरासुरासुरासु । सुरा कर्त्री ।

---

१. ‘ कथं शिष्ये सदाचार्यः ’ ख. च., ‘ तपः कुरुध्वमित्याहुः कथं शिष्यांस्तपोधनाः । ’ ङ.   २. ‘ का पुराजनयत् कलिं ’ ङ.

३. ‘ मूले ’ ख. च.

आसुरासुरासु सुरासुराणामसुपर्यन्तम् ॥

अभ्रसीमासिताम्भोजराजिः प्रावृषि कीदृशी ।
प्रतिलोमा० ॥ ८८ ॥

॥ कालिकालिकालिका ॥ ७ ।

अभ्रसीमेति । अभ्रसीमैव असिताम्भोजराजिः नीलोत्पलश्रेणिः प्रावृषि कीदृशीति प्रश्नः। उत्तरं— कालिकालिकालिका इति । कालिकैव अलिकालिः अलिका भृङ्गाः स्वार्थे कप्रत्ययः । आलिः पङ्क्तिः यस्याः सा कालिकालिकालिका । अयं भावः– आकाशसीमनीलोत्पलराजिः मेघजालभृङ्गपङ्क्तिमतीति ॥

सम्बुद्धिशब्दौ कीदृक्षौ वर्षुकाब्दाल्पपापयोः ।
प्रतिलोमा० ॥ ८९ ॥

॥ घनाघनाघनाघ ॥ ८ ॥

सम्बुद्धिशब्दाविति । वर्षुकोऽब्दः स च अल्पं पापं यस्य स च तयोः सम्बुद्धिशब्दौ कीदृक्षाविति प्रश्नः । उत्तरं– घनाघनाघनाघ इति । घनाघन, अघनाघ अल्पपाप ॥

कुबेरार्थवयोहान्योर्नामधेये च कीदृशी ।
प्रतिलोमा० ॥ ९० ॥

॥ राजराजरा जरा[1] ॥ ९ ॥

---

१. 'दरा' ख. घ. २. 'रा ॥ दत्तच्युताक्षराद्यन्तं' ङ.

कुबेरेति । कुबेरार्थस्य कुबेरधनस्य । वयोहानिर्जरा । धातुपाठे 'जृष वयोहानावि'ति जारापर्यायत्वेन वयोहानेः पठितत्वात् । तयोर्नामधेयं कीदृशी इति प्रश्नः । उत्तरं— राजराजरा जरा इति । राजराजस्य राः ऐश्वर्यम् । जरा ॥

सरसः शरदारम्भे सम्बुद्धिः कीदृशी भवेत् ।
प्रतिलोमा० ॥ ९१ ॥

॥ नवकविकवन ॥ १० ॥

अस्योत्तरस्य प्र(श्नोत्तदिनान्त)रं च—

राजस्थानस्य सम्बुद्धिः [1]पण्डितैर्मण्डितस्य का ॥
॥ नवकविकवनं[2] ॥

[3]अथ दत्तच्युताक्षरम्—

दत्तच्युताक्षराद्यन्तं भवेत् प्रश्नोत्तरं यदि ।
दत्तच्युताक्षराद्यन्तं तद् वदन्ति मनीषिणः ॥ ९२ ॥

अथ दत्तच्युताक्षराद्यन्तम् । तल्लक्षणमाह— दत्तच्युतेति । प्रश्नोत्तरमाद्यन्तयोर्यथासंख्यं दत्तच्युताक्षरं भवेद् यदि तच्चित्रं तदाख्यं भवति । आदावक्षरदानमन्तेऽक्षरच्युतिरित्यर्थः ॥

[4]तद्यथा—

को रक्षोनिकरान्धकारतरणिर्धत्ते च का मानुषान्
सम्बुद्धिर्विदुषश्च का पृथुतरं कीदृक् तटाकोदरम् ।

---

१. 'कविभिर्मं' ग. २. 'न ॥ दत्तच्युताक्षराद्यन्तं' ख.
३. 'दत्तच्युताक्षरं यथा- दत्त' ग. ४. 'यथा' ख.

भूषां कां विदुराननस्य वनिताश्रोणिस्थली कीदृशी
नादावक्षरयुक्तिमुक्तित इह त्वाद्यन्तयोरुत्तरम् ॥ ९३ ॥

॥ रामः, धरा, बुध, साम्बु, नासां, घना ॥ १ ॥

उदाहरति—तद्यथेति । शार्दूलविक्रीडितेन लक्ष्यश्लोकेनाह– क इति । अस्मिन् श्लोकेऽक्षरद्वयात्मकमुत्तरं 'को रक्षोनिकारान्धकारतरणिः' इत्यादयः षट् प्रश्नाः राम इत्यादिषडुत्तराणि च । तेषु नादावित्युक्त्या आद्योत्तरेऽक्षरदानमक्षरच्युतिश्च नास्तीत्यर्थः । द्वितीयादिष्वस्त्येव । तत्राद्यप्रश्नस्य राम इत्युत्तरं, द्वितीयस्य धरा इत्युत्तरम् । तच्च पूर्वप्रश्नोत्तरस्य राम इति पदस्यादौ धकारदानादन्त्यस्य सविसर्गमकारस्य च्युत्या च धरा इति भवति । तृतीयोत्तरं च पूर्वप्रश्नोत्तरस्य धरेति पदस्यादौ बुवर्णदानेऽन्त्यस्य रा इति वर्णस्य च्युत्या च बुधेत्युत्तरं भवति । एवमन्येष्वप्यूह्यम् । तानि च रामः, धरा, बुध, साम्बु, नासां, घना इत्येवमाकाराणि भवन्ति ॥

को भूमीधरकन्यकासहचरः किं चामरश्रीधरं
का पूर्णेन्दुयुता तिथिर्नभसि का विद्योतते रात्रिषु ।
का सूनोर्हितमातनोति दयिते रागं विधत्से च का
नादावक्षर० ॥ ९४ ॥

॥ शंभुः, काशं, राका, तारा, माता, रामा ॥ २ ॥

क इति । अत्रापि षट् प्रश्नाः । षडुत्तराणि । तेषामक्षरद्वयात्मकता च । अत्रापि पूर्ववत् सर्वमूह्यम् । उत्तराणि— शंभुः, काशं, राका तारा, माता, रामा ॥

---

१. 'णी' च. २. 'करं' क.

आस्ते कुत्र चतुर्मुखो जनदयापात्रं भवेत् का पुनः
कीदृक् च ग्रहमण्डली क्षितिभुजां कीदृग् बलौघस्तथा ।
कीदृक् स्यात् सुतनुर्जनश्च भवति श्लक्ष्यः पुनः केन वा
नादावक्षर० ॥ ९५ ॥

॥ नाळीके, दीनाळी, सादीना, नासादी, सुनासा, वसुना ॥[१]॥

आस्ते इति । अत्रापि षट् प्रश्नाः षडुत्तराणि च । तानि वर्णत्रयात्मकानीति विशेषः । अन्यत्सर्वं पूर्ववदेव । उत्तराणि तु– नाळीके, दीनाळी, सादीना । अस्यार्थः– आदिश्चासाविनश्च आदीनः तेन सहिता ग्रहाणामादिना सूर्येण सहिता । नासादी सादिरहितः असादी स न भवतीति नासादी । ससादीत्यर्थः । सुनासा । वसुना ॥

कंसं को निजघान कौ त्रिजगतीसर्गक्षयाधायिनौ
कुत्रास्ते कृतधर्मकर्मनिवहः कासूत कात्यायनी[२] ।
कस्मिन् सद्गुणसञ्चयः फणिपतेः कास्ते फणामण्डले
नादावक्षर० ॥ ९६ ॥

॥ शौरिः, केशौ, नाके, मेना, रामे, धरा[३] ॥ ४ ॥

कंसमिति । अत्रापि सर्वं पूर्ववत् । उत्तराणि तु– शौरिः, केशौ नाके, मेना, रामे, धरा ॥

का पापं विनिहन्ति कं गिरिसुतानेतोपवीतं व्यधात्
का शत्रुक्षयकारिणी प्रविरते कस्मिंश्च कायः पतेत् ।

---

१. 'ना ॥ का पापं' ख. ग. ङ. च.

२. 'कात्यायं' क.

३. 'रा ॥ मूलं धर्म०' ख. ग. ङ. च.

कीदृग् राजचमूर्मुखस्य सहजा का वा विभूषा पुन-
नादावक्षर० ॥ ९७ ॥

॥ गङ्गा, नागं, सेना, श्वासे, साश्वा, नासा ॥ ५ ॥

केति । षट् प्रश्नाः । षडुत्तराणि वर्णद्वयात्मकानि सर्वं पूर्ववत् । उत्तराणि– गङ्गा, नागं सेना, श्वासे, साश्वा, नासा ॥

के भूमौ न चरन्ति कुत्र पटुतां[1] धत्ते विपश्चिज्जन-
स्तोयौघान् सरितां[2] तरन्ति च कया सम्पाद्यते का नृपैः ।
स्वामी कुत्र जने करोति करुणां ज्ञानी समेतः कया
नादावक्षर० ॥ ९८ ॥

॥ देवाः, वादे, नावा, सेना, दासे, मुदा ॥ ६ ॥

क इति । अत्र पूर्ववत् सर्वम् । उत्तराणि तु– देवाः, वादे, नावा, सेना, दासे, मुदा ॥

नाट्यं कुत्र नटाः क्षितौ विदधते कूपेषु किं वर्तते
को वा[3] न क्षमतेऽवसानकणिकां का वा युवप्रीतिदा ।
निर्लज्जा भुवनेषु का च रमते कस्मिन् मनो योगिनां
नादावक्षर० ॥ ९९ ॥

॥ रङ्गे, नीरं, मानी, श्यामा, वेश्या, शिवे[4] ॥ ७ ॥

नाट्यमिति । अत्रापि सर्वं पूर्ववत् । उत्तराणि तु– रङ्गे नीरं, मानी, श्यामा, वेश्या, शिवे ॥

---

१. 'वशतां धत्ते' ङ. २. 'सरितश्चरन्ति' क.
३. 'ना न' च. ४. 'वे कंसं को निजघान' इत्येतच्छ्लोकानन्तरं 'मूलं धर्मचयस्य' ख. ग. ङ. च.

मूलं धर्मचयस्य कः क्षितिभुजः कस्मै स्पृहां कुर्वते
कीदृग् व्योम चरन्ति कुत्र रजनीनाथार्कताराग णाः ।
सम्बुद्धिः सरितः कथं कृपणधीर्ब्रूयाद्वचः कीदृशं
नादावक्षर० ॥ १०० ॥

॥ वेदः, भुवे, विभु, दिवि, नदि, न न ॥ ८ ॥

मूलमिति । अत्रापि पूर्ववत् सर्वम् । उत्तराणि तु– वेदः, भुवे, विभु, दिवि, नदि, न न ॥

सञ्चारं कमलाकरे विदधते के द्यौः पुनः कीदृशी
कीदृक् चाध्वरकर्म केन च वपुः प्रच्छाद्यते देहिनः ।
सम्बुद्धिः क्रियते कथं सवसतेरापानभूः कीदृशी
नादावक्षर० ॥ १०१ ॥

॥ मरालाः, सामरा, ससाम, वाससा , सवास, सासवा ॥ ९ ॥

सञ्चारमिति । अत्र वर्णत्रयात्मकान्युत्तराणीति विशेषः । अन्यत् सर्वं पूर्ववत् । उत्तराणि तु— मरालाः, सामरा, ससाम, वाससा, सवास, सासवा ॥

का मेनादुहिता शिवस्य पदयोः कौ हंसकत्वं गतौ
श्रीः कीदृग् दिवसस्य गच्छति जनः कम्पश्च कस्मिन् सति ।
कान्ता केन विराजते मुनिजनास्तिष्ठन्ति कस्मिन् सदा
नादावक्षर० ॥ १०२ ॥

॥ गौरी, नागौ, सेना, त्रासे, नेत्रा, वने ॥ १० ॥

---

१. 'को धर्मोद्भवभूर्नराधिपतयः कस्मै' ङ.

केति । अत्रापि सर्वं पूर्ववत् । उत्तराणि तु— गौरी, नागौ, सेना, त्रासे, नेत्रा, वने ॥

अथ च्युतदत्ताक्षरम्—

पदयोः परिवृत्तिश्चेद्वर्णयोः परिवृत्तितः ।
पदार्थद्वयसाधर्म्ये च्युतदत्ताक्षरं हि तत् ॥ १०३ ॥

तद्यथा—

अनेकवर्णयुक्ताभिः शुभाभिर्गोभिरन्वितम्[1] ।
विशाललोचनोपेतं[2] वदनं भाति ते सखे ! ॥ १०४ ॥

॥ सदनं च ॥ १ ॥

अथ च्युतदत्ताक्षरं चित्रम् । तल्लक्षणमाह— पदयोरिति । वर्णयोः परिवृत्त्या पदयोः परिवृत्तिर्विनिमयश्चेत् पदार्थयोः साधर्म्ये च सति च्युतदत्ताक्षरमित्यन्वर्थसंज्ञकं चित्रं भवति । उदाहरति— यथेति । अनेकेति । अनेकवर्णयुक्ताभिः शुभाभिर्गोभिरन्विते । विशाललोचनोपेते ते के ब्रूत विपश्चितः ! ॥ इति प्रश्नः । वदनसदने इत्युत्तरम् । अत्र वर्णयोः परिवृत्तितः विनिमयेन वकारसकारयोर्व्यत्यासेन वकारस्थाने सकारस्य सकारस्थाने वकारस्य च दानाद् वदनसदनयोः पदयोः परिवृत्तिः वदनस्य सदनत्वं सदनस्य वदनत्वं च भवति । वदनसदनपदार्थयोः साधर्म्यम् । अनेकवर्णगोसहितत्वरूपं विशाललोचनोपेतत्वरूप च साधर्म्यमप्यस्ति । एकत्र अनेकवर्णयुक्ताभिः बह्वक्षरयुक्ताभिर्वाग्भिरन्वितत्वं विशालाभ्यां लोचनाभ्यामुपेतत्वम् । अन्यत्र शुक्लादिवर्णयुक्तपशुभिरन्वितत्वं विशाललोचनाभिः स्त्रीभिरुपेतत्वमिति श्लेषेण पदार्थयोः समानधर्मत्वम् ॥

---

१. 'रन्विते', २. 'चनोपेते ते के ब्रूत विपश्चितः ॥ ॥ वदनसदने ॥ वन्धु०' ङ.

बन्धुवर्गैः सनाथेन निजनाथेन सङ्गता[1] ।
विचरन्ती[2] सदारण्ये[3] हरिणी शोभतेतराम् ॥ १०५ ॥

॥ करिणी[4] च ॥ २ ॥

बन्धुवर्गैरिति । अत्र हरिणीकरिणीपदे तादृशे ॥

पुष्पेषु कलितानल्परागेण भ्रमतान्तिके ।
सहिता[5] निजकान्तेन भ्रमरी[6] भ्राजते[7] भृशम् ॥ १०६ ॥

॥ चमरी च ॥ ३ ॥

अत्र भ्रमरीचमरीपदे तादृशे । विशेषणानि साधारणत्वेनोह्यानि ॥

पुष्पितैः फलितैः स्निग्धच्छायैस्तरुभिरन्विता ।
रहिता[8] कण्टककुलै[9]र्धरणीयं विराजते ॥ १०७ ॥

॥ सरणी च ॥ ४ ॥

[पुष्पितैरिति । अत्र धरणीसरणीपदे तादृशे ॥]

---

१. 'ते', २. 'रन्त्यौ', ३. ण्ये ते के ब्रूत विपश्चितः' ङ.
४. 'हरिणीकरिण्यौ' ङ. ५. 'सङ्गते निज' ङ.
६. 'ते के ब्रूत विपश्चितः ॥ भ्रमरीचमर्यौ ॥'
७. 'राजतेऽनिशम्' ख. ८. 'ते । रहिते' ङ.
९. 'लैस्ते के ब्रूत विपश्चितः ॥ धरणीसरण्यौ ॥ विलसच्चन्द्रवदने पृथुलोत्पललोचने । नक्षत्रमालां बिभ्राणे ते के ब्रूत विपश्चितः ॥ कालिकामालिके ॥ प्रवालपद्मरागादिशोभमाने मनोहरे । सुजातरूपं वहती ते के ब्रूत विपश्चितः ॥ चरणशरणे ॥ नानागैर्मं०' ङ.

नानागममयीं मूर्तिं बिभ्राणः[1] पादसङ्कुलः ।
दृश्यते सानुमानेष बहुधातुविभूषितः ॥ १०८ ॥

॥ भानुमांश्च ५ ॥

नानागमेति । अत्र सानुमान् भानुमानितिपदे तादृशे । अत्र 'कौ तौ ब्रूत विपश्चितः' इति लक्ष्यश्लोकचतुर्थपादो वक्तव्यः ॥

[2]समुद्वहन् शरच्चन्द्रचन्द्रिका[3]विशदां रुचिम् ।
[4]गुरुत्वमनिशं बिभ्रन्नारदोऽसौ विराजते ॥ १०९ ॥

॥ पारदश्च ॥ ६ ॥

समुद्वहन्निति । अत्र नारदपारदपदे तादृशे ॥

शीतलैर्निजसंस्पर्शैर्गात्रे रोमाञ्चमावहन् ।
आमोदं किञ्च रचयंश्चन्दनोऽयं [5]विराजते ॥ ११० ॥

॥ नन्दनश्च[6] ॥ ७ ॥

[शीतलैरिति । अत्र चन्दननन्दनपदे तादृशे ॥]

आचारतपसोर्धाम सत्या पत्न्या समन्वितः ।
ब्रह्मवंशोदधिशशी वसिष्ठोऽयं प्रकाशते ॥ १११ ॥

---

१. 'णौ पदसङ्कुलौ । बहुधातुश्रिया युक्तौ तो कौ ब्रूत विपश्चितः ॥ भानुमत्सानुमन्तौ' ॥ ङ.

२. 'उद्वहन्तौ शर' ङ.

३. 'कारुचिरां रुचिम् ।' ख., काविशदं वपुः ङ.

४. 'सदा गुरुत्वं दधतौ तौ कौ ब्रूत विपश्चितः ॥ ॥ नारदपारदौ ॥ कुमार्गा० ङ.

५. 'विभासते' ख.

६. 'श्च ॥ कुमार्गा०' ग.

॥ वरिष्ठश्च[1] ॥ ८ ॥

[आचारेति । अत्र वसिष्ठवरिष्ठपदे तादृशे ॥]

कुमार्गाहितसञ्चारा[2] द्विषन्तः सुमनोगणान् ।
अजस्रं काङ्क्षितस्वास्थ्याः केऽपि तिष्ठन्ति मानवाः[3] ॥ ११२ ॥

॥ दानवाश्च ॥ ९ ॥

कुमार्गेति । अत्र मानवदानवपदे तादृशे । सर्वत्र विशेषणानि साधारणत्वेनोह्यानि ॥

इन्दीवरदलश्यामा वहन्ती पुष्पमालिकाम् ।
आमोदभारं दधती शोभते कबरी भृशम् ॥ ११३ ॥

॥ शबरी च ॥ १० ॥

[इन्दीवरेति । अत्र कबरीशबरीपदे तादृशे ॥]

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सखीजननुता यं मानितं सज्जनैः ।
चारौ तस्य कृतावजायत परिच्छेदो द्वितीयोऽद्रिजा-
कल्याणानुजतां गते [4]घनतरश्रीचित्ररत्नाकरे ॥ ११४ ॥

---

१. 'श्च ॥ इन्दीवर०' ग.

२. 'रौ सहितौ काव्यशिक्षया । अजस्रं काङ्क्षितस्वास्थ्यै कौ तौ ब्रूत विपश्चितः ॥ मानवदानवौ ॥ पुत्रं चक्र०' ङ.

३. 'दानवाः ॥ मानवाश्च ॥' ग.

४. 'शुभतर' ङ.

तृतीयः परिच्छेदः ।

अथ तृतीयः परिच्छेदः प्रारभ्यते । अथ पूर्णक्रमच्युतम्—

प्रश्नेषु[1] प्रथमं पूर्णमादिमध्यान्ततस्ततः ।
वर्णैश्च्युतैरुत्तरं[2] यत् तत्स्यात् पूर्णक्रमच्युतम् ॥ १ ॥

अत्र प्रथमद्वितीयपरिच्छेदयोर्लक्ष्यश्लोकाः सर्वेऽपि बहिर्लापिनः । अथान्तर्लापिन उच्यन्ते— अथ पूर्णक्रमच्युतम् । तल्लक्षणमाह— प्रश्ने(ष्वि)ति । अत्र चित्रे चत्वारः प्रश्नाश्चत्वार्युत्तराणि । तत्र प्रथमप्रश्नस्य पूर्णं वर्णत्रयात्मकमुत्तरम् । द्वितीयादिप्रश्नत्रयस्यादिमध्यान्तेषु च्युतवर्णं वर्णद्वयात्मकमुत्तरं भवति । पू(र्वो?र्णो)क्तमेव यथाक्रम(च्युत)मुत्तरं (यत्) तत् पूर्णक्रमच्युतमित्यन्वर्थसंज्ञकं चित्रम् ॥

तद्यथा—

सम्पत्कामाः कीदृशाः[3] का मृद्वयो मण्यश्च कीदृशाः ।
कं श्रितो युद्धकामः स्यात् सारम्भार्थैस्तुपूर्चरम्[4] ॥ २ ॥

॥ सारम्भाः, रम्भाः, साभाः[5], सारम् ॥ १ ॥

उदाहरति— यथेति । सम्पदिति । अत्र सम्पत्कामाः कीदृशा इति प्रथमप्रश्नस्य सारम्भा इत्यखण्डमुत्तरम् । मृद्वयः का इति द्वितीयप्रश्नस्य रम्भाः इति च्युतादिवर्णमुत्तरम् । मण्यः कीदृशा इत्यस्य तृतीयप्रश्नस्य साभा

---

१. ‘ षु पूर्णं प्रथममादि ’ ग. ङ.   २. ‘ रुत्तरयेत् तत् ’ क.
३. ‘ शाः स्युः का मृद्वयः कीदृशी नदी ’ क. ख. ग. च.
४. ‘ श्च त्रिपूत्तरम् ’ ख. च.   ५. ‘ साम्भाः ’ क. ख. ग. च.

इति च्युतमध्यवर्णमुत्तरम् । कं श्रितो युद्धकामः स्यादिति चतुर्थप्रश्नस्य सारमिति च्युतान्तमुत्तरम् । एवमुत्तरत्र नवसु लक्ष्यश्लोकेषु लक्षणानुगति-र्द्रष्टव्या ॥

कः श्रीमान् मूर्ध्नि को [1]दैववैपरीत्ये भवेच्च कः ।
कः कुत्र धत्ते माल्यानि तेषां नाकेश उत्तरम् ॥ ३ ॥

॥ नाकेशः, केशः, नाशः, ना के ॥ २ ॥

क इति। कः श्रीमानित्येकः प्रश्नः। मूर्ध्नि क इति द्वितीयः। दैववैप-रीत्ये को भवतीति तृतीयः। कः कुत्र माल्यानि धत्त इति चतुर्थः। तेषां नाकेश इति अखण्डादिमध्यान्तच्युतान्युत्तराणि तु— नाकेशः, केशः, नाशः । ना के इति पदद्वयात्मकं चतुर्थोत्तरम् ॥

*कीदृगब्धिरधीरं कः श्रयेत् को नाशयेद् यतिम् ।
रजनीषु नभः कीदृक् सभङ्गस्तेषु [2]तूत्तरम् ॥ ४ ॥

॥ सभङ्गः, भङ्गः, सङ्गः, सभम् ॥ ३ ॥

कीदृगिति । अत्र प्रश्नचतुष्टयस्य सभङ्ग इति पूर्वोक्तरीत्या उत्तराणि ॥

विस्तीर्णः कोऽसुहर्ता कः श्लाघ्यः को वृक्षशालिनः ।
देशस्य कीदृग् सम्बुद्धिस्तेषां सागर उत्तरम् ॥ ५ ॥

---

* इदं १० तमश्लोकतया खपाठे, 'यो वेगवान्' (७) 'विस्तीर्णः को' (५) 'कीदृग्' (४) 'किं सुखाभरणं' (६) इति च ङपाठे क्रमः ।

---

१. 'देववैप' ग. २. 'सूत्तरम्' च.

॥ सागरः, गरः, सारः, साग ॥ ४ ॥

विस्तीर्ण इति । अत्र प्रश्नचतुष्टयस्य पूर्वोक्तरीत्या उत्तराणि । सागरः, गरः, सारः, साग ॥

किं मुखाभरणं भीमः कं जघान दधाति किम्[1] ।
ग्लौः का मातुश्च सम्बुद्धिस्तेषामम्बकमुत्तरम् ॥ ६ ॥

॥ अम्बकं, बकं, अङ्कं, अम्ब ॥ ५ ॥

किमिति । अत्रापि प्रश्नचतुष्टयम् । अम्बकमित्याद्युत्तरचतुष्टयं सर्वं पूर्ववत् ॥

को वेगवान् नाट्यदेशः को वेदो भाति कीदृशः ।
[2]कं पुनर्भजते वीरस्त्वेषां सारङ्ग उत्तरम् ॥ ७ ॥

॥ सारङ्गः, रङ्गः, साङ्गः, सारम् ॥ ६ ॥

क इति । चत्वारः प्रश्नाः स्पष्टाः । तेषां सारङ्ग इत्यखण्डादिमध्यान्तच्युतान्युत्तराणि । तानि च— सारङ्गः, रङ्गः, साङ्गः, सारमिति ॥

युद्धप्रियः को दशति[3] को वा खस्य च को गुणः ।
का जलस्य च सम्बुद्धिस्तेषां नारद उत्तरम् ॥ ८ ॥

॥ नारदः, रदः, नादः, नार ॥ ७ ॥

युद्ध इति । अत्र प्रश्नचतुष्टयस्य नारद इत्याद्युत्तरचतुष्टयं च सर्वं पूर्ववत् ॥

---

१. 'किम्' ख. ङ. च.   २. 'किं पुनः श्लाघते वीरः' ङ. च
३. 'विशदः को' ख.

को भीषणो विशोके[1] को वपुराच्छादयेच्च किम् ।
का तुरङ्गस्य सम्बुद्धिस्तेषां वाहस उत्तरम् ॥ ९ ॥

॥ वाहसः, हसः, वासः, वाह ॥ ८ ॥

क इति । अत्र प्रश्नानां वाहस इति पूर्ववदुत्तराणि ॥

किं लक्ष्मीसद्म कं देवा नमन्ति द्यौश्च कं सृजेत् ।
श्रेणीसमार्थशब्दः[2] कस्तेषां राजीवमुत्तरम् ॥ १० ॥

॥ राजीवं, जीवं, रावं, राजी ॥ ९ ॥

कीदृग् जनः कर्मणासिः कीदृक् कः स्यात् कदध्वनि ।
कालपाणितलं कीदृक् तेषां पाशित उत्तरम् ॥ ११ ॥

॥ पाशितः, शितः, पातः, पाशि ॥ १० ॥

कीदृगिति । जनः कर्मणा कीदृगित्यादि प्रश्नचतुष्टयम् । पाशित इत्याद्युत्तराणि । पाशितो बद्ध इत्यखण्डमुत्तरम् । शित इति च्युतादि । पात इति च्युतमध्यम् । पाशि इति च्युतान्तम् ॥

अथ एकावृत्तम्—

एकावृत्तिर्द्विरावृत्तिर्[3]यत्रोक्तावुत्तरस्य चेत् ।
एकावृत्तं द्विरावृत्तमिति संज्ञां भजेत तत् ॥ १२ ॥

---

१. 'विशोकः को' ख. च.

२. 'समश्च कः शब्दस्तेषां' ख. च. 'समार्थः कः शब्दस्तेषां' ग. ङ.

३. 'रर्थोक्ता' ख. ङ. च.

अथैकावृत्तद्विरावृत्ताख्ये द्वे चित्रे । तयोर्लक्षणमाह– **एकावृत्तरिति** । उत्तरस्य उत्तरशब्दस्य अर्थोक्तौ अर्थकथनावसरे एकवारमावृत्तिश्चेत् तच्चित्रमेकावृत्तसंज्ञं भवेत् । प्रथमं केषाञ्चित् प्रश्नानामुत्तरत्वेन कानिचित् पदानि विभज्य अनन्तरमेकवारमावर्त्य प्रकारान्तरेण पदविभागं कृत्वा अवशिष्टानां प्रश्नानां क्रमादुत्तरेषु सम्पादितेषु एकावृत्तं भवति । अत्र द्विवारं पदविभागेऽपि आवृत्तेरेकत्वादेकावृत्तं तत् । एवं द्विरावृत्तम् । एतद् द्वयमप्यन्तर्लापि ॥

तत्र एकावृत्तं यथा—

वशा कीदृक् तनुस्तन्व्याः[1] कीदृक् का मदकारिणी[2] ।
वर्षासु कीदृशी च द्यौर्नीरदावलिभासुरा ॥ १३ ॥

॥ नीरदा, वलिभा, सुरा, नीरदावलिभासुरा ॥ १ ॥

उदाहरति । यथेति । **वशेति** । अत्र प्रश्नचतुष्टयं स्पष्टम् । नीरदावलिभासुरेत्युत्तराणि । नीरदा रदरहिता वलिभा वलिमती सुरा इति विभज्य प्रश्नत्रयोत्तराणि । नीरदावलिभासुरेत्यखण्डमन्त्यप्रश्नस्योत्तरम् ॥

कां राजा[3] पाति का हन्ति रूपं कीदृक् च पक्वणः ।
बलौघः कीदृशो राज्ञां कुञ्जराश्वकुलाकुलः ॥ १४ ॥

॥ कुं, जरा, श्वकुलाकुलः, कुञ्जराश्वकुलाकुलः ॥ २ ॥

कामिति । अत्र पूर्ववत् प्रश्नचतुष्टयम् । उत्तराणि- कुं, जरा, श्वकुलाकुलः इति प्रश्नत्रयस्य, कुञ्जराश्वकुलाकुल इत्यखण्डमन्त्यप्रश्नस्य ॥

---

१. 'त्वस्याः' च. २. 'मधुकारिणी' ख. चं.
३. 'जावति' ग.

का तमो हन्ति कं शम्भुरदहत् [1]कात्रसाधिका ।
को जेता का श्रुतीर्धत्ते भारतीशमुखावली ॥ १५ ॥

॥ भाः, रतीशम्, उखा, बली, भारतीशमुखावली ॥ ३ ॥

केति । अत्र पञ्च प्रश्नाः । भाः, रतीशम्, उखा, बली इति चतुर्णामुत्तराणि विभक्तानि । भारतीशमुखावलीत्यखण्डमन्त्यप्रश्नस्य । अत्र बवयोरभेदः ॥

[2]और्वः क्व कीदृशो व्याधः कान् प्रसूते च दुन्दुभिः ।
कीदृशो भीमसेनश्च सिन्धुराजिविहारवान् ॥ १६ ॥

॥ सिन्धुराजि, विहा, रवान्, सिन्धुराजिविहारवान् ॥ ४ ॥

और्व इति । अत्र प्रश्नचतुष्टयम् । उत्तराणि- सिन्धुराजि, विहा, रवान् इति प्रश्नत्रयस्य । सिन्धुराजिविहारवानित्यन्त्यस्य । सिन्धुरैराजिः सिन्धुराजिः सैव विहारो यस्य स तथोक्तः ॥

कः पत्री [3]का स्थिरा कार्कसम्बुद्धिः [4]कीदृशोऽर्भकः ।
कः सेव्यः कः पतिर्भैम्या वीरसेनसमुद्भवः ॥ १७ ॥

॥ विः, रसा, इन, समुत्, भवः, वीरसेनसमुद्भवः ॥ ५ ॥

क इति । अत्र षट् प्रश्नाः । तेषु विः, रसा, इन, समुत्, भवः इति पञ्चानामुत्तराणि । वीरसेनसमुद्भव इति षष्ठस्य ॥

---

१. 'काग्नि' च. २. 'ओघः क्व' च.
३. 'काचला' क. ङ. च. ४. 'कीदृगर्भकः' ङ.

छन्दोगैर्गीयते किं किं निन्द्यते कीदृशा नृपाः ।
सेनाश्च राज्ञां कीदृश्यः सामजाळ्यश्चितश्रियः ॥ १८ ॥

॥ साम, जाळ्यं, चितश्रियः, सामजाळ्यश्चिताश्रियः ॥ ६ ॥

छन्दोगैरिति । अत्र प्रश्नचतुष्टयम् । साम, जाळ्यं, चितश्रियः, इति त्रयाणाम् । सामजाळ्याश्चितश्रिय इति तुर्यस्य ॥

किं चलं यान्ति पान्थाः काः कः सृजेत् का सतां प्रिया ।
कीदृङ् मरुः किं मलिनं मानसम्पदवी रजः ॥ १९ ॥

॥ मानसं, पदवीः, अजः, मानसम्पत्, अविः, रजः ॥ ७ ॥

किमिति । अत्र षट् प्रश्नाः । तेषु मानसं, पदवीः, अजः इत्यावृत्तिं विना त्रयाणामुत्तरम् । आवर्त्य अवशिष्टत्रयस्योत्तराणि । मानसम्पत्, अविः, रजः इति ॥

किं धामेन्द्रस्य का हन्ति ध्वान्तं कस्य क्षितौ स्थितिः ।
ग्रसते चन्द्रसूर्यौ कस्तेषां स्वर्भानुरुत्तरम् ॥ २० ॥

॥ स्वः, भाः, नुः, स्वर्भानुः ॥ ८ ॥

किमिति । अत्र प्रश्नचतुष्टयम् । स्वः, भाः, नुः, इति त्रयाणां; स्वर्भानुरिति तुर्यस्योत्तरम् ॥

राज्ञां प्रिया का समदाः के प्रसूते च कान् नभः ।
भोगीन्द्रः कीदृशस्तेषामुत्तरं भूरिभारवान् ॥ २१ ॥

---

१. 'शो नृ' च. २. 'कस्तिग्मरुक् किं' ख. च.

॥ भूः, इभाः, रवान्, भूरिभारवान् ॥ ९ ॥

राज्ञामिति । अत्र प्रश्नचतुष्टयम् । तेषु भूः इभाः, रवान्, इति त्रयाणामुत्तराणि । भूरिभारवानिति तुर्यस्य ॥

सम्बुद्धिः कथमण्डजस्य निखिलैः किं प्रार्थ्यते वाससः
को वारम्भक उन्नतश्च भुवि कः किं लोलमापाण्डु किम् ।
[1]किं धत्ते वनभूर्जवं वहति कः कीदृक् पुनर्यौवतं
वेशन्तन्तुरगो मनोहरवपुस्तेषूत्तराणि क्रमात् ॥ २२ ॥

॥ वे, शं, तन्तुः, अगः, मनः, हरवपुः, वेशन्तं, तुरगः, मनोहरवपुः ॥ १० ॥

सम्बुद्धिरिति । अत्र नव प्रश्नाः । तेषामनावृत्तावेव षण्णामुत्तराणि । वे, शं, तन्तुः, अगः, मनः, हरवपुः इति । आवृत्तौ वेशन्तं, तुरगः, मनोहरवपुः इति त्रयाणामुत्तराणि ॥

अथ द्विरावृत्तम् । तद् यथा —

कीदृशस्तापसजनो वर्षाकालश्च कीदृशः ।
साधूनां च कुलं कीदृगपराग इहोत्तरम् ॥ २३ ॥

॥ अपरागः, अपरागः, अपरागः, ॥ १ ॥

इदं पुन्नपुंसकयोः साधारण्येन चमत्कारकारि ।

अथ द्विरावृत्तम् । अस्यापि लक्षणं पूर्वमेवोक्तम् । उदाहरति- यथेति ।

---

१. 'कं' ख. च.

कीदृश इति । अत्र प्रश्नत्रयम् । त्रीण्युत्तराण्यखण्डानि अपराग इति । अपगतो रागो यस्येत्यपरागः इति प्रथमप्रश्नोत्तरम् । अपरागः परागरहित इति द्वितीयस्य । अपरागः परेभ्य आगोऽपराधस्तन्न विद्यते यस्य तत्तथोक्तम्, इदं सकारान्तनपुंसकलिङ्गम् । पुन्नपुंसकसाधारण्येन अपराग इति पदस्य चमत्कारित्वम् । आवृत्तिद्वयसत्त्वाद् द्विरावृत्तमिदम् ॥

वर्षासु जलदः कीदृग् जायेत कमलं कुतः ।
कीदृक् स्याल्लुब्धगेहेऽर्थी तेषां वारित उत्तरम् ॥ २४ ॥

॥ वारितः, वारितः, वारितः ॥ २ ॥

वर्षास्विति । अत्र प्रश्नास्त्रयः । तेषामखण्डानि वारित इति त्रीण्युत्तराणि । वारितो वारित इति । अनावृत्तौ तृतीयस्योत्तरम् ॥

ओघा विशन्ति के गङ्गां कीदृशाः पटहाः पुनः ।
वर्तते किं उटाकादावुत्तरं तेषु[1] सारवाः ॥ २५ ॥

॥ सारवाः, सारवाः, सारवाः ॥ ३ ॥

ओघा इति । अत्र प्रश्नास्त्रयः । तेषां सारवाः इत्यखण्डानि त्रीण्युत्तराणि ॥

आस्थानं कीदृशं राज्ञां वदनं चापि कीदृशम् ।
कीदृशं पङ्कजकुलं सदाळिकविराजितम् ॥ २६ ॥

॥ सदाळिकविराजितं, सदाळिकविराजितं, सदाळिकविराजितम् ॥

1. 'त्रिषु' ङ.

आख्यानमिति । अत्र प्रश्नत्रयम् । सतामाळिः सदाळिः तया कविभिश्च राजितमित्यनावृत्तौ प्रथमप्रश्नस्योत्तरम् । सदाळिकेन फालेन विराजितमिति द्वितीयप्रश्नस्य प्रथमावृत्तौ । सदा अळिभिः कविभिर्जलपक्षिभिश्च विराजितमिति द्वितीयावृत्तौ तृतीयप्रश्नस्योत्तरम् ॥

का सुधीभूषिता भीरुः कीदृशः कीदृशी निशा ।
कुतो जयश्रीः सुमतिः कीदृशः स्यात् सभाजितः ॥ २६ ॥

॥ सभा, जितः । सभा, आजितः । सभाजितः ॥ ५ ॥

केति । अत्र पञ्च प्रश्नाः । तेषु (प्रथमद्वितीययोः) सभा, जितः इत्युत्तरे । पुनः प्रश्नद्वयस्य प्रथमावृत्तौ सभा भैर्नक्षत्रैः सहिता, आजितः युद्धाद् इत्युत्तरद्वयम् । द्विरावृत्तौ सभाजितः पूजितः इत्यखण्डं पञ्चमस्योत्तरम् ॥

सम्बुद्धयो ब्रह्मशम्भुपक्षिणां काः क पङ्कजम् ।
निश्चेष्टता क कुत्र श्रीरुत्तरं तेषु केशवे ॥ २८ ॥

॥ क, ईश, वे । के, शवे, केशवे ॥ ६ ॥

सम्बुद्धय इति । अत्र षट् प्रश्नाः । तत्र क, ईश, वे इत्यनावृत्तौ त्रीण्युत्तराणि । प्रथमावृत्तौ तु के, शवे इति द्वे उत्तरे । द्वितीयावृत्तौ तु केशवे इत्येकमुत्तरम् ॥

तमोपहा का कुत्रास्ते तेजः कावम्बरोदितौ ।
मधुरा साहिती कस्मिन्नुत्तरं तेषु भारवौ ॥ २९ ॥

१. ‘ कस्मिन् काव्ये भवति भारवौ ’ ख. च.

२. ‘ त्तराणीह भारवौ ’ ङ.

॥ भाः, रवौ । भारवौ । भारवौ ॥ ७ ॥

तम इति । अत्र चत्वारः प्रश्नाः । तेषु भाः, रवौ इत्यनावृत्तौ द्वयोरुत्तरम् । प्रथमावृत्तौ भं च आरवश्च भारवौ इति तृतीयप्रश्नस्य । द्वितीयावृत्तौ अपि भारवावित्यखण्डं पदम् । भारविर्नाम कश्चित् कविस्तस्मिन् ॥

मुरारेः कीदृशं चक्रं कीदृशं ग्रहमण्डलम्[1] ।
गृहस्थस्य गृहं कीदृक् सदारस्थितिभासुरम् ॥ ३० ॥

॥ सदा अरस्थितिभासुरं, सदारस्थितिभासुरं, सदारस्थितिभासुरम् ॥ ८ ॥

मुरारेरिति । अत्र प्रश्नास्त्रयः । तेषां सदा अरस्थितिभासुरम् अराणां सहस्रसंख्याकानां स्थित्या भासुरमित्यनावृत्तावेकस्योत्तरम् ; प्रथमावृत्तौ तु संश्चासावारश्च सदारः । तस्य स्थित्या भासुरमिति द्वितीयप्रश्नस्योत्तरम् । (द्वितीयावृत्तौ सदारस्थितिभासुरमित्यखण्डमेव तृतीयप्रश्नस्योत्तरम् ॥)

कामभ्यास्ते नरो वृद्धः कीदृक् कीदृक् च पर्वतः ।
कीदृशः केसरी तेषामुत्तरं[2] कुञ्जराजितः ॥ ३१ ॥

॥ कुं, जराजितः । कुञ्जराजितः । कुञ्जराजितः ॥ ९ ॥

कामिति । अत्र प्रश्नचतुष्टयम् । तेषु द्वयोः कुं, जराजितः इत्युत्तरद्वयमनावृत्तावेव । प्रथमावृत्तौ तु कुञ्जराजितः कुञ्जैः कन्दरै राजित इति तृतीयप्रश्नस्योत्तरम् । द्वितीयावृत्तावपि कुञ्जराजित इत्यखण्डमेवोत्तरम् । अर्थस्तु कुञ्जरैराजित इति चतुर्थप्रश्नस्य ॥

---

१. 'ग्राममण्डलम्' ख. च. २. 'चैषा' ङ.

लोके मायति को गुणश्च नभसः को भूभुजः पान्ति का
के वा द्रष्टुमपि क्षमा न समरं किं ग्राहसम्बोधनम् ।
शब्दो युष्मदि को बहुत्ववचनः षष्ठीविभक्तौ पुनः
षट्स्वेतेषु षडुत्तरप्रभवभूः कुम्भीरवोऽसंशयम् ॥ ३२ ॥

॥ कुम्भी, रवः । कुं, भीरवः । कुम्भीर, वः ॥ १० ॥

कुम्भीरव इति । कुम्भी रव इत्यनावृत्तौ द्वयोरुत्तरम् । प्रथमावृत्तौ कुं, भीरव इति द्वयोरुत्तरे । द्वितीयावृत्तौ कुम्भीर आह, वः इति द्वे उत्तरे ॥

अथ वचनमात्रभिन्नम्—

अभिन्नमर्थशब्दाभ्यां भिन्नं वचनमात्रतः ।
उक्तं[1] वचनभिन्नं तदुत्तरं प्रश्नयोर्द्वयोः[2] ॥ ३३ ॥

अथ वचनमात्रभिन्नम् । लक्षणमाह— अभिन्नमिति । अर्थशब्दाभ्यामर्थेन शब्देन अभिन्नमेकं, वचनमात्रतो भिन्नं प्रश्नद्वयस्य एकं तदुत्तरं तत् तन्मात्रभिन्नं वचनमात्रभिन्नमाहुः । भिन्नाख्यचित्रकथनावसरे वचनभिन्नस्योक्तत्वात् पुनस्तत्कथनमसङ्गतमिति न वाच्यम् । तत्र अलय इत्यादिपूत्तरेषु अलय इति शब्दस्याभिन्नत्वेऽपि लयरहितत्वभृङ्गत्वरूपयोरर्थयोर्भिन्नत्वात् । अत्र तु शब्दार्थयोरेकत्वादस्य पृथङ्निर्देशो युक्तः ॥

तद् यथा—

कर्मजातमलं कः के विधातुं धरणीतले ।
अनयोः कविभिर्वाच्यं प्रश्नयोरेकमुत्तरम् ॥ ३४ ॥

---

१. 'विद्युति' ग. २. 'तदुक्तं भिन्नवचनमुत्तरं' ख. च., 'तस्मादभिन्नं तत्राहुः प्रश्नयोरेकमुत्तरम् ॥' क.

॥ नरः ॥ १ ॥

उदाहरति यथेति । कर्मजातमिति । इदं बहिर्लापि । कर्मजातं सुकृतदुष्कृतादिकं कर्तुं कः अलं के वा अलम् । अत्र कः के इति पदे एकवचनबहुवचनान्ते । अलमित्युभयसाधारणमव्ययम् । तयोः प्रश्नयोर्नर इत्येकमुत्तरम् । तदेकवचनं नरशब्दे । नृशब्दे बहुवचनम् । उभयात्मकस्य तस्य मनुष्यवाचित्वेनाभिन्नार्थकत्वमेकरूपतया शब्दतश्चाभिन्नत्वम् । पृथग्वचनत्वाद्वचनमात्रभिन्नमिति लक्षणानुगतिः ॥

साम्यं वोढुमलं कः के भुवनेऽन्येन केनचित् ।
अनयोः कविभिर्वाच्यं० ॥ ३५ ॥

॥ सदृशः ॥ २ ॥

साम्यमिति । भुवने को वा के वा अन्येन साम्यं वोढुमलं समर्थः समर्थाश्च । तयोः प्रश्नयोः सदृश इत्येकमुत्तरम् । तच्चैकवचनबहुवचनसाधारणसदृशसदृक्शब्दयो रूपम् ॥

[1]पिपासुतामलं हर्तुं कानि किं वा शरीरिणाम् ।
अनयोः कविभिर्वाच्यं० ॥ ३६ ॥

॥ वारि ॥ ३ ॥

पिपासुतामिति । कानि किं वा (इति) प्रश्नौ । उत्तरमेकं वारीति । एकत्र वार्शब्दः, अन्यत्र वारिशब्दः ।

---

१. 'पिपासुना कानि किं वा पातुं शक्यं शारीरिणा ।' क.

सञ्चारमनिशं कर्तुमलं किं के नभस्तले ।
अनयोः कविभिर्वाच्यं० ॥ ३७ ॥

॥ वयः ॥ ४ ॥

सञ्चारमिति । नभस्तले सञ्चारं कर्तुं किं के अलम् । अलैकत्व-वाचिनो नपुंसकलिङ्गता बहुत्ववाचिनः पुल्लिङ्गता च वाच्या । वय इत्युत्तरं तादृशं भवति । तद् वयःशब्दविशब्दयो रूपम् ॥

कः के समुन्मूलयितुं शक्यं चण्डेन वायुना।
अनयोः कविभिर्वाच्यं० ॥ ३८ ॥

॥ भूरुहः ॥ ५ ॥

*दातुमिति । पुष्पाणि दातुं को वा अलं के वा अलमिति प्रश्नौ । तयोर्भूरुह इत्युत्तरम् । तस्य कचिदकारान्तता । हकारान्ततान्यत्र ॥

अलं कः के मदोदग्रकुम्भिकुम्भविदारणे ।
अनयोः कविभिर्वाच्यं० ॥ ३९ ॥

॥ मृगराजः ॥ ६ ॥

अलमिति । प्रश्नौ स्पष्टौ । मृगराज इत्युत्तरम् । तस्य कचिद-कारान्तता, कचिज्जकारान्तता ॥

निखिलानां जनानां के को वा कर्तुमलं प्रियम् ।
अनयोः कविभिर्वाच्यं० ॥ ४० ॥

---

* व्याख्यानुसारी पाठो मातृकासु नोपलभ्यते ।

॥ मधुरवाचः ॥ ७ ॥

निखिलानामिति । प्रश्नौ स्पष्टौ । मधुरवाच इत्युत्तरम् । तच्च क्वचिदकारान्तं क्वचिच्चकारान्तम् ॥

धर्माधर्मावलं ज्ञातुं कः के वा जगतीतले ।
अनयोः कविभिर्वाच्यं० ॥ ४१ ॥

॥ द्विपादः ॥ ८ ॥

धर्माधर्माविति । कः के वा धर्माधर्मौ ज्ञातुमलम् । अत्र प्रश्नद्वये द्विपाद इत्युत्तरम् । तच्च एकत्र अकारान्तमन्यत्र दकारान्तम् ॥

शास्त्रार्थमखिलं ज्ञातुं को वा के वा जगत्यलम् ।
अनयोः कविभिर्वाच्यं० ॥ ४२ ॥

॥ बुधः ॥ ९ ॥

शास्त्रार्थमिति । शास्त्रार्थं ज्ञातुं कः के वा अलमिति प्रश्नौ । तयोः उत्तरं बुध इति । तच्चैकत्राकारान्तमन्यत्र धकारान्तम् ॥

गन्तुं झटिति पन्थानं नालं कः के महीतले ।
अनयोः कविभिर्वाच्यं० ॥ ४३ ॥

॥ [2]खञ्जः ॥ १० ॥

---

१. ' को वा के वा महीतले ' ख. ' कः के वालं धरातले ' क.

२. ' सजरसः, सजरसः ॥ १० ॥
कः के वा कबळीकर्तुमलं भीमान् भुजङ्गमान् ।
अनयोः कविभिर्वाच्यं प्रश्नयोरेकमुत्तरम् ॥
बर्हिणः, बर्हिणः ॥ ११ ॥ अथ क्रिया ' च

गन्तुमिति । कः के वा पन्थानं झटिति गन्तुं नार्हमिति प्रश्नौ । तत्र खञ्ज इत्युत्तरम् । एकत्र अकारान्तमन्यत्र जकारान्तम् ॥

अथ क्रियाकर्त्रादिगुप्तम्—

[1]पदबन्धनसामर्थ्यादस्फुटं यत्र वर्तते ।
[2]क्रियाकर्त्रादि तत्प्राहुः क्रियागुप्तादिकं बुधाः ॥ ४४ ॥

अथ क्रियाकर्त्रादिगुप्तम् । तल्लक्षणमाह– पदेति । पदबन्धनसामर्थ्यात् क्रियाकर्त्रादिकं यत्रास्फुटं वर्तते तद् बुधाः क्रियाकर्त्रादिगुप्तं वदन्ति । क्रियागुप्तौ क्रियागुप्तम् । कर्तृगुप्तौ कर्तृगुप्तम् । एवं कर्मादिकारकगुप्तिषु । इदमन्तर्लापि ॥

तद्यथा—

अस्य लोकस्य विपदं[3] रणे हत्वा दशाननम् ।
इति सम्प्रार्थितो देवैर्भगवान् मधुसूदनः ॥ ४५ ॥

॥ अत्रास्येति क्रिया गुप्ता ॥ १ ॥

यथेति । अस्येति । रणे दशाननं हत्वा लोकस्य (विपदं) अस्य क्षिप । अस्येति 'असु क्षेपणे' इति धातोर्लोटि मध्यमपुरुषैकवचनम् । इति देवैर्मधुसूदनः सम्प्रार्थितः । अत्र लोकस्येति पदस्य सन्निधानादस्येति पदमिदंशब्दभ्रमं विदधाति । तस्मादिदं क्रियागुप्तम ॥

पुरारण्यं सदाव यत् तद् दग्धमधुना क्षणात् ।
इति व्याहृतवानिन्द्रो दृष्ट्वा [4]लुष्टं तु खाण्डवम् ॥ ४६ ॥

---

१. 'पदं बन्धन' च. २. 'क्रियादिकं तद्वदन्ति क्रिया' ङ.
३. 'दो रणे' ख. ४. 'नष्टं' ख.

॥ सदा आवमिति क्रिया गुप्ता ॥ २ ॥

पुरेति । इन्द्रः खाण्डवं प्लुष्टं दृष्ट्वा पुरा यदरण्यं सदा आवम् अपालयं तदधुना क्षणाद् दग्धमिति व्याहृतवान् । अत्र सदावमिति शब्दः दाव-साहित्यभ्रमं विदधाति । तस्मादिदमपि क्रियागुप्तम् ॥

अथ क्रियाकर्तृगुप्तम्[1]—

दशकण्ठे विनिहते हरीणां रक्षसामपि ।
प्रहर्षेण स्तुतो राजा वृषभं रघुभूभुजाम् ॥ ४७ ॥

॥ अत्र स्तुत इति क्रिया गुप्ता । हरीणां रक्षसामपि राजाविति कर्तृगुप्तौ ऋषभमित्युत्तरपदं[2] भवति ॥ ३ ॥

अथ क्रियाकर्तृगुप्तम् । दशकण्ठ इति । दशकण्ठे विनिहते हरीणां रक्षसामपि राजौ । राट्शब्दे प्रथमाद्विवचनम् । हर्षेण रघुभूभुजामृषभं रामं स्तुतः । 'ष्टुञ् स्तुतौ' इति धातोः लटि प्रथमपुरुषद्विवचनम् । राजौ ऋषभमित्यत्र जकारात्परस्यौकारस्य "एचोऽयवायावः" (पा० सू० ६–१–७८) इत्यावादेशो जायेत । तस्मात् स्तुत इति क्रियाया राजाविति कर्त्रोश्चास्फुट-त्वात् क्रियाकर्तृगुप्तमिदम् ॥

अथ क्रियाकर्मगुप्तम्—

चित्रं तमःसमूहं त्वं बिभ्राणो मेचकच्छविम् ।
महिषव्यूहकपटाद् भानोरग्रे सरोऽरुणः ॥ ४८ ॥

॥ अत्र सर इति कर्मगुप्तिः । अरुण इति क्रियागुप्तिः ॥ ४ ॥

---

१. 'गुप्तम् ऋष' च. २. 'पदम् ॥ ३ ॥' ख. च.

चित्रमिति । हे तमःसमूह ! मेचकच्छविं बिभ्राणस्त्वं महिषव्यूह-कपटाद् भानोरग्रे पुरः सरः कासारम् अरुणो निरुद्धवान् । चित्रम् । अत्र कर्मत्ववाचिनः सर इति पदस्य अग्रे इति पदसंबन्धादग्रेसर इत्येव प्रतीतिः स्यात् । अरुण इति पदस्यापि सूरसूतवाचकत्वबुद्धिः स्यात् । अत इदं क्रिया-कर्मगुप्तम् ॥

अथ कर्तृमात्रगुप्तम्[1]—

सम्प्रापितायां शुभ्रत्वं सभायां नारदत्विषा ।
उवाच वाच मधुरां हर्षयन्[2] निखिलान् जनान् ॥ ४९ ॥

॥ अत्र नेति कर्तृगुप्तिः ॥ ५ ॥

सम्प्रापितायामिति । ना मनुष्यः रदत्विषा दन्तकान्त्या सभायां शुभ्रत्वं सम्प्रापितायां सत्यां निखिलान् जनान् हर्षयन् मधुरां वाचमुवाच । अत्र नेति कर्तुरस्फुटत्वात् कर्तृगुप्तम् ।

अथ कर्ममात्रगुप्तिः—

सन्ततं भूधरभुवो देवो रक्षतु माधवः ।
स्वभक्तानल्पसङ्कल्पकल्पनाकल्पपादपः ॥ ५० ॥

॥ अत्र मा इति कर्मगुप्तिः[3] ॥ ६ ॥

अथ कर्मगुप्तम् । सन्ततमिति । भूधरभुवो धवः पतिः शिवः मा मां रक्षतु । अत्र मा इति कर्मणः अस्फुटत्वात् कर्मगुप्तम् ॥

---

१. 'गुप्तिः' ख २. 'यन्नखि' ख. ग. ङ. च.
३. 'गुप्तम्' ङ.

(अथ करणगुप्तिः—)

कास्ते विरचितप्रीतिर्[1]मधुकैटभसूदनः ।
भोगीन्द्रभोग[2]पर्यङ्के शयानः सहितः श्रिया ॥ ५१ ॥

॥ अत्र केति करणगुप्तिः ॥ ७ ॥

केति । का भुवा विरचितप्रीतिः । अन्यत्सर्वं स्पष्टम् । अत्र केति शब्दस्याधिकरणार्थत्वमेव प्रतीयेत नान्यत् । तस्मादिदं करणगुप्तम् ॥

अथ सम्प्रदानगुप्तिः—

[3]अर्थान् बहिश्चरान् प्राणान् को वास्मिन् जगतीतले ।
मधुपात्रे प्रदिशति [4]प्राप्तुमिच्छन् परां गतिम् ॥ ५२ ॥

॥ अत्र मधुपात्रे इति संप्रदानगुप्तिः ॥ ८ ॥

अर्थानिति । अत्र मधुपात्रे इति पदमधिकरणत्वभ्रमकरम् । अतः सम्प्रदानगुप्तम् ॥

राज्ञां कुलं मदश्रान्तं बिभीयाद[5]पि वीर्यवत् ।
कियान् कीचक इत्यार्तां भीमोऽभाषत पार्षतीम् ॥ ५३ ॥

॥ मदित्यपादानगुप्तिरत्र ॥ ९ ॥

राज्ञामिति । अत्र मदश्रान्तं मत् अश्रान्तमनिशम् । मदिति पदमसच्छब्दे पञ्चम्येकवचनम् । तस्यास्फुटत्वादपादानगुप्तम् ॥

---

१. 'तिः मागरे कमलेक्षणः' क. २. 'गशयने शयानः' ग.
३. "स्वहस्तापचितं रागात् प्रसूनं कल्पशाखिनः ।
कैलासोपवने प्राद्रात् पार्वत्या ईप्सितं शिवः" ॥
॥ अत्र पार्वत्या इति संप्रदानगुप्तिः ॥ ८ ॥ क. ग.
४. 'प्रार्थयन्नुत्तमां गतिम् ॥' क. ५. 'दधुनापि यत् ।' ख. घ.

निर्धूतहुतभुग्दीप्तिर्भानुः सम्प्रति दृश्यते ।
हासपात्रीकृतोदारतप्तचामीकरच्छविः ॥ ५४ ॥

॥ अत्र नुरिति संबन्धगुप्तिः ॥ १० ॥

निर्धूतेति । अत्र भाः नुः मनुष्यस्य द्युतिरित्यर्थः । भानुरित्येव प्रतीतिः स्यादतः संबन्धगुप्तिः ॥

या [2]मन्दराद्रिमथितादुद्भूत क्षीर[3]सागरात् ।
एतया क्रियतेऽजस्रं स्थितिर्गाढानुरागया ॥ [1]५५ ॥

॥ अत्र ए इत्यधिकरणगुप्तिः ॥ ११ ॥

येति । अत्र ए विष्णौ तया इति पदविभागः । अत्रैतच्छब्द-प्रतीतिः स्यादतोऽधिकरणगुप्तम् ॥

पुत्रं चक्रकवि गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
[4]चारुस्तस्य कृतावजायत परिच्छेदस्तृतीयो [5]मही-
कन्योद्वाहसहोदरे [6]घनतरश्रीचित्ररत्नाकरे[7] ॥ ५६ ॥

इति चित्ररत्नाकरे तृतीयपरिच्छेदः समाप्तः ॥

---

१. ‘ स्थितिः सानुराभाति सन्ततम् । ’ ख. २. ‘-मन्थरा ’ ख. च.
३. ‘ रत्नाकरधेः । ’ ङ. ४. ‘ चारौ तस्य ’ ङ.
५. ‘ महा ’ ख. च. ६. ‘ घनरसे श्री ’ ग.
७. ‘ रे ॥ कृतौ चक्रकवेः सूनोरात्मा श्रीलोकनाथयोः ।
तृतीयोऽभूत् परिच्छेदश्चित्ररत्नाकरे वरे ॥
इति तृतीयः परिच्छेदः । ’ ङ.

चतुर्थः परिच्छेदः ।

अथ अक्षरच्युतकम्—

*अर्थेनाच्युतवर्णस्य च्युतवर्णपदस्य चेत् ।
अर्थस्य चारु साधर्म्यमक्षरच्युतकं हि तत् ॥ १ ॥

साकमच्युतवर्णेन साधर्म्यं कथितं यदि ।
च्युतवर्णस्य तत् प्राहुरक्षरच्युतकं बुधाः ॥ २ ॥

बिन्दुमात्राव्यञ्जनानां च्युतौ लक्षणमुन्नयेत् ।
एवमच्युतबिन्द्वाद्यैस्तेषां[1] साधर्म्यमीर्यते[2] ॥ ३ ॥

अथाक्षरच्युतकम् । तल्लक्षणमाह– अर्थेनेति । अत्र च्युतवर्णस्य पदस्येत्यर्थः । अर्थेन च्युतवर्णपदस्य सम्बन्धिनोऽर्थस्य चारु साधर्म्यमस्ति चेत् तदक्षरच्युतकम् । बिन्दुमात्राव्यञ्जनानां च्युतौ लक्षणमेवमेवोन्नयेत् । अच्युतबिन्दुना च्युतबिन्दुकस्य अच्युतमात्रेण च्युतमात्रस्य (अ)च्युतव्यञ्जनेन च्युतव्यञ्जनस्य साधर्म्ये तत्तत्संज्ञका भवन्तीत्यर्थः । अत्र चित्रचतुष्टये लक्ष्यश्लोकास्तु केवलं नान्तर्लापिनः, न च केवलं बहिर्लापिनः तस्मादुभयरूपा इति द्रष्टव्यम ॥

तत्राक्षरच्युतकं यथा—

---

* क. ख. ग. घ. च. पाठेषु पद्यमिदं नास्ति

---

१. 'तेषामच्युतबिन्द्वाद्यैरर्थसाधर्म्यमस्ति चेत्' ङ.
२. 'मीरितम्' ख. ग.

अधिष्ठितं द्विजकुलैः[1] शाखिभिः शिखिभिर्लसत् ।
सुमनोनिवहामोदं पुष्यत्[2] तद् भासते वनम् ॥ ४ ॥

॥ सवनं च ॥ १ ॥

अक्षरच्युतकमुदाहरति– अधिष्ठितमिति । अत्र वनमिति च्युताक्षरं सवनमित्यच्युताक्षरं तयोरेकं श्लोकस्यान्तर्वर्तते । अन्यत्तु श्लोकाद् बहिः । तयोर्द्विजकुलैरधिष्ठितमित्यादिश्लिष्टविशेषणैः साधर्म्यमवगन्तव्यम् । एवं नवसु लक्ष्यश्लोकेषु लक्षणमुन्नेयम् । अत्र परिच्छेदे अक्षरच्युतकादीनां चित्राणां प्रश्नोत्तरात्मकत्वं नास्ति ॥

दधदुद्दामसौरभ्यप्रफुल्लकमलोत्करम् ।
हंसश्रियं तथा बिभ्रदधिकं भासते सरः ॥ ५ ॥

॥ वासरश्च । अत्र दधद् बिभ्रदिति पदयोः पुन्नपुंसकसाधा-रण्येन चमत्कारः[4] ॥ २ ॥

दधदिति । अत्र सर इति च्युतवर्णं वासर इत्यच्युतवर्णं, पुंनपुंसकलिङ्गम् । ताभ्यामुभयसाधारणयोरन्वयश्चमत्कारकारी ॥

मृगैः खगैर्नगैर्नागैर्युक्तं च नरवानरैः ।
सरित्सरोद्रिसहितं वनमेतत् प्रकाशते ॥ ६ ॥

॥ भुवनं च ॥ ३ ॥

---

१. ‘ गणैः ’ ग. २. ‘ पुष्णत् ’ च.
३. ‘ पदद्वयं पुन्न ’ ङ. ४. ‘ चमत्कृतिः ’ ख, ‘ चमत्कारकारि ’ ङ.

मृगैरिति । अत्र वनं च्युतवर्णं भुवनमच्युतवर्णम् । अन्यत् पूर्ववत् ॥

प्राणिहिंसापरो[1] बिभ्रद् वाञ्छां रुधिरभोजने ।
धत्ते प्रकृत्या तीक्ष्णत्वं शरो लोकभयङ्करः ॥ ७ ॥

॥ आशरश्च ॥ ४ ॥

प्राणीति । अत्र शर आशरश्च तथा ॥

अतृप्तत्वं[2] दधल्लोकैराहृतै[3]रखिलैरपि ।
बिभ्रच्चलत्वं क्रूरत्वं[4] मनो याति समन्ततः ॥ ८ ॥

॥ शमनश्च[5] ॥ ५ ॥

अत्र पूर्ववत् लिङ्गद्वयसाधारण्यम् । एतानि च्युतादीनि ।

अतृप्तत्वमिति । अत्र मनः शमनश्च तथा । एतानि च्युतादीनि ॥

च्युतमध्यानि यथा—

प्रतापभूम्ना सहितो हेतिसंहतिसङ्कुलः ।
सदागमविरुद्धत्वं[6] बिभ्रद् दावः स वर्तते[7] ॥ ९ ॥

॥ दानवश्च ॥ ६ ॥

---

१. 'प्राणहिंसा' ङ. २. 'अत्राप्तत्वं' ख. ग. ङ.

३. 'रात्रृत्तैर' च ४. 'भुवने मनो' ग, 'क्रौर्यं च मनो' च. ङ.

५. 'श्च ॥ अत्रापि लिङ्गसाधारण्यम् । एतानि च्युतादीनि । च्युतमध्यानि यथा' ख; 'श्च ॥ एतानि च्युतादीनि । च्युतमध्यकं यथा' ग; 'श्च ॥ अत्रापि विशेषणद्वयं लिङ्गद्वयसाधारणम् । एतानि च्युतादीनि । च्युतमध्यानि यथा ॥ ङ; 'श्च ॥ अत्रापि पूर्ववत् पुन्नपुंसकसाधारण्यम् । एतानि च्युतादीनि । च्युतमध्यानि यथा' च.

६. 'त्वं वहन् दावः' ग. ७. 'वर्धते' ख.

च्युतमध्यानि यथा— प्रतापेति । अत्र दावः दानवश्च ॥

निजसञ्चारतो देशं परिपूतं समाचरन् ।
जवेन महता युक्तो वायुरायाति सम्प्रति ॥ १० ॥

॥ वातायुश्च ॥ ७ ॥

निजेति । अत्र वायुः वातायुरिति ॥

नूतनाम्भोधरच्छाय[1]ः सर्वलोकभयावहः ।
निगृहीतः पुरा क्षिप्रं कालस्त्रिपुरशासिना ॥ ११ ॥

॥ काकोलश्च ॥ ८ ॥

नूतनेति । अत्र कालः काकोलश्च ॥

मरुद्गमनदक्षाणां भोगिनां वसतीः शुभाः ।
चन्दनद्रुम[2]यीस्तन्वन् मय एष विराजते ॥ १२ ॥

॥ मलयश्च । ९ ॥

मरुदिति । अत्र मयः मलयः इति ॥

अथ च्युतान्तम्—

उपास्य मानोऽविरतं सामोदैः सुमनोगणैः ।
घनसङ्काशनिभश्रीकः केशः स्फुरति [3]सम्प्रति ॥ १२ ॥

---

१. 'श्यामः' ङ. च. २. 'मयास्तन्वन् मयोऽयं स विराजते' ख. च.
३. 'साम्प्रतम्' ख. च.

॥ केशवश्च ॥ १० ॥

अथ च्युतान्तम् – उपास्येति । अत्र केशः केशवश्च ॥

बिन्दुच्युतकं यथा—

प्रदर्शयन्नतितरां विग्रहेषु[1] निजं बलम् ।
अगदा भासते[2] येन पररुक् प्रसभं हृता ॥ १४ ॥

॥ अङ्गदश्च ॥ १ ॥

अथ बिन्दुच्युतकम् । अत्राच्युतबिन्दुकस्य च्युतबिन्दुकस्य साधर्म्ये अर्थस्य बिन्दुच्युतकम् । ,उदाहरति यथेति– प्रदर्शयन्निति । अत्र अगद औषधम् । अङ्गदः बालिपुत्रः । उभयोर्विशेषणबलात्साधर्म्यमुन्नेयम् ॥

कामं द्विषन् द्विजगणान् मायया पीडयन् मुहुः ।
शबरस्तिष्ठति क्रूरो निन्दितो बुधमण्डलैः ॥ १५ ॥

॥ शम्बरश्च ॥ २ ॥

काममिति । अत्र शबरः शम्बरः ॥

स्वेदाम्बुभिः[3] स्मरभवैर्युक्तेन वरपाणिना ।
प्रगृहीते करे वध्वाः कटको भासतेतराम् ॥ १६ ॥

॥ कण्टकश्च ॥ ३ ॥

---

१. 'षु बलं सदा' क. २. 'राजते' क.
३. 'स्वुघस्मरभवैः' च.

खेदेति । अत्र कटकः कण्टकश्च ॥

जनयन्तः सुखं[1] निद्रां जनानां निजसेवया ।
कबला मार्दवोपेता[2] जयन्ति रुचिशालिनः ॥ १७ ॥

॥ कम्बलाश्च ॥ ४ ॥

जनयन्त इति । अत्र कबलाः कम्बलाश्च ॥

लङ्कापुरे यदुद्यानभजनं कपिना कृतम् ।
अश्रेयसो निदानं तदासीन्नक्तश्चरप्रभोः ॥ १८ ॥

॥ उद्यानभञ्जनं च ॥ ५ ॥

लङ्कापुर इति । अत्र उद्यानभजनम्, उद्यानभञ्जनं च ॥

दरं दधानोऽविरतमरिणा सङ्गतः पुनः ।
लोकेऽतिरिक्तो वीर्येण भगवानेष भासते[3] ॥ १९ ॥

॥ भङ्गवांश्च ॥ ६ ॥

दरमिति । अत्र भगवान् भङ्गवांश्च तथा ॥

सञ्चारं रचयन् शश्वद् विपुले वियदङ्कणे ।
अन्वितः पत्रवत्त्वेन विभाति पतंगो[4] भृशम् ॥ २० ॥

---

१. 'सुखां' ख. ङ. च. २. 'विभवोपेता' ख.
३. 'दृश्यते' ङ. ४. 'पतगेश्वरः' ख.

॥ पतङ्गश्च ॥ ७ ॥

सञ्चारमिति । अत्र पतगः पतङ्गश्च ॥

असिदारितभूपालगज[1]वाजिभटावलिः ।
[2]अति[3]रिक्तां महीं कुर्वन् [4]सगरोऽसौ वि[5]भासते ॥ २१ ॥

॥ सङ्गरश्च ॥ ८ ॥

असीति । अत्र सगरो राजविशेषः सङ्गरश्च ॥

चिकीर्षितं यद् गुरुणा यद् बुधेन विधित्सितम् ।
जनस्य निघ्नंस्तच्छ्रेयो मद [6]एष विराजते ॥ २२ ॥

॥ मन्दश्च ॥ ९ ॥

चिकीर्षितमिति । अत्र मदः मन्दश्च ॥

उत्पादितमहानादाः [7]कस्मिंश्चित् कारणे सति ।
मनोहरतराकारा [8]घंटा राजन्ति [9]सम्प्रति ॥ २३ ॥

॥ [10]घंण्टाश्च ॥ १० ॥

---

१. ' वाजिरथाकुलाम् ' ख. च.
२. ' महीं कुर्वन् महावेगः सगरः स विभासते ' ख.
३. ' रिक्तां ' ग.　　४. ' सगरः स विभासते ' च.
५. ' विराजते ' ङ.　　६. ' एव ' च.
७. ' कदाचित् कारणे ' ङ. च.　　८. ' घटी राजति सम्प्रति ' ख.
९. ' साम्प्रताम् ' ङ.　　१०. ' घण्टी च ' ख.

मात्राच्युतकं यथा—

प्रकृष्टताया देशस्य यो बिभर्ति निदानताम् ।
आकाशसदृशच्छायः कासरोऽयं विराजते ॥ २४ ॥

॥ कासारश्च ॥ १ ॥

अथ मात्राच्युतकम् । अच्युतमात्रेण च्युतमात्रस्य साधर्म्ये मात्राच्युतकम् । प्रकृष्टेति । अत्र कासरः कासरश्च ॥

मनोहरवनोपेतो निरुद्धवियदङ्गणः ।
[1]पृथुलत्वं पुनर्बिभ्रद् भास[2]तेऽसौ धराधरः ॥ २५ ॥

॥ धाराधरश्च ॥ २ ॥

मनोहर इति । अत्र धराधरः धाराधरश्च ॥

[3]अनन्ताहितसञ्चाराः [4]शिञ्जन्मञ्जुलभूषणाः ।
नखरश्रीयुता भान्ति चरणा मार्दवान्विताः ॥ २६ ॥

॥ चारणाश्च ॥ ३ ॥

अनन्तेति । चरणाः चारणाश्च तथा ॥

प्रालम्बविलसत्तेजो[5]हारिनिर्भरविक्रमः ।
गोधूळिधूसरतनुर्बल एष वि[6]राजते ॥ २७ ॥

---

१. 'समुन्नतिं पुन' ख. ङ. च. २. 'ते स धरा' ङ.
३. 'वनान्ता' ख. ४. 'व्यञ्जन्मञ्जुल' ख, 'राजन्मञ्जुल' च.
५. 'हारी' ख. ग. च, 'हार' ङ. ६. 'विशोभते' च.

॥ बालश्च ॥ ४ ॥

प्रालम्बेति । अत्र बलो बालश्च तथा ॥

पद्मासनं विदधती मुखभासा [1]मनोहरा ।
जनयन्ती स्मरं भर्तुर्भासते नितरां रमा ॥ २८ ॥

॥ रामा च ॥ ५ ॥

पद्मेति । अत्र रमा रामा च ॥

चञ्चरीकावलिश्यामा वनौघाकलितस्थितिः ।
नेत्रासेचनकश्रीका कालिका [2]भ्राजतेतराम् ॥ २९ ॥

॥ कालिका च ॥ ६ ॥

चञ्चरीकेति । अत्र कलिका कालिका च ॥

कुन्देन्दुहिमगौरश्रीर्लसद्गुणगणान्वितः ।
हरो बिभाति सुदृशां हृदयङ्गमतां दधत् ॥ ३० ॥

॥ हारश्च ॥ ६ ॥

कुन्देति । अत्र हरः हारश्च ॥

[3]विलसत्पुण्डरीकेण वनौघेन विराजितम् ।
अध्यासितं हंसकु[4]लैर्दृश्यते सरितां कुलम् ॥ ३१ ॥

---

१. 'मनोरमा' ङ. २. 'राजते' ङ.
३. 'विकस' ग. ४. 'कुलैर्वर्तते सरि' ङ.

॥ कूलं च ॥ ८ ॥

विलसदिति । अत्र वाहिनीकुलं वाहिनीकूलं च ॥

अदितेः प्रीतिमातन्वन् सञ्चारं कलयन् दिवि ।
छायया सहितोऽजस्रं सुर एष[1] विराजते ॥ ३२ ॥

॥ सूरश्च ॥ ९ ॥

अदितेरिति । अत्र सुरः सूरश्च ॥

[2]नवाम्भोदनिभच्छायो महाभोगविराजितः ।
विभूषितो रत्नरुचा नगोऽयं दृश्यते पुरः ॥ ३३ ॥

॥ नागश्च ॥ १० ॥

नवेति । अत्र नगो नागश्च तथा ॥

अथ व्यञ्जनच्युतकं[3] यथा—

समुल्लसत्कर्कटकमीनरा[4]शिविराजितम् ।
निर्मलत्वं पुनर्बिभ्रदम्बरं भासते भृशम्[5] ॥ ३४ ॥

॥ शम्बरं च ॥ १ ॥

अथ व्यञ्जनच्युतकम् । अत्राच्युतव्यञ्जनपदार्थेन च्युतव्यञ्जनपदार्थस्य साधर्म्ये व्यञ्जनच्युतकम् । यथा समुल्लसदिति । अत्राम्बरं शम्बरं च । अत्र

---

१. 'ष प्रकाशते' ख. च. २. 'नूतनाम्भोरुहच्छायो' ङ.
३. 'कम् । तद्यथा' ख. च. ४. 'राजि' ग.
५. 'भासतेऽधिकम्' ख. च; 'भासतेतराम्' ङ.

शकारस्य व्यञ्जनस्य च्युतौ अम्बरमिति भवति ॥

अवाप्ततापानुभवैरापाटलविलोचनैः ।
क्लेशेन महता युक्तैरोदनं क्रियते जनैः ॥ ३५ ॥

॥ रोदनं च ॥ २ ॥

अवाप्तेति । अत्र ओदनं रोदनं च ॥

स्वसम्पर्केण शीतार्तान् कलयन् [1]निखिलान् जनान् ।
वर्धितोऽम्भोमुचां गुम्भैरासारः परिदृश्यते ॥ ३६ ॥

॥ कासारश्च ॥ ३ ॥

स्वेति । अत्र आसारः कासरश्च तथा ॥

अवमत्य चरन् वायुं विलसन्मणिभूषणः ।
उरगो राजते सोऽयं किश्वाश्वतरवंशजः ॥ ३७ ॥

॥ तुरगश्च ॥ ४ ॥

अवमत्येति । अत्रोरगस्तुरगश्च ॥

निजेन तेजसा रक्षन् निर्मलं भुवनं सदा ।
धूतवैरितमःश्रेणिररुणोऽयं [3]प्रकाशते ॥ ३८ ॥

॥ वरुणश्च ॥ ५ ॥

---

१. 'सकलान्' ख. ङ. च.   २. 'अगणरय' क. ख. ग. च.
३. 'विराजते' ङ.

निजेनेति । अत्र अरुणो वरुणश्च तथा ॥

विलोलवालव्यजनैर्वीजितोभयपार्श्वभूः[1] ।
सवनेषु चरन्नुच्चैरमरोऽयं विभासते[2] ॥ ३९ ॥

॥ चमरश्च ॥ ६ ॥

विलोलेति । अत्रामरश्चमरश्च ॥

अनिशं त्रिदशैः साकमप्सरोभिर्निषेवितः ।
मदरागप्रभवभूरासवः[3] खलु दृश्यते ॥ ४० ॥

॥ वासवश्च ॥ ७ ॥

अनिशमिति । अत्रासवो वासवश्च ॥

मरुत्स्वरूपतोपेता लोकानां हितकारिणः ।
स्वस्थानसञ्चाररता विलसन्त्यसवो[4] भृशम्[5] ॥ ४१ ॥

॥ वसवश्च ॥ ८ ॥

मरुदिति । अत्र असवो वसवश्च ॥

जनानां सुखसञ्चारे निदानत्वं[6] सदा दधत् ।
साधनं[7] विषयप्राप्तावयनं ननु शोभते ॥ ४२ ॥

---

१. ' नपरिशोभितपार्श्वभूः ' ङ.
२. ' रोऽसौ विराजते ' ख. च.
३. ' प्रसव ' ग.
४. ' सवोऽसौ विराजते ' ङ.
५. ' वोऽधिकम् ' ङ.
६. ' सदानत्वं ' ख. च.
७. ' साधकं ' ग. ङ. च.

॥ नयनं च ॥ ९ ॥

जनानामिति । अत्रायनं नयनं च ॥

महाग्रहत्वं बिभ्राणः पीडयन्नखिलं[1] जगत् ।
वृषाकपिसमुद्भूतः सोऽयमारः[2] प्रकाशते ॥ ४३ ॥

॥ मारश्च ॥ १० ॥

महाग्रहत्वमिति । अत्र आरः मारश्च तथा ॥

अथ समस्तव्यस्तरूपम्[3]—

[4]विशेषणेषु विविधेष्वेकमप्याश्रयेत चेत् ।
समस्तव्यस्तरूपत्वं तदाख्यं[5] तद् बुधा विदुः ॥ ४४ ॥

तद्यथा—

सुधामयूखप्रमुखा ग्रहास्तारागणास्तथा ।
निशान्विताः प्रकाशन्ते नितरां वियदङ्कणे ॥ ४५ ॥

॥ अत्र निशान्विता इति[6] विशेषणं समस्तव्यस्तरूपकम्[7] ॥ १ ॥

अथ समस्तव्यस्तरूपाख्यं चित्रम् । तल्लक्षणमाह— विशेषणेष्विति । अनेकेषु विशेषणेषु एकमपि विशेषणं समस्तव्यस्तरूपत्वमाश्रयेत चेत् तच्चित्रं समस्तव्यस्तरूपाख्यं भवति । उदाहरति— यथेति । सुधेति । चन्द्रप्रमुखा ग्रहास्तारागणाश्च निशान्विताः प्रकाशन्त इति पदयोजना । अत्र निशान्विता

---

१. 'यन्निखिलं' ख. च. २. 'मारो विराजते' ङ. ३. 'रूपकम्' ग.

४. 'विशेषणानां निवहे यद्येकमपि संश्रयेत्' क. 'विशेषणानां निवहो यद्येकं वापि संश्रयेत्' ख. 'विशेषणानां निकरे यद्येकमपि संश्रयेत्' ग. 'विशेषणविशेष्येषु यद्येकमपि संश्रयेत्' च. ५. 'तदाख्यातं बुधा' ख.

६. 'इति समस्त' ग. ७. 'रूपम्' ङ. च.

इति विशेषणं समस्तव्यस्तरूपम् । निशया अन्विता इति समस्तरूपम् । निशा रात्र्या, शकारान्तशब्दस्तृतीयान्तः । अत्र दश लक्ष्यश्लोका अन्तर्लापिनः ॥

चक्षुरानन्दने[1] चन्द्रः सौन्दर्ये पुष्पसायकः ।
धरणीवल्लभमणिर्भासते रुचिभास्करः ॥ ४६ ॥

॥ अत्र रुचिभास्कर इति विशेषणं[2] तादृशम् ॥ २ ॥

चक्षुरिति । अत्र रुचिभास्कर इति विशेषणं समस्तव्यस्तकरूपम् । रुचौ भास्कर इति रुचिभास्करः इति समस्तरूपं; रुचि दीप्तौ, चकारान्तोऽयं सप्तम्यन्तः शब्दः ॥

अभ्यस्तवेदवेदाङ्गशास्त्रकाव्यकलाकुलाः ।
[3]वाचान्विता बुधजनाः प्रकाशन्ते धरातले ॥ ४७ ॥

॥ अत्र [4]वाचान्विता [5]इति विशेषणं तादृशम् ॥ ३ ॥

अभ्यस्तेति । अत्र वाचान्विता इति विशेषणं समस्तव्यस्तरूपम् । एकत्र वाचाशब्दः, अन्यत्र वाक्शब्दः ॥

पदाकलितसञ्चारा नराश्च पशवस्तथा ।
[6]वर्तन्ते भूमिवलये सुखदुःखसमन्विताः ॥ ४८ ॥

॥ अत्र पदाकलितसञ्चारा इति विशेषणं तादृशम् ॥ ४ ॥

पदेति । अत्र पदाकलितसञ्चारा इति विशेषणं तादृशम् । एकत्र पदेन, अन्यत्र पदा इति ॥

क्रमाद् गन्तुं वहन्निच्छामखिलं राशिमण्डलम् ।

---

१. 'चक्षुःप्रीतिकृतौ चन्द्रः' ङ. २. 'षणं समस्तव्यस्तरूपम्' ख
३. 'वाचायुता' क. ख. ग च. ४. 'वाचायुता' क ख. ग. च.
५. 'इति तथा ॥' ख. ६. 'वसुन्धराया वलये विलसन्ति समन्ततः ॥' ङ.

मासाकलितसङ्क्रान्तिर्मार्ताण्डोऽयं [1]प्रकाशते ॥ ४९ ॥

॥ अत्र मासाकलितं[2] इति विशेषणं तादृशम् ॥ ५ ॥

क्रमादिति । अत्र मासाकलितसङ्क्रान्तिरिति विशेषणं तादृशम् । मासा मासेनेत्यर्थः । अन्यत्र मासेन ॥

क्षिप्तामरावतीशोभा विनिर्धूतालकामदा ।
[3]विभाति काशी फणिनां पुरश्रीगर्वहारिणी ॥ ५० ॥

॥ अत्र [4]पुरश्रीगर्वहारिणीति विशेषणं तादृशम् ॥ ६ ॥

क्षिप्तेति । अत्र पुरश्रीगर्वहारिणीति पदं तादृशम् । पुरस्य श्रीः पुरश्रीः इति समस्तम् । पुर इति षष्ठी, तस्याः श्रीस्तद्गर्वहारिणीति व्यस्तरूपम् ॥

पुलोमपुत्रीरमणप्रमुखा निखिला अपि ।
सुधान्धसो दिक्पतयो दिशायुक्ताश्चकासति ॥ ५१ ॥

॥ अत्र दिशायुक्ता इति विशेषणं तादृशम् ॥ ७ ॥

पुलोमेति । अत्र दिशायुक्ता इति विशेषणं तादृशम् । क्वचिद् दिशाशब्दः । क्वचिद् दिक्शब्दः ॥

*[5]क्षुधार्दिता दीनदीना मानुषा जगतीतले ।
कार्याकार्ये न जानन्ति भक्ष्याभक्ष्ये च नैव ते ॥ ५२ ॥

॥ अत्र [6]क्षुधार्दिता इति विशेषणं तादृशम् ॥ ८ ॥

---

* 'द्वाराहित '(श्लो०. सं०. ५३)इत्यनन्तरमयं श्लोकः ख. ग. ङ. च. पाठेषु.

---

१. 'विराजते' ॥ ङ   २. 'तसंक्रान्तिरिति विशे ' ग. ङ. च.

३. 'वसुन्धरायां राजंस्ते पुरश्रीर्भासतेतराम् ' च.

४. 'तुरीयपादं विशेषणम् ' ॥ ग, 'पुरश्रीरिति विशेष्यं तादृशम् ॥' च.

५. 'क्षुधान्विता दीनमुखा मानु ' ख.   ६. 'क्षुधान्विता ' ख.

क्षुधेति । अत्र क्षुधार्दिता इति विशेषणं तादृशम् । कचित् क्षुधा-शब्दः, कचित् क्षुच्छब्दः ॥

द्वाराहितप्रवेशो[1]ऽयं जनो नानाविधः सुखम् ।
आस्थानमण्डपगतं सेवते धरणीपतिम् ॥ ५३ ॥

॥ अत्र द्वाराहितप्रवेश इति विशेषणं तादृशम् ॥ ९ ॥

द्वाराहित इति । अत्र द्वाराहितप्रवेश इति विशेषणं तादृशम् । कचिद् द्वारमित्यकारान्तः । कचिद् द्वारेति रेफान्तः ॥

तृषातुराः शुष्ककण्ठर[2]सनाधरतालवः ।
अपि पल्वलवारीणि पङ्किलानि [3]पिबन्त्यहो ॥ ५४ ॥

॥ [4]अत्र तृषातुरा इति विशेष[5]णं समस्तव्यस्तरूपम् ॥ १० ॥

तृषेति । अत्राकारान्तं समस्तम् । षकारान्तं व्यस्तम् ।

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
तुर्योऽजायत तत्कृताविह परिच्छेदो[6] महान् रुक्मिणी-
कल्याणानुजतां गते घनतरश्रीचित्ररत्नाकरे ॥ ५५ ॥

इति श्रीचित्ररत्नाकरे
चतुर्थपरिच्छेदः
समाप्तः ॥

---

१. 'शोऽसौ गृहान्तर्वर्तेत गृही । पुत्रैर्मित्रैः कलत्रैश्च सङ्गतोऽनुभवन् सुखम् ॥' ङ २. 'रदाजिह्वाधरास्तु ये' च. ३. 'पिबन्ति ते' च.

४. 'प्रथमशब्दः विशेषणम् । पूर्वश्लोके प्रथमः शब्दः ॥" ग.

५. 'षणं तादृशम् ॥" ङ ६. 'दो विदर्भेन्दुजाकल्याणावरजे मनोहरतरश्रीचित्ररत्नाकरे ॥ कृतौ चक्रकवेः सूनो रमाश्रीलोकनाथयोः । चतुर्थोऽभूत् परिच्छेदाश्चित्ररत्नाकरे वरे' ॥ ङ, दो विदर्भात्मजाकल्या' ख. च

पञ्चमः परिच्छेदः ।

अथ तुल्यार्थाक्षरच्युतकादीनि—

> तुल्यार्थकं पदं यद्यद्वर्णादीनां च्युतावपि ।
> तुल्यार्थतत्तच्च्युतकसंज्ञां[1] तत्तत्पदं भजेत्[2] ॥ १ ॥

तुल्यार्थाक्षरच्युतकादीनि । तल्लक्षणमाह— **तुल्यार्थकमिति** । यद्यत्पदं वर्णादीनां वर्णमात्राबिन्दुव्यञ्जनार्धानां च्युतावपि अन्यैरच्युतवर्णादिभिस्तुल्यार्थकं तत्तत्पदं तुल्यार्थतत्तच्च्युतकसंज्ञां भजेत् । तत्तच्च्युतकसंज्ञामिति तुल्यार्थवर्णच्युतकतुल्यार्थमात्राच्युतकतुल्यार्थबिन्दुच्युतकतुल्यार्थव्यञ्जनच्युतक तुल्यार्थार्धच्युतकसंज्ञामित्यर्थः । अत्र पञ्चाशल्लक्ष्यश्लोका बहिर्लापिनः ।

तत्र[3] तुल्यार्थवर्णच्युतकं यथा—

> समानवेगो मरुता वर्ण्यते कः कवीश्वरैः ।
> च्युतेऽपि वर्णे तुल्यार्थं पदं वाच्यमिहोत्तरम् ॥ २ ॥

॥ तुरङ्गः, तुरङ्गमः ॥ १ ॥

तत्र तुल्यार्थवर्णच्युतकमुदाहरति— **यथेति** । **समानेति** । कः कवीश्वरैः मरुता समानवेगो वर्ण्यते इति प्रश्नः । च्युतेऽपि वर्णे तुल्यार्थं पदमिहोत्तरं वाच्यम् । अत्र तुरङ्गमपदेन अच्युतवर्णेन तुल्यार्थकच्युतवर्णं तुरङ्गं

---

१. 'संज्ञं' ख. च.   २. 'भवेत्' ख. च., 'व्रजेत्' ग.
३. 'तद्यथा' ग.

इति पदमुत्तरम् । अत्र दशानां लक्ष्यश्लोकानां 'च्युतेऽपि वर्णे तुल्यार्थं पदं वाच्यमिहोत्तरम्' इत्येतदुत्तरार्धम् ॥

तरङ्गिणीनाथमयीं धत्ते[1] का खलु मेखलाम् ।
च्युतेऽपि वर्णे० ॥ ३ ॥

॥ पृथ्वी, पृथिवी, । अत्र[2] इवर्णस्य लोपः ॥ २ ॥

तरङ्गिणीति । प्रश्नः स्पष्टः । उत्तरं पृथ्वीति पदं च्युतवर्णं, तच्चा-च्युतवर्णेन पृथिवीपदेन तुल्यार्थम् । अत्र इवर्णस्य च्युतिः ॥

उत्पादयति को भीतिं जनानां निजदर्शनात् ।
च्युतेऽपि वर्णे० ॥ ४ ॥

॥ भुजङ्गः, भुजङ्गमः ॥ ३ ॥

उत्पादयतीति । अत्र भुजङ्गभुजङ्गमपदे च्युताच्युतवर्णे ॥

अयत्नं[3] सञ्चरति को निरालम्बे नभःस्थले ।
च्युतेऽपि वर्णे० ॥ ५ ॥

॥ विहङ्गः, विहङ्गमः ॥ ४ ॥

अयत्नमिति । अत्र विहङ्गविहङ्गमपदे च्युताच्युतवर्णे ॥

---

१. 'धत्ते का मेखलां सदा' ङ.
२. 'अत्र च्युतिरिवर्णस्य' ङ. च.
३. 'सुखेन स' क. ख. ग. च.

को [1]वा गजास्यावयवो भ्रमद्भ्रमरशोभितः ।
च्युतेऽपि वर्णे० ॥ ६ ॥

॥ कटः, करटः ॥ ५ ॥

क इति । अत्र कटः करट इति पदे च्युताच्युतवर्णे ॥

सुधा[*]शनसमूहानामावासत्वं बिभर्ति कः ।
च्युतेऽपि वर्णे० ॥ ७ ॥

॥ मेरुः, सुमेरुः ॥ ६ ॥

सुधेति । अत्र मेरुः सुमेरुः इति पदे च्युताच्युतवर्णे ॥

पादविन्यासरहिता [3]का दानवविरोधिनाम् ।
च्युतेऽपि वर्णे० ॥ ८ ॥

॥ क्ष्मा, क्षमा । अत्र [4]अवर्णस्य च्युतिः ॥ ७ ॥

पादेति । अत्र क्ष्मा क्षमेति पदे च्युताच्युतवर्णे । अत्र अवर्णस्य च्युतिः ॥

उन्मूलनं विधत्ते को धरणीरुहसंहतेः ।
च्युतेऽपि वर्णे० ॥ ९ ॥

---

* 'शन' इत्यारभ्य 'क्षमा '(P 113 line 11) इत्यन्तं गपाठे लुप्तम् ।

---

१. 'वारणस्यावयवो' छ. २. 'कटकः' ख. च.
३. 'कानना स्याद्विरोधिनाम्' ख. च.
४. 'अकारस्य' छ., 'अवर्णच्युतिः' ख. च.

॥ समीरः, समीरणः ॥ ८ ॥

उन्मूलनमिति । अत्र समीरः समीरण इति पदे तादृशे ॥

आवासतां वहति को निकरस्य पतत्रिणाम् ।
च्युतेऽपि वर्णे० ॥ १० ॥

॥ अगः, अगमः ॥ ९ ॥

आवासेति । अत्र अगः अगमः इति पदे तादृशे ॥

क्षणदाचर[1]लोकस्य भक्ष्यभावं बिभर्ति किम् ।
च्युतेऽपि वर्णे० ॥ ११ ॥

॥ पलं, पललम् ॥ १० ॥

क्षणदेति । अत्र पलं पललमिति पदे च्युताच्युतवर्णे ॥

तुल्यार्थमात्राच्युतकं यथा—

किं साधनमभूदिन्द्रसूनोर्विद्विषतां वधे ।
मात्राच्युतावपि पदं तुल्यार्थं स्यादिहोत्तरम् ॥ १२ ॥

॥ गाण्डिवं, गाण्डीवम् ॥ १ ॥

अथ तुल्यार्थमात्राच्युतकं यथा– किमिति । इन्द्रसूनोरर्जुनस्य विद्विषतां वधे किं साधनमभूदिति प्रश्नः । 'मात्राच्युतावपि भवेत्तुल्यार्थं पदमुत्तरम्' इतीदं

---

१. 'रसज्ञस्य' ड.

दशलक्ष्यश्लोकानामुत्तरार्धम् । अत्र च्युताच्युतमात्रे (गाण्डिव) गाण्डीवपदे ॥

निर्गन्धैरपि कः पुष्पैरर्चितः प्रीतिमश्नाति ।
मात्राच्युतावपि० ॥ १३ ॥

। गिरिशः, गिरीशः ॥ २ ॥

निर्गन्धैरिति । अत्र गिरिशगिरीशपदे च्युताच्युतमात्रे ॥

हुताशनेन सार्धं कः सौहार्दं वहते सदा ।
मात्राच्युतावपि० ॥ १४ ॥

॥ गन्धवहः, गन्धवाहः ॥ ३ ॥

हुताशनेनेति । अत्र गन्धवहगन्धवाहपदे च्युताच्युतमात्रे ॥

वनानि शुष्काशुष्काणि निर्दग्धुं कः प्रगल्भते ।
मात्राच्युतावपि० ॥ १५ ॥

। दवः, दावः ॥ ४ ॥

वनानीति । अत्र दवः दावः इति पदे तादृशे ॥

किं विराजति कस्तूरीतिलकस्य समर्पणात् ।
मात्राच्युतावपि० ॥ १६ ॥

॥ अळिकं, अळीकम् ॥ ५ ॥

---

१. 'सहायं' ख. च.

किमिति । अत्राळिकमळीकमितिपदे तादृशे ॥

अम्भोजलोचनायाः कः सम्भोगैः प्रीतिमश्नुते ।
मात्राच्युतावपि० ॥ १७ ॥

॥ अभिकः, अभीकः ॥ ६ ॥

अम्भोजेति । अत्राभिकः अभीक इति पदे तादृशे ॥

सति कारणपौष्कल्ये को बीजादुद्भवं व्रजेत् ।
मात्राच्युतावपि० ॥ १८ ॥

॥ अङ्कुरः, अङ्कूरः ॥ ७ ॥

सतीति । अत्राङ्कुरः अङ्कूर इति पदे च्युताच्युतमात्रे ॥

तरुणीजनसौन्दर्यदर्शनं कोऽभिवाञ्छति ।
मात्राच्युतावपि० ॥ १९ ॥

॥ पुरुषः, पूरुषः ॥ ८ ॥

तरुणीति । अत्र पुरुषः पूरुष इति पदे च्युताच्युतमात्रे ॥

जायते काधिवदनं कोपस्य प्रभवे सति ।
मात्राच्युतावपि० ॥ २० ॥

॥ भ्रुकुटिः, भ्रूकुटिः ॥ ९ ॥

जायत इति । अत्र भ्रुकुटिः भ्रूकुटिरिति पदे तादृशे ॥

गोमयेन वितन्वन्ति गोमुखं कुत्र बालिका[1] ।
मात्राच्युतावपि० ॥ २१ ॥

॥ प्रघणे, प्रघाणे ॥ १० ॥

गोमयेनेति । अत्र प्रघणे प्रघाणे इति पदे तादृशे ॥

अथ तुल्यार्थबिन्दुच्युतकम् । तद्यथा—

तरङ्गिणीनां रमणः कीदृशो जगतीतले ।
च्युतेऽपि बिन्दौ तुल्यार्थं पदं वाच्यमिहोत्तरम् ॥ २२ ॥

॥ गभीरः, गम्भीरः ॥ १ ॥

अथ तुल्यार्थबिन्दुच्युतकमुदाहरति यथेति— तरङ्गिणीनामिति । अत्र गभीरः गम्भीर इति पदे च्युताच्युतबिन्दुके ॥

रूपं शब्दं तथा गृह्णात्येकेन करणेन कः ।
च्युतेऽपि बिन्दौ० ॥ २३ ॥

॥ भुजगः, भुजङ्गः ॥ २ ॥

रूपमिति । अत्र भुजगो भुजङ्ग इति पदे च्युताच्युतबिन्दुके ॥

वर्तन्ते भुवने के वा धरणीरुहसंश्रयाः ।
च्युतेऽपि बिन्दौ० ॥ २४ ॥

---

१. 'चलिकाः' ख. च.

॥ पतगाः, पतङ्गाः ॥ ३ ॥

वर्तन्त इति । अत्र पतगाः पतङ्गा इति पदे तादृशे ॥

अजस्रपदपर्यायपदत्वं किं समश्नुते ।
च्युतेऽपि बिन्दौ० ॥ २५ ॥

॥ सततं, सन्ततम् ॥ ४ ॥

अजस्रेति । अत्र सततं सन्ततमितिपदे तादृशे ॥

गतिभेदेषु चातुर्यं वहते भुवनेषु कः ।
च्युतेऽपि बिन्दौ० ॥ २६ ॥

॥ तुरगः, तुरङ्गः ॥ ५ ॥

गतीति । अत्र तुरगस्तुरङ्ग इति पदे तादृशे ॥

अण्डात् को भजते जन्तुर्जननं जगतीतले ।
च्युतेऽपि बिन्दौ ॥ २७ ॥

॥ विहगः, विहङ्गः ॥ ६ ॥

अण्डादिति । अत्र विहगः विहङ्ग इति पदे तादृशे ॥

अवहन् के निपुणतां राक्षसानां निषूदने ।
च्युतेऽपि बिन्दौ ॥ २८ ॥

॥ प्लवगाः, प्लवङ्गाः ॥ ७ ॥

अवहन्निति । अत्र प्लवगाः प्लवङ्गा इति पदे तादृशे ॥

भुञ्जते के प्रहर्षेण नराणां मांससञ्चयान् ।
च्युतेऽपि बिन्दौ० ॥ २९ ॥

॥ रात्रिचराः, रात्रिञ्चराः ॥ ८ ॥

भुञ्जत इति । अत्र रात्रिचरा रात्रिञ्चरा इति पदे च्युताच्युतबिन्दुके ॥

बर्हिर्मुखाः सुधां प्राप्ताः किं कृत्वा क्षीरसागरे ।
च्युतेऽपि बिन्दौ० ॥ ३० ॥

॥ मथनं, मन्थनम् ॥ ९ ॥

बर्हिर्मुखा इति । अत्र मथनं मन्थनमिति पदे तादृशे ॥

*वीरः प्रयुङ्क्ते विमते कीदृशीं शरमण्डलीम् ।
च्युतेऽपि बिन्दौ० ॥ ३१ ॥

॥ तुदतीं, तुदंतीम् ॥ १० ॥

वीर इति । अत्र तुदतीं तुदन्तीमिति पदे च्युताच्युतबिन्दुके । अत्र 'च्युतेऽपि बिन्दावन्येन तुल्यार्थं पदमुत्तरम्' इतीदं तुल्यार्थबिन्दुच्युतलक्ष्यश्लोकानां दशानामुत्तरार्धम् ॥

अथ तुल्यार्थव्यञ्जनच्युतकम्[1] । तद्यथा[2]—

---

* इदं ख ग च पाठेषु नास्ति ।

---

१. 'कम् । को विषाण ' ग.   २. ' यथा ' ख.

को विषाणककुत्सास्नालाङ्गूलखुरसंयुतः ।
च्युतावपि व्यञ्जनस्य तुल्यार्थं पदमुत्तरम् ॥ ३२ ॥

॥ ऋषभः, वृषभः ॥ १ ॥

अथ व्यञ्जनच्युतकमुदाहरति यथेति । क इति । 'च्युतावपि व्यञ्जनस्य तुल्यार्थं पदमुत्तरम्' इति तुल्यार्थव्यञ्जनच्युतकलक्ष्यश्लोकानां दशानामिदमेव उत्तरार्धम् । अत्र ऋषभः वृषभः इति च्युताच्युतव्यञ्जने पदे ॥

वर्षे महति सञ्जाते कीदृशं भूतलं भवेत् ।
च्युतावपि० ॥ ३३ ॥

॥ आर्द्रं, सार्द्रम् ॥ २ ॥

वर्ष इति । अत्रार्द्रं सार्द्रमिति पदे च्युताच्युतव्यञ्जने ॥

न व्रजेच्चलनं वाति प्रचण्डे कः प्रभञ्जने ।
च्युतावपि० ॥ ३४ ॥

॥ अगः, नगः ॥ ३ ॥

नेति । अत्र अगः नगः इति पदे तादृशे ॥

साभिलाषो भवति कः शारदाकिलिकिञ्चिते ॥
च्युतावपि० ॥ ३५ ॥

॥ अः, कः ॥ ४ ॥

साभिलाष इति । अत्र अः कः इति पदे तादृशे ॥

पङ्क्तिशब्दस्य पर्यायपदत्वं किं समश्नुते ।
च्युतावपि० ॥ ३६ ॥

॥ आलिः, पालिः[1] ॥ ५ ॥

पङ्क्तीति । अत्रालिः पालिरिति पदे तादृशे ॥

प्रयुज्यते किं समरे वीरेण परिपन्थिषु ।
च्युतावपि० ॥ ३७ ॥

॥ अस्त्रं, शस्त्रम ॥ ६ ॥

प्रयुज्यत इति । अत्रास्त्रं शस्त्रमिति पदे च्युताच्युतव्यञ्जने ॥

कीदृशं यातुधानानां दर्शनं जगतीतले ।
च्युतावपि० ॥ ३८ ॥

॥ भीमं, भीष्मम ॥ ७ ॥

कीदृशमिति । अत्र भीमं भीष्ममिति पदे तादृशे ॥

कीदृशं दारु वक्रत्वं विहायार्जवमश्नुति ।
च्युतावपि० ॥ ३९ ॥

॥ तष्टं[2], त्वष्टम ॥ ८ ॥

कीदृशमिति । अत्र तष्टं त्वष्टमिति पदे तादृशे ॥

---

१. 'आली, पाली' ङ. २. 'तक्षं, त्वक्षम्' च.

भुवने कस्तमस्तोमनिषूदनविचक्षणः ।
च्युतावपि० ॥ ४० ॥

॥ अविः, रविः ॥ ९ ॥

भुवन इति । अत्र अविः रविः इति पदे तादृशे ॥

भिनत्ति किं सायकेन धन्विनामग्रतःसरः ।
च्युतावपि ॥ ४१ ॥

॥ लक्षं, लक्ष्यम् ॥ १० ॥

भिनत्तीति । अत्र लक्षं लक्ष्यमिति पदे च्युताच्युतव्यञ्जने ॥

अथ तुल्यार्थार्धच्युतकम्[1] । तद्यथा[2]—

यूनां मनांसि युवतेः किमाकर्षति सत्वरम् ।
अर्धे च्युतेऽपि[3] तुल्यार्थं पदं वाच्यमिहोत्तरम् ॥ ४२ ॥

॥ रूपं, रूपधेयम् ॥ १ ॥

अथ तुल्यार्थार्धच्युतकम् । यूनामिति । अत्र 'अर्धे च्युतेऽपि तुल्यार्थं पदं वाच्यमिहोत्तरम्' इत्येकं दशलक्ष्यश्लोकानामुत्तरार्धम् । अत्र रूपं रूपधेयमिति पदे च्युताच्युतार्धे ॥

---

१. 'कम् । यूनां' ग. २. 'यथा' ख.
३. 'अर्धच्युते' ङ.

[४]अब्धिमेखलया युक्ता का लसद्रत्नजालया ।
अर्धे च्युतेऽपि० ॥ ४३ ॥

॥ धरा, वसुन्धरा ॥ २ ॥

अब्धिमेखलयेति । अत्र धरा वसुन्धरा इति पदे च्युताच्युतार्धे ॥

कस्तमस्तोमवेतण्डघटादलनकेसरी ।
अर्धे च्युतेऽपि० ॥ ४४ ॥

॥ भानुः, [५]चित्रभानुः ॥ ३ ॥

क इति । अत्र भानुश्चित्रभानुरिति पदे च्युताच्युतार्धे ॥

सन्तापं कः शमयति च्छायया।ध्वगसंहतेः ।
अर्धे च्युतेऽपि० ॥ ४५ ॥

॥ द्रुः, द्रुमः ॥ ४ ॥

सन्तापमिति । अत्र द्रुः द्रुम इति पदे तादृशे ॥

अलङ्करोति काजस्रं चतुर्भुजभुजान्तरम् ।
अर्धे च्युतेऽपि० ॥ ४६ ॥

॥ मा, रमा ॥ ५ ॥

---

४. 'काञ्च्याब्धिमय्या सहिता' क. ख. ग. च.

५. 'चण्डभानुः' क. ख. ग. च.

अलङ्करोतीति। अत्र मा रमा इति पदे तादृशे ॥

कुलसीमन्तिनी चित्ते कां बिभर्ति निरन्तरम्।
अर्धे च्युतेऽपि० ॥ ४७ ॥

॥ त्रपाम्, अपत्रपाम् ॥ ६ ॥

कुलेति। अत्र त्रपाम्, अपत्रपामिति पदे तादृशे ॥

देवः प्रसन्नः स्यात् पुष्पैर्निर्गन्धैरर्चितोऽपि कः।
अर्धे च्युतेऽपि० ॥ ४८ ॥

॥ हरः, स्मरहरः ॥ ७ ॥

देव इति। अत्र हरः स्मरहर इति पदे तादृशे ॥

गण्डस्थलीगळद्दाननिर्झरः को महीतले।
अर्धे च्युतेऽपि० ॥ ४९ ॥

॥ गजः, मतङ्गजः ॥ ८ ॥

गण्डेति। अत्र गजो मतङ्गज इति पदे च्युताच्युतार्धे ॥

कुञ्जराशनवृक्षस्य कीदृशं वर्तते दळम्।
अर्धे च्युतेऽपि० ॥ ५० ॥

॥ चलं, चलाचलम् ॥ ९ ॥

कुञ्जरेति । अत्र चलं चलाचलमिति पदे च्युताच्युतार्थे ॥

वाचां विलासेन सभां मुखरामातनोति कः ।
अर्धे च्युतेऽपि० ॥ ५१ ॥

॥ वदः, वदावदः ॥ १० ॥

वाचामिति । । अत्र वदो वदावद इति पदे च्युताच्युतार्थे ॥

अथ प्रश्नसमोत्तरम् ।

प्रश्नोत्तरे समे यस्य प्रश्नोत्तरसमं हि तत् ॥

तद्यथा—

सदाशयः कोऽमलः स्याद् वाणी कस्य कुटुम्बिनी ।
क्षत्रियः को दण्डधारी किं किरातान्वितं वनम् ॥ ५२ ॥

अथ प्रश्नसमोत्तरम् । तल्लक्षणमाह— **प्रश्नोत्तरे** इति । यस्य चित्रस्य प्रश्नोत्तरे समे एकाकारे तच्चित्रं प्रश्नोत्तरसमम् । **तद्यथा— सदाशय** इति । सदाशयः कोऽमलः स्यादिति प्रश्नः । सदाशयः कोमलः स्यादित्युत्तरम् । वाणी कस्य पुरुषस्येत्यर्थः, कुटुम्बिनीत्यसौ प्रश्नः । वाणी कस्य ब्रह्मणः कुटुम्बिनीत्युत्तरम् । क्षत्रियः कः दण्डधारीति प्रश्नः । क्षत्रियः कोदण्डधारीत्युत्तरम् । किं किरातान्वितं वनं— किरातान्वितं वनं किमिति प्रश्नः । किंकाराता वृक्षविशेषास्तैरन्वितं वनमित्युत्तरम् ॥

किन्नरः कुरुते गानं कं कं पुष्णाति जाङ्गलम् ।
कामितार्थप्रदा देवगवी किं शुकवद् वनम् ॥ ५३ ॥

किन्नरः कुरुते गानं— नरः गानं किं कुरुते इति प्रश्नः । किन्नरः गानं कुरुते इत्युत्तरम् । कं कं पुष्णाति जाङ्गलं— जाङ्गलं मांसं कर्तृ कं कं पदार्थं पुष्णातीति प्रश्नः । जाङ्गलं कंकं गृध्रं पुष्णातीत्युत्तरम् । कामितार्थ-

प्रदा देवगवी– का देवगवी अमितार्थप्रदा इति प्रश्नः । देवगवी कामधेनुः कामितार्थप्रदा काङ्क्षितार्थप्रदेत्युत्तरम् । किं शुकवद् वनं– शुकवद् वनं किमिति प्रश्नः । किंशुकवत् पलाशद्रुमसहितं वनमित्युत्तरम् ॥

अलिः श्रयति कंकेलिं कामाज्ञां कलयेद् युवा ॥ ५४ ॥

अलिः श्रयति कंकेलिम्– कं केलिं 'द्रवः केलिः परीहासः' इत्यमरः । कां क्रीडां श्रयतीत्यर्थः । इति प्रश्नः । अलिः कंकेलिमित्युत्तरम् । कामाज्ञां कलयेद् युवा– काम् आज्ञां युवा कलयेदिति प्रश्नः । कामाज्ञां मन्मथाज्ञां युवा कलयेदित्युत्तरम् ।

अथ भेदकभेद्यकम् ।

प्रश्नयोर्भेदकं भेद्यं द्विधा भूत्वोत्तरं वदेत् ।
अर्थान्तरं चाखण्डं चेद्यत्तद्भेदकभेद्यकम् ॥ ५५ ॥

अथ भेदकभेद्यं नाम चित्रम् । तल्लक्षणमाह– **प्रश्नयोरिति** । यदुत्तरमुत्तरत्वेन कल्पितं शब्दरूपं द्विधा भूत्वा स्वयं द्विधा भवत् प्रश्नयोः सम्बन्धि भेदकं विशेषणं भेद्यं विशेष्यं च वदेत् पृथङ्निर्दिशेत् तदेवोत्तरमखण्डमर्थान्तरं च वदेच्चेत् तच्चित्रं भेदकभेद्यसंज्ञं भवति ॥

तद्यथा—

सदग्रहारो वहते कीदृशीं कां धरातले ।
बिभर्ति हरिणाक्षीणां कां विलोचनयोर्द्वयम् ॥ ५६ ॥

॥ महितां जनताम् , महिताञ्जनताम् ॥ १ ॥

उदाहरति– **तद्यथेति** । अत्र चित्रे पूर्वार्धे भेदकभेद्यप्रश्नौ । उत्तरार्धे अर्थान्तरप्रश्न इति ज्ञेयम् । त्रिंशल्लक्ष्यश्लोकाः ॥

प्रसन्नवदनाम्भोजः कीदृशः को भवेद् भुवि ।
विश्वम्भरा कीदृशी स्याद् वारिदे वारि वर्षति ॥ ५७ ॥

॥ समुत् ना, समुन्ना ॥ २ ॥

कीदृशीं कां भीमसेनो जग्राहारिवधोद्यतः ।
भुजयोर्युगलीं धत्ते कीदृशीं तरुणीजनः ॥ ५८ ॥

॥ दृढां गदाम्, दृढाङ्गदाम् ॥ ३ ॥

आस्वाद्यते कीदृशं किं सरसं भोजने जनैः ।
वसुन्धराया[1] वलयं कीदृशं वर्तते पुनः ॥ ५९ ॥

॥ समहः दधि, समहोदधि ॥ ४ ॥

कीदृशीं कामरण्यानी पुष्णाति फलसञ्चयैः ।
पाञ्चाली मध्यभू राज्ञां सभायां कामजीजनत् ॥ ६० ॥

॥ विचित्रां शुकराजिम्, विचित्रांशुकराजिम् ॥ ५ ॥

कीदृशीमिति । अरण्यानी महारण्यं फलसञ्चयैः कीदृशीं कां पुष्णाति । अत्र कीदृशीमिति भेदकविषयः प्रश्नः । कामिति भेद्यविषयः । राज्ञां सभायां पाञ्चाली मध्यभूः कामजीजनदिति अर्थान्तरविषयः प्रश्नः । अस्मिन् प्रश्नत्रये विचित्रां शुकराजिमित्युत्तरम् । अत्र विचित्रां नानावर्णां शुकराजिं शुकपङ्क्तिमिति भेदकभेद्ययोरुत्तरे । विचित्राणामंशुकानां राजिमित्यखण्डत्वेनार्थान्तरस्योत्तरम् ॥

---

१. 'समं धराया' ख. च.

पिपासवः कीदृशं कं नानुधावन्ति षट्पदाः ।
प्रद्युम्नस्य पितुः कीदृक् पादपङ्केरुहद्वयम् ॥ ६१ ॥

॥ नमदं गजं, नमदङ्गजम् ॥ ६ ॥

कीदृशः कः पशुपतेर्दग्धः फालाक्षिवह्निना ।
बकाभिधानतां बिभ्रद् यातुधानश्च कीदृशः ॥ ६२ ॥

॥ महाघः स्मरः, महाघस्मरः ॥ ७ ॥

नरसर्पौ मिथो दृष्ट्वा कीदृशं कमवाप्नुतः ।
सुरासुरकुलं कीदृङ् मथितुं प्राप सागरम् ॥ ६३ ॥

॥ समं दरं, समन्दरम् ॥ ८ ॥

नरसर्पाविति । अत्र कीदृशमिति भेदकविषयः प्रश्नः । कमिति भेद्यविषयः । कीदृक् सुरासुरकुलं मथितुं सागरं प्रापेत्यर्थान्तरविषयः प्रश्नः । तेषां समन्दरमित्युत्तराणि । तत्र समं तुल्यं दरं भयमिति भेदकभेद्ययोरुत्तरे । समन्दरं मन्दरसहितमित्यर्थान्तरस्य ॥

कीदृशं कं भजेद्धीरो हत्वा विमतभूभुजः ।
पाण्डोरपत्यजातं च कीदृशं भासते स्म तत् ॥ ६४ ॥

॥ सधनं जयम, सधनञ्जयम् ॥ ९ ॥

कीदृशमिति । कीदृशं कमिति भेदकभेद्यप्रश्नौ । पाण्डोरित्यर्थान्तरप्रश्नः । तेषां सधनञ्जयमित्युत्तराणि । तत्र सधनं जयमिति व्यस्तत्वेन भेदक-

---

१. 'भजेद्वीरो' ख. ग. च.

भेद्ययोः, समस्तत्वेन सधनञ्जयमित्यर्थान्तरस्य ॥

कीदृशं किं समादत्ते तक्षा रथविनिर्मितौ ।
अभिवाद्यं [1]निरीक्ष्यापि कीदृक् स्यादसतां कुलम् ॥ ६५ ॥

॥ नवं दारु, नवन्दारु ॥ १० ॥

कीदृशमिति । अत्र प्रश्नत्रयस्य नवन्दारु इत्युत्तराणि तत्र नवं दारु इति भेदकभेद्ययोरुत्तरे । नवन्दारु इति समस्तत्वेनार्थान्तरस्य । वन्दारु वन्दन । शीलं, तन्न भवतीति नवन्दारु ॥

अकरोदेकचक्रायां [2]कीदृशीं कां वृकोदरः ।
दक्षाध्वरे हरश्चक्रे भगमूर्तिं च कीदृशीम् ॥ ६६ ॥

॥ युक्तां बकक्षतिम्, युक्ताम्बकक्षतिम ॥ ११ ॥

अकरोदिति । अत्र कीदृशीं कामिति भेदकभेद्ये । दक्षाध्वरेत्यद्यर्थान्तरम् । तेषां युक्ताम्बकक्षातिमिति व्यस्ते उत्तरे । युक्ता अम्बकक्षतिर्यस्याः सा तथोक्ता तामित्यखण्डम् ॥

कीदृशं कं पुरा [3]कुन्त्याः कन्याया भानुरग्रहीत् ।
अवृणीत स्वयं कन्या कं भूधरशिखामणेः ॥ ६७ ॥

॥ [4]घननिजप्रभावशं करम्, घननिजप्रभावशङ्करम ॥ १२ ॥

---

१. 'विलोक्यापि' क. ख. ग. च. २. 'कीदृशं' ख.
३. 'कान्त्यां' ख. च. ४. 'सन्निजप्रभावः शंकरं' ख. च.

कीदृशमिति । अत्र भेदकभेद्ययोः घननिजप्रभावशं करमिति व्यस्तोत्तरे । अत्र घननिजप्रभाभिः अवशमिति भेदकम् । करमिति भेद्यम् । अर्थान्तरस्य तु घनो निजप्रभावो यस्य स तथोक्तः । तादृशं शङ्करमिति समस्तमुत्तरम् ॥

पचन्ति सूदाः कल्याणे कीदृशीं कां [1]सपायसाम् ।
उप्तबीजचया भूमिरचिरात् कां प्रदर्शयेत् ॥ ६८ ॥

॥ कोमळां कूरसंहतिम्, कोमळाङ्कूरसंहतिम् ॥ १३ ॥

पचन्तीति । अत्र कोमळां कूरसंहतिमन्नराशिमिति भेदकभेद्ययोर्व्यस्ते उत्तरे । अर्थान्तरे कोमळाङ्कूरसंहतिमिति समस्तोत्तरम् ॥

[2]चमूपतिर्गन्तुमिच्छन्नारोहेत् कीदृशं च कम् ।
विदारयेच्च कं मूर्ध्नि केसरी नखरैः खरैः ॥ ६९ ॥

॥ मतं गजं, मतङ्गजम् ॥ १४ ॥

कीदृशं कं समालोक्य मुञ्चन्त्यध्वानमध्वगाः ।
वदन्ति वचनं कीदृग्राजा[3]स्थाने कवीश्वराः ॥ ७० ॥

॥ सभारं जनम्, सभारञ्जनम् ॥ १५ ॥

महानदी कीदृशं किं वहते सततं भुवि ।
[4]दुष्टो जनः कीदृशः स्याच्चिकीर्षुः परवञ्चनम् ॥ ७१ ॥

---

१. 'कुतूहलात्' ख. ग. च. २. 'सेनापति' क.
३. 'अस्थाने' ख. ग. च. ४. 'तुष्टो' ख.

॥ सद् अम्भः, सदम्भः ॥ १६ ॥

कीदृशीं[1] कामजनयन्नन्दगोपालसुन्दरी[2] ।
पाण्डुभूपालजननीं कां वदन्ति पुराविदः ॥ ७२ ॥

॥ [3]शिवां बालिकाम्, शिवाम्बालिकाम् ॥ १७ ॥

कीदृशीमिति । अत्र भेदकभेद्ययोः शिवां बालिकामिति व्यस्तोत्तरे । अर्थान्तरे शिवाम्बालिकामिति समस्तोत्तरम् । शिवा शुभा चासावम्बालिका चेति ॥

उपयेमे कीदृशीं कां निषधानामधीश्वरः ।
आश्रयन्ते मधुलिहः कीदृशीं सरसीं पुनः ॥ ७३ ॥

॥ कान्तां भोजजाताम्, कान्ताम्भोजजाताम् ॥ १८ ॥

उपयेम इति । अत्र भेदकभेद्ययोः कान्तां भोजजातामिति व्यस्तोत्तरे । अर्थान्तरे कान्ताम्भोजजातामिति समस्तमुत्तरम् । कान्तमम्भोजजातं यस्यास्सा तथोक्ता, ताम् ॥

उद्धर्तुमुदधेः क्षोणीं कीदृशीं कां दधौ हरिः ।
नानातरुसमाकीर्णं काननं च बिभर्ति काम् ॥ ७४ ॥

॥ भासुरां कोलताम्, भासुराङ्कोलताम् ॥ १९ ॥

उद्धर्तुमिति । अत्र भेदकभेद्ययोः भासुरां कोलतामिति व्यस्तोत्तरे ।

---

१. 'कीदृशं' ख. ङ. च. २. 'पस्य सु' ख. च.
३. 'अम्बालीम् ॥' च.

अर्थान्तरे भासुराङ्कोलतामिति समस्तोत्तरम् । भासुरा अङ्कोला यस्य तत् तथोक्तम्, तस्य भावस्तत्ता, ताम् ।

सम्पादितसमित्पुष्पः कीदृशीं कां वहेन्मुनिः ।
निषादी कां श्रयेदिच्छन्मदबारणवारणम् ॥ ७५ ॥

॥ दृढां[1] कुशासक्तिम, दृढाङ्कुशासक्तिम् ॥ २० ॥

सम्पादितेति । अत्र भेदकभेद्ययोर्दृढां कुशासक्तिमिति व्यस्तोत्तरे । अर्थान्तरे दृढाङ्कुशासक्तिमिति समस्तमुत्तरम् ॥

कीदृशीं कां क्षितितले बिभर्ति प्राणिनां मनः ।
स्तनोत्तरीयं शुद्धान्तसुन्दरीणां दधाति काम् ॥ ७६ ॥

॥ चित्रां चलताम, चित्राञ्चलताम ॥ २१ ॥

कीदृशीमिति । अत्र भेदकभेद्ययोश्चित्रां चलतामिति व्यस्तोत्तरे । अर्थान्तरे चित्राञ्चलतामिति समस्तमुत्तरम ॥

कीदृशीं कां क्षितिभुजां सेना वहति सन्ततम् ।
युवानौ स्वस्थ[2]हृदयौ दधाते कामहर्निशम् ॥ ७७ ॥

॥ उदारां गजताम, उदाराङ्गजताम ॥ २२ ॥

कीदृशीमिति । अत्र भेदकभेद्ययोरुदारां गजतामिति व्यस्तोत्तरे । अर्थान्तरे उदाराङ्गजतामिति समस्तमुत्तरम् ॥

---

१. 'शुभां' ख. च.   २. 'रूपसम्पन्नौ' ङ.

कीदृशीं कां प्रदिशति [1]प्रार्थित[2]स्वर्गतिर्जनः ।
वाञ्छापदं वितन्वन्ति युवानः कीदृशीं वधूम् ॥ ७८ ॥

॥ [3]शुभां गाम, शुभाङ्गाम ॥ २३ ॥

कीदृशीमिति । अत्र भेदकभेद्ययोः शुभां गामिति व्यस्तोत्तरे । अर्थान्तरे शुभाङ्गामिति समस्तमुत्तरम् ॥

कीदृशं [4]कं वितन्वन्ति [5]तपसा विजितेन्द्रियाः ।
सुग्रीवसेना[6]पतयः कं चक्रू रामशासनात् ॥ ७९ ॥

॥ बहुलं को[7]परोधम, बहुलङ्को[8]परोधम ॥ २४ ॥

कीदृशमिति । अत्र भेदकभेद्ययोर्बहुलं कोपरोधमिति व्यस्तोत्तरे । अर्थान्तरे बहुलङ्कोपरोधमिति समस्तमुत्तरम् ॥

कीदृशी का भवेद्वीरक्षतारि[9]क्षतजस्नुतौ ।
चुम्बनासक्तमनसं तनुते का विलासिनम् ॥ ८० ॥

॥ पाटला धरा, पाटलाधरा ॥ २५ ॥

कीदृशीति । अत्र भेदकभेद्ययोः प्रश्नयोः पाटला धरेति व्यस्तोत्तरे अर्थान्तरे पाटलाधरेति समस्तमुत्तरम् ॥

---

१. 'सद्गतिप्रेप्सया नरः' ङ. २. 'स्वर्गतोऽर्जुनः' ख. च.
३. 'रुचिरां गाम्, रुचिराङ्गां' क. ग. ङ. ४. 'किं' ङ. च.
५. 'ताप' ख. ग. ङ. च. ६. 'पतिभिः किं' ङ.
७,८. 'पमर्दनम्' ङ. ९. 'क्षतजोक्षिता' ङ.

कीदृशी का भवेद् राज्ञां चरतां नीतिवर्त्मनि ।
गृह्णन्ति हेतीर्योद्धारः कीदृशीः समरोन्मुखाः ॥ ८१ ॥

॥ अकुण्ठा श्रीः, अकुण्ठाश्रीः ॥ २६ ॥

कीदृशीति । अत्र भेदकभेद्ययोरकुण्ठा श्रीरिति व्यस्तोत्तरे । अर्थान्तरे अकुण्ठाश्रीरिति समस्तमुत्तरम् । अकुण्ठा अश्रयो यासां ताः अकुण्ठाश्रयः ताः । 'स्त्रियः पाल्यश्रिकोटयः' इत्यमरः ॥

कीदृशं कं कामयते तरुणीनां कदम्बकम् ।
[1]वसन्तवासरं च स्यात् कीदृशं जगतीतले ॥ ८२ ॥

॥ [2]मञ्जुळप्रभं जनम्, मञ्जुळप्रभञ्जनम्* ॥ २७ ॥

कीदृशमिति । अत्र भेदकभेद्ययोर्मञ्जुळप्रभं जनमिति व्यस्तोत्तरे । अर्थान्तरे मञ्जुळप्रभञ्जनमिति समस्तमुत्तरम् ॥

कीदृशी का भाग्यवतो [3]गृहे वसति सन्ततम् ।
कीदृशः केशपाशश्च [4]तरुणीसंहतेः पुनः ॥ ८३ ॥

॥ शुभदा मा, शुभदामा ॥ २८ ॥

---

* इतः परं ख ग च पाठेषु 'विभर्ति०' (श्लो० ८४) ततः 'कीदृशी०' (श्लो० ८३) इति क्रमो दृश्यते.

---

१. 'गजयूथसमीपस्थः किं प्राप्नोति महीरुहः ॥' ङ, 'वसन्तावसरं च' ख. च. २. ॥ 'सुप्रभं जनं, सुप्रभञ्जनम् ॥' ग, 'बहुशोभं जनं, बहुशोभञ्जनम् ॥ ङ. ३. 'गेहे' क. ग. च.
४. 'कामचापाञ्चितभ्रुवाम्' ङ.

कीदृशीति । अत्र भेदकभेद्ययोः शुभदा मा श्रीरित्यर्थः व्यस्तोत्तरे । अर्थान्तरे शुभदामा शुभमालिकेति समस्तमुत्तरम् ॥

बिभर्ति वर्षासमये कीदृशं कं नभस्तलम् ।
[1]आरम्भे ज्वररोगस्य किं कर्तव्यं शरीरिणाम् ॥ ८४ ॥

॥ बहुलं घनम्, बहुलङ्घनम् ॥ २९ ॥

बिभर्तीति । अत्र भेदकभेद्ययोः बहुलं घनमिति व्यस्तोत्तरे । अर्थान्तरे बहुलङ्घनमिति समस्तमुत्तरम् ॥

कीदृशी भजते [2]चारु का शाणोल्लिखितं मणिम् ।
विततिः कीदृशी नानावस्तुविक्रयिणां [3]विशाम् ॥ ८५ ॥

॥ पृथुला आभा, पृथुलाभा ॥ ३० ॥

कीदृशीति । भेदकभेद्ययोः पृथुला आभेति व्यस्तोत्तरे । अर्थान्तरे पृथुलाभेति समस्तमुत्तरम् ॥

अथ नामाख्यातम्—

सुप्तिङन्ततया द्वेधा भिन्नमेकं यदुत्तरम् ।
यत्र [4]श्लिष्टं भवति तन्नामाख्यातं [5]विदुर्बुधाः ॥ ८६ ॥

अथ नामाख्यातम् । तल्लक्षणमाह— सुप्तिङन्ततयेति । श्लिष्टमेकं यत

1. ‘ज्वररोगेण युक्तस्य शरीरं कीदृशं भवेत्’ ङ.
2. ‘भव्यं’ ङ. 3. ‘विशाम् ॥ अट्टशूलानामित्यर्थः । पृथु’ ग.
4. ‘क्लिष्टं’ च. 5. ‘बुधा विदुः ॥’ ग.

पदं सुप्तिङन्ततया द्वेधा भिन्नं सत् प्रश्नयोरुत्तरं भवेच्चेत् तन्नामाख्यातमुच्यते ॥

तद् यथा—

प्रणतान्[1] किं वितन्वाते पार्वतीपरमेश्वरौ ।
कः पुनर्नहुषस्याभूदारूढस्य त्रिविष्टपम् ॥ ८७ ॥

॥ पातः ॥ १ ॥

उदाहरति- यथेति । *क इति । अत्र प्रश्नद्वये एकस्य पातः पतनमिति सुबन्तमुत्तरम् । अन्यत्र पातः पालयत इति तिङन्तमुत्तरम् ॥

शिशिरापगमे कीदृङ्मन्दिरं धनिनामपि ।
किमाचरन्ति सम्प्रेक्ष्य डाम्भिकं[2] पुरुषं बुधाः[3] ॥ ८८ ॥

॥ अपहसन्ति ॥ २ ॥

शिशिरेति । अत्राद्यप्रश्नस्य अपहसन्तीति सुबन्तमुत्तरम् । हसन्ती-रहितमपहसन्ति । द्वितीयस्य अपहसन्ति अपहासं कुर्वन्तीति तिङन्तमुत्तरम् ॥

आस्ते धराधरे कस्मिन्नद्रिराजसुतापतिः ।
अस्य[4] वाक्यस्य कः शेषो रात्राविन्दुरसाविति ॥ ८९ ॥

---

* 'कः पुनर्नहुषस्याभूदा०' इति स्याद् व्याख्यानुसारी श्लोकारम्भः ।

---

१. 'नमतां किं' च. २. 'निर्गुणं' ङ. ३. 'नराः' ग.

४. 'कथं पयोधरापाये भवति क्षणदापतिः' ॥ ङ.

॥ राजते ॥ ३ ॥

भवन्ति वर्षासमये कीदृशा गिरिनिर्झराः ।
गुल्मान्वितं क्षुद्रवनं कीदृशं जगतीतले[1] ॥ ९० ॥

॥ नदन्ति ॥ ४ ॥

भवन्तीति । अत्राद्यप्रश्नस्य नदन्ति दन्तिरहितमिति सुबन्तमुत्तरम् । द्वितीयस्य नदन्ति स्वनन्तीति तिङन्तमुत्तरम्* ॥

आभीरजातौ सञ्जातः कस्मै कन्यां प्रयच्छति ।
रक्षार्थिनो मानुषस्य[2] किं वचः स्वामिनं प्रति ॥ ९१ ॥

॥ गोपाय ॥ ५ ॥

आभीरेति । अत्र गोपायेति श्लिष्टं पदमेकं पूर्वार्धोत्तरार्धस्थितयोः सुप्तिङन्तयोः पदयोर्द्वेधा भिन्नमुत्तरं भवति । गोपाय गोपालायेति सुबन्तम् । गोपाय रक्षेति तिङन्तम् ॥

अनुकूलो मरुत् कूलं सिन्धोर्नावं करोति किम् ।
भवनं शूद्रजातीनां कीदृशं [3]क्षितिमण्डले ॥ ९२ ॥

---

* इतः परं व्याख्यायां— 'वसुन्धरेति। अत्राद्यप्रश्नस्य सस्नुः सलानुरिति सुबन्तमुत्तरम्। द्वितीयप्रश्नस्य स्नानमकुर्वन्निति तिङन्तोत्तरम्।' इति वर्तते। किन्तु मूलश्लोको मातृकासु न दृश्यते ।

---

१. 'धरणीतले' ख. ङ. च.   २. 'मनुष्यस्य' ख. ग. च.
३. 'स्यान्महीतले' ङ.

॥ नयति ॥ ६ ॥

*भवनमिति। अत्राद्यप्रश्नस्य नयति यतिरहितमिति सुबन्तमुत्तरम्। द्वितीयप्रश्नस्य नयति प्रापयतीति तिङन्तमुत्तरम् ॥

‡किं चक्रुः पाण्डुतनयाः सर्वामुर्वीं हतारयः।
किं प्रार्थ्यते प्रथमतो मानवैः पृथिवीतले ॥ ९३ ॥

॥ आयुः ॥ ७ ॥

§किं चक्रिरे यमपुरं राक्षसा रामविद्विषः।
निर्वर्तने वाजिमेधक्रतोः किं साधनं पुनः ॥ ९४ ॥

॥ ययुः ॥ ८ ॥

धृतराष्ट्रस्य भार्यायाः का स्यात् पाण्डुकुटुम्बिनी।
कृतपुण्यचयः स्वर्गं फुरुषः किं विधास्यति ॥ ९५ ॥

॥ याता ॥ ९ ॥

---

* 'भवनं शूद्रजातीनां०' इति स्याद् व्याख्यानुसारी श्लोकारम्भः।

‡ ख च पाठयोः श्लोकोऽयं 'किं चक्रिरे' (श्लो० ९४) इत्यस्यानन्तरं वर्तते।

§ ङपाठे श्लोकोऽयं नास्ति।

---

१ 'परम् ॥' ग.

धृतराष्ट्रस्येति । अत्राद्यप्रश्नस्य याता भर्तुर्भ्रातृभार्या यातेत्युच्यते । इदं सुबन्तमुत्तरम् । द्वितीयप्रश्नस्य तु याता 'या प्रापण' इति धातोर्लुटि रूपम् । तिङन्तमुत्तरम् ॥

*अस्य वाक्यस्य कः शेषो हरे त्वं वारिधाविति ।
वसुन्धराया वहने कस्मिन्नास्ते प्रगल्भता ॥ ९६ ॥

॥ शेषे ॥ १० ॥

‡विश्वमिति । अत्राद्यप्रश्नस्य शेषे इति सुबन्तमुत्तरम् । द्वितीयप्रश्नस्य शेपे 'शीङ् स्वप्ने' इति धातोर्लिटि मध्यमपुरुषैकवचनम् । स्वपिषीत्यर्थः । इदं तिङन्तमुत्तरम्$ ॥

वने रामं घनं मत्वा किं कृतं शिखिभिर्मुदा ।
कैलासशैलनिलयं मिथुनं तच्च कीदृशम् ॥ ९७ ॥

॥ अनादि ॥ ११ ॥

कैलासेति । अत्र प्रश्नयोरनादीति सुप्तिङन्तयोर्द्विधा भिन्नमेकं

---

* ख च पाठयोः श्लोकोऽयं नास्ति ।

‡ 'विश्वम्भराया वहने०' इति स्याद् व्याख्यानुसारी श्लोकारम्भः ।

$ अतः परं व्याख्यायां— 'भासन्त इति । अत्राद्यप्रश्नस्य भानि नक्षत्राणीति सुबन्तमुत्तरम् । द्वितीयप्रश्नस्य भानि इति 'भा दीप्ता'विति धातोर्लोटि उत्तमपुरुषैकवचनम् । तिङन्तमुत्तरम् ॥' इति दृश्यते । परं तु नैकस्मिन्नपि ग्रन्थे मूलश्लोको दृश्यते ।

श्लिष्टमुत्तरम् । तत्र अनादि आदिरहितमिति सुबन्तमुत्तरम् । अन्यत्र अनादि शब्दितमिति तिङन्तमुत्तरम् ॥

इति सेनापतिविरचितायां चित्ररत्नाकरव्याख्यायां
शरच्चन्द्रिकायां पञ्चमः परिच्छेदः ॥

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
जातस्तस्य कृतौ हि पञ्चमपरिच्छेदोऽ[1]नुजत्वं गते
पाञ्चालीपरिणीतिसं[2]ज्ञककृतेः श्रीचित्ररत्नाकरे ॥

---

१. ‘ भुजे द्रौपदीकल्याणाख्यकृतेर्मनोहरतरश्रीचित्र ’ ङपाठः

२. ‘ संश्चित्र ’ क. ग.

षष्ठः परिच्छेदः ।

अथातिचित्राणि—

प्रश्नश्लोकान् प्रथमतः कथयित्वा ततः क्रमात् ।
उत्तरं चोत्तरश्लोकैरतिचित्रैरिहोच्यते ॥ १ ॥

अथातिचित्राख्यः परिच्छेदो व्याक्रियते— प्रश्नश्लोकानिति । अत्र प्रथमतः प्रश्नश्लोकान् प्रश्नरूपान् श्लोकान् कथयित्वा तत उत्तरश्लोकैरतिचित्रैः क्रमात् प्रश्नक्रमेणोत्तरं चोच्यते । प्रश्नश्लोकस्थितस्य प्रथमप्रश्नस्य चित्रश्लोकस्थितं प्रथमं पदमुत्तरम् । द्वितीयप्रश्नस्य चित्रश्लोकस्थं द्वितीयं पदमुत्तरम् । एवं सर्वत्र द्रष्टव्यम् ॥

विलिख्य श्लोकरूपेण चित्रश्लोकाननन्तरम् ।
सौकर्यार्थं विलिख्यन्ते पदरूपेण ते पुनः ॥ २ ॥

विलिख्येति । प्रथमं चित्रश्लोकान् श्लोकरूपेण विलिख्य पश्चात सौकर्यार्थं ते पदरूपेण विलिख्यन्ते । पदविभागस्य सुबोधार्थमित्यर्थः ॥

अथ सर्वतोभद्रस्य प्रश्नश्लोकः—

भासन्ते के वधूभिः सुहितसुरगणाः के रवस्यार्वतः का
सम्बुद्धिः प्रार्थ्यते का कथमिव धनुषो यष्टिरज्या सुराली ।
कीदृक् कीदृक् सुसैन्यं भवति वसति का कौशिके तारनादाः
केऽरण्ये के चरन्ति स्फुरति च कलिका का चिता चञ्चरीकैः ॥३॥

---

१. 'द्रप्रश्न' ख, च.

अथ सर्वतोभद्रश्लोकः[1]—

व रा ह वा वा ह रा व रा ज ता न न ता ज रा।
ह ता रि का का रि ता ह वा न का रु रु का न वा ॥ ४ ॥

अथास्य[3] श्लोकस्य पदविभागः[4]—

॥ वराः, हवाः, वाहराव, राजता, ननता, अजरा, हतारि, काकारिता, आहवानकाः, रुरुकाः, नवा ॥ इति।

भासन्ते के वधूभिरिति[5] प्रश्नश्लोके ये प्रश्ना उक्तास्तेषु प्रथमप्रश्नस्य वरा इति सर्वतोभद्रश्लोके प्रथमं[6]पदमुत्तरम्। द्वितीयं[7]प्रश्नस्य द्वितीयम्[8]। तृतीयस्य[9] तृतीयम्। एवं सर्वत्र द्रष्टव्यम्।

सर्वतोभद्रामिति किञ्चिच्चित्रम्। तत् प्रथमं वक्तुं तदादौ तत्प्रश्नश्लोकं कथयति– भासन्त इति। वधूभिः के भासन्त इति प्रथमः प्रश्नः। सुहितसुरगणाः सन्तर्पितदेवगणाः के इति द्वितीयः प्रश्नः। अर्वतः अश्वस्य रवस्य शब्दस्य का सम्बुद्धिरिति तृतीयः। का प्रार्थ्यत इति चतुर्थः। अज्या अमौर्वीका धनुषो यष्टिः कथमिव भवतीत्यसौ पञ्चमः। सुराली देवपङ्क्तिः कीदृगिति षष्ठः। सुसैन्यं कीदृग् भवतीति सप्तमः। कौशिके घूके का वसतीत्यष्टमः। के तारनादा अत्युच्चशब्दा इति नवमः। अरण्ये के

१. 'कस्योत्तरश्लोकः' ख. च. २. 'वा ॥ वराः' ख.
३. 'अस्य श्लो' ग. ४. 'स्य पदविभागः क्रियते' ङ.
५. 'रिति ये ये' ख, 'रिति ये' ङ, 'रित्यादि ये ये' च.
६. 'मं पद' ग. ७. 'यस्य द्वितीयमित्यादि द्रष्टव्यम्' ख.
८. 'यं पदम्। एवं' ग, 'यपदम्। तृती' ङ.
९. 'यप्रश्नस्य तृती' च.

सञ्चरन्तीति दशमः । चञ्चरीकैर्भृङ्गैरञ्चिता का कलिका स्फुरतीत्येकादशः ।

अथ सर्वतोभद्रश्लोकः— 'वरा हवा वाहराव राजता ननता जरा । हतारि काकारिताहवानका रुरुका नवा ॥' पदविभागश्चास्य श्लोकस्य— 'वराः हवाः, वाहराव, राजता, ननता, अजरा, हतारि, काकारिता, आहवानकाः, रुरुकाः, नवा' । एतानि एकादश पदानि प्रश्नश्लोकस्थितानामेकादशप्रश्नानां यथासंख्यमुत्तराणि भवन्ति । अथ सर्वतोभद्रस्योद्धारः-

'चतुरश्रस्यान्तराले पङ्क्तीरष्टौ प्रकल्पयेत् ।
अष्टाष्टकोष्ठसहितास्तेषु कोष्ठेष्वनुष्टुभः ॥
चतुरो विलिखेत् पादान् द्वात्रिंश(त्स्वा? त्या)दितः क्रमात् ।
आरभ्य पञ्चमीं पङ्क्तिं पादांस्तान् व्युत्क्रमाल्लिखेत् ॥
अवशिष्टेषु कोष्ठेषु सर्वतोभद्रनाम तत् ॥

अथ कविकाव्यनामचक्रबन्ध[1]स्य प्रश्नलोकः—

पीतं किं [2]सहितः कया भृगुपतिः कीदृक् सुराणां जगत्
कीदृक् तच्च जयद्रथस्य समरं [3]क्वास्ते च लक्ष्मीवपुः ।
कीदृक् पद्मदृशः कुचाहतिपदं किं योषि[4]तः काध्वगा-
क्रान्ता का सुरवा च कीदृगपरा सन्ध्या चमूः कीदृशी ॥ ५ ॥

[5]अथ चक्रबन्धश्लो[6]कः—

---

1. 'न्धश्लोकस्य प्रश्न' ख ङ. च.
2. 'भुवने भृशं भृगु' ङ.
3. 'कीदृक् क लक्ष्मी' ङ.
4. 'तां का' ख. च.
5. 'अथ उत्तरम्-' ख.
6. 'कस्योत्तरश्लोकः-' च.

कल्याणाचलरोचिरन्तकसपत्नासास्त्रविद्याश्रिया
दृप्य[1]चक्रममित्रबाधकपृषत्कव्यूहकृत्तार्जुनि[2] ।
पद्माक्षे कचभारशोभि कमनोरः पद्धतिः कोकिला
लाक्षाश्रीकघना दृढद्विपमुखायातध्वनिद्योतला ॥ ६ ॥

पद[3]विभागस्तु—

॥ कल्याणाचलरोचिः, अन्तकसपत्नासास्त्रविद्याश्रिया, दृप्य[4]-चक्रम्, अमित्रबाधकपृषत्कव्यूहकृत्तार्जुनि[5], पद्माक्षे, कचभारशोभि, कमनोरः, पद्धतिः, कोकिला, लाक्षाश्रीकघना, दृढद्विपमुखायातध्वनि-द्योतला[6] ॥

चक्राकारेण लिखितेऽस्मिन् श्लोके चतुर्थवलये 'चक्रकविकृति'-रिति, सप्तम[7]वलये 'चित्ररत्नाकरः' इति[8] च कविकाव्यनामनी वर्तेते ॥

अथ कविकाव्यनामचक्रबन्धश्लोकस्य प्रश्नश्लोकः– पीतमिति । अत्र श्लोके एकादश प्रश्नाः । तेषां चित्रश्लोकस्थितानि एकादश पदान्युत्तराणि भवन्ति । कानि पुनस्तानीत्याकाङ्क्षायामाह– कल्याणाचलरोचिः हेमाद्रि-महः । इदं पीतं किमिति प्रश्नस्योत्तरम् । एवमेव सर्वत्रोन्नेयम् । अथ चक्र-बन्धोद्धारः–

---

१. 'दीव्यच्च' ख.   २. 'नौ' ग.
३. 'पदम्' ख.   ४. 'दीव्यच्च' ख.   ५. 'नौ' ग.
६. 'ला ॥ अत्र प्रश्नश्लोके एकादश प्रश्ना उक्ताः । तेषामुत्तराणि चक्रबन्ध-श्लोके एकादश पदानि वर्तन्ते । यथासंख्यं योजनीयम् । षडश्रवचक्रा 'ग.
७. 'मे वलये' ख.   ८. 'ति कवि' ङ.

'वक्ष्यते षडरं चक्रं प्रत्यरतं नवाक्षरम् ।
त्रयाणामपि पादानां दशमं कर्णिकाक्षरम् ॥
आदितः स्वस्वधुर्यारैस्त्रयः पादाश्चतुर्थगाः ।
वर्णाः षष्ठान्त्यमारभ्य संवदन्तेऽन्तिमाक्षरैः ॥
मध्ये द्वौ द्वौ विसंवादौ षट्स्वरेषु क्रमाद्भवेत् ।
चतुर्थैः सप्तमैर्वर्णैर्वर्णनं काविकाव्ययोः ॥

अथ मुरजबन्धस्य प्रश्न[1]श्लोकः—

[2]राज्ञः का जयकारिणी घनघटा कीदृक् सतां कः प्रियः
कीदृक् तोयविवर्जिता च सरसी सूक्तिः कवेः कीदृशी ।
कीदृग् धैर्यवतां ततिः सुमनसां वृन्दैर्न का स्पृश्यते
फुल्ला केन युता प्रसूनकलिका क्षोणीरुहोदञ्चिता ॥ ७ ॥

अथ मुरजबन्ध[3]श्लोकः—

से ना सा र ज सा र श्री घ ना सा धु र सा र सा ।
सा र सा र र सा यु क्त भी र सा र ज सा यु ता ॥ ८ ॥

प[4]दविभागस्तु—

॥ सेना, आसारजसारश्रीघना, साधुः, असारसा, सारसाररसा, अयुक्तभीः, रसा, रजसा युता[5] ॥

१. 'श्नः' ख. २. 'नेतुः का' ङ.
३. 'न्धश्लोकः' क, 'न्धस्योत्तरश्लोकः' च.
४. 'पदम्' ख, ५. 'गः' घ.
६. 'ता। एतानि पदानि प्रश्नश्लोकस्थितप्रश्नेन साकं पूर्ववद् यथाक्रमं योजनीयानि' ॥ घ.

अथ मुरजबन्धः— आदौ तस्य प्रश्नश्लोकः । तत्र(नव?अष्टौ)प्रश्ना वर्तन्ते राज्ञः का जयकारिणीत्यादयः । तेषां चित्रश्लोकस्थितानि नव पदान्युत्तराणि प्रश्नक्रमेण भवन्ति । तत्र का राज्ञो जयकारिणीति प्रश्नस्य सेनेत्युत्तरम् । सर्वत्र प्रश्नक्रमेणोत्तरक्रम इत्यनुसन्धेयम् । अथ मुरजबन्धोद्धारः—

चतुष्पङ्क्तिगतान् श्लोकपादान् कृत्वाद्यपादतः ।
तत्रावरोहयेद् वर्णानेकद्वित्रिचतुःक्रमात् ॥
अन्त्याच्च पञ्चषट्सप्ताष्टक्रमादधिरोहयेत् ।
ततस्त्वारोहयेदन्त्यादेकद्वित्रिचतुःक्रमात् ॥
आद्याच्च पञ्चषट्सप्ताष्टक्रमादवरोहयेत् ।
आद्यान्तपादसंवादः स्यादित्थं पठने कृते ॥
आद्यमाद्ये द्वितीयं च तृतीयं च द्वितीयके ।
आद्ये चतुर्थं पञ्चमं च द्वितीये षष्ठसप्तमौ ॥
आद्येऽष्टममथाद्यं तु द्वितीये प्रथमे पुनः ।
द्वितीयं च तृतीयं च द्वितीये तु चतुर्थकम् ॥
पञ्चमं चाद्यके षष्ठसप्तमावष्टमं पुनः ।
द्वितीये तत्तु पूर्वार्धसंवादि स्यान्न संशयः ॥
तृतीयतुर्ययोरेवं पादयोर्विधिमुन्नयेत् ।
तत्तूत्तरार्धसंवादि भवेदत्र न संशयः ॥
उक्तो मुरजबन्धोऽयं कविभिश्चित्रवेदिभिः ॥

अथ गोमूत्रिकाबन्धस्य प्रश्नश्लोकः—

कः कन्दर्पनिषूदनो दनुसुतध्वंसं विधत्ते च कः
कीदृक् पर्वतसार्वभौमदुहिता लोकेन का पूज्यते ।
के कान्ताकुचकुम्भयोर्विदधते शोभामनल्पां पुनः
सङ्ग्रामं कलयन्ति के विरचितासक्तिश्च का मन्मथे ॥ ९ ॥

अथ गोमूत्रिकाबन्धश्लोकः[1]—

ध रा ध र सु ता ने ता क्षी रा ब्धि त न या प तिः ।
सु रा सु र न ता मा ता द्वा रा ग त भ या र तिः ॥ १० ॥

स्पष्टः पदविभागः[3] ॥

अथ गोमूत्रिकाबन्धः । आदौ तस्य प्रश्नश्लोकः— कः कन्दर्पनिषूदन इति । अत्र प्रश्नाः सप्त । चित्रश्लोके उत्तररूपाणि पदानि च सप्त । तान्याह— धराधरसुतानेतेति । अत्र प्रश्नश्लोके प्रश्नाः स्पष्टाः । चित्रश्लोके उत्तररूपाणि पदानि च स्पष्टतराणि । अत्रापि प्रश्नक्रमेणोत्तरक्रमः । अथ गोमूत्रिकाबन्धोद्धारः—

उपरि प्रथमार्धं तु द्वितीयार्धमधो लिखेत् ।
पूर्वार्धे विषमा वर्णा उत्तरार्धे समास्तथा ॥
गोमूत्रिकारवद्ग्राह्या वर्णा एवं पुनः पुनः ।
तत् स्यात् पूर्वार्धसदृशमुत्तरार्धमथोच्यते ॥
उत्तरार्धे च विषमाः पूर्वार्धे च समास्तथा ।
ग्राह्या गोमूत्रवत् तच्चेदुत्तरार्धसमं भवेत् ॥
स स्याद् गोमूत्रिकाबन्धः कविभिः समुदीरितः ।

अथ अर्धभ्रमकस्य प्रश्नश्लोकः[6]—

---

१. 'अथ बन्धश्लोकः' ख. २. 'बन्धः' ग घ ङ., 'बन्धस्योत्तरश्लोकः' च. ३. 'अत्र स्प' घ. ४. 'गः । सर्वं पूर्ववत् ॥' घ. ५. 'कप्रश्न' घ. ६. 'प्रश्नः' ख.

वन्या कीदृगनीकिनी च महती कीदृग्भटो विद्विष-
 श्छिन्द्यात् केन च यौवनेन कलिता पद्मेक्षणा कीदृशी ।
श्रीः कीदृक्छरदश्च योधघटया शोकः कया प्राप्यते
 कास्ते पुंसि जयोत्सुके भवति तद्ब्रह्माद्वयं कीदृशम् ॥ ११ ॥

अथार्धभ्रमक[1]श्लोकः—

मे घ रा जि नि भा ना ग घ टा जि त ज ना सि ना ।
रा जि ता या ता स ना[2] भा जि त या सा जि ता ज नि ॥१२॥

पद[3]विभाग[4]स्तु—

मेघराजिनिभा, नागघटाजितजना, असिना, राजिता, आयातासनाभा[5], जितया, साजिता, अजनि[6] ॥

अथार्धभ्रमकसंज्ञं चित्रम्- प्रथमं तस्य प्रश्नश्लोकः वन्येति । अत्राष्टौ प्रश्ना वर्तन्ते । तेषां चित्रश्लोके मेघराजिनिभेत्यादीनि अष्टौ पदानि यथासंख्यमुत्तराणि भवन्ति । तानि च- मेघराजिनिभा, नागघटाजितजना, असिना, राजिता, आयातासनाभा- (आ ! अ)सनानामाभा (आ ! अ)सनाभा, आयाता असनाभा यस्याः सा तथोक्ता- जितया, साजिता सयुद्धता, अजनि जन्मरहितम् । अथ अर्धभ्रमकस्योद्धारः-

श्लोकपादांस्तु चतुरश्चतुष्पङ्क्तिषु संलिखेत् ।
पादाद्याक्षरैर्मध्येज्या द्वितीयाः सप्तमैः सह ॥

---

१. 'कस्योत्तरश्लोकः' च. २. 'नभा' ख. च.
३. 'पदभक्तिः' ख ४. 'गः' ङ.
५. 'नभा' ख. च. ६. 'नि । सर्वं पूर्ववत् ॥' च.

वर्णास्तृतीयाः षष्ठैश्च चतुर्थाः पञ्चमैः सह ।
प्रथमास्त्वानुलोम्येन चरमाः प्रतिलोमतः ॥
एवं योगे पूर्ववच्चेदर्धभ्रमकनाम तत् ।

*अथाष्टदळपद्मबन्धः । तस्य सार्धः प्रश्नश्लोकः—

आस्ते को भुवि कीदृशो दिनकरो द्यौः[1] स्यात् कया किन्नरी
कीदृग् भोगिवधूः कया लसति खे किं भाति कस्मिन् कलिः[2] ।
वृत्त्या[3] कल्पतरुः कया स्फुरति पूः कीदृक् च का नासिका-
सम्बुद्धिश्च कयानृतावगमनं दीनस्य धीः कीदृशी ॥
पद्मः कीदृगनुद्धृतो युवतिदृक् कीदृक् सदा किं पिबेद्
गोमान् ग्रीष्मऋतावुपेयुषि सरःश्रेणी[4] पुनः कीदृशी ॥ १३ ॥

अस्योत्तरश्लोकः[5]—

ना कोकस्तोमरक्षी कृतबहुळतरक्षेमभक्त्या[6] सगाना
नागासक्त्या भमक्षे निखिलजननुतत्यागवत्या ससेना ।
नासे सत्यावगत्या वितरणसफलश्रीधनक्ष्मापलीना
नाळी पक्ष्मानघश्रीरधिकरसयुतक्षीरमस्तोककोना ॥ १४ ॥

पदविभागस्तु—

ना, कोकस्तोमरक्षी, कृतबहुळतरक्षेमभक्त्या[7], सगाना, नागा-

---

* खपाठे अर्धभ्रमकानन्तरं रथबन्धः, गूढचतुर्थः, अर्धपादा (रोहा)वरोहः ; ङपाठे गूढचतुर्थः, अर्धपादारोहावरोहः इति दृश्यते।

---

१. 'द्यस्था कया' च. २. 'कविः' च.
३. 'सत्त्वाकल्प' च. ४. 'सुरश्रेणी' घ.
५. 'अथ पद्मबन्धश्लोकः' ग. घ. ६,७. 'बहुलतमक्षे' ग. घ.

सत्त्या, भम्, अक्षे, निखिलजननुतत्यागवत्या, ससेना, नासे, सत्यावगत्या, वितरणसफलश्रीघनक्ष्मापलीना, नाळी, पक्ष्मानघश्रीः, अधिकरसयुतक्षीरम्, अस्तोककोना ॥

अथाष्टदळपद्मबन्धः— सार्धश्लोकेन तत्प्रश्ना उच्यन्ते। आस्ते इत्यादि। अस्मिन् सार्धप्रश्नश्लोके षोडश प्रश्ना वर्तन्ते। तेषां चित्रश्लोके ना कोकस्तोमरक्षीत्यादिषोडशपदानि उत्तराणि भवन्ति। अस्य श्लोकस्य पदविभागः क्रियते- ना, कोकस्तोमरक्षी, कृतबहुळतरक्षेमभक्त्या, सगाना, नागासक्त्या, भम्, अक्षे, निखिलजननुतत्यागवत्या, ससेना, नासे, सत्यावगत्या, वितरणसफलश्रीघनक्ष्मापलीना, नाळी, पक्ष्मानघश्रीः, अधिकरसयुतक्षीरम्, अस्तोककोना। एतानि षोडश पदानि आस्ते को भुवीति सार्धप्रश्नश्लोकस्थितानां षोडशप्रश्नानां यथाक्रममुत्तरत्वेन बोद्धव्यानि। अथ पद्मबन्धोद्धारः—

वक्ष्यतेऽष्टदळं पद्मं सप्तवर्णान् दळेषु च।
सकर्णिकान् लिखेद् दिक्षु विदिक्षु तु विकर्णिकान् ॥
प्रवेशनिर्गमाभ्यां तु दिशि ते स्युश्चतुर्दश।
व्यवधानेन तानाद्ये दळेऽन्यत्र त्वनन्तरान् ॥

अथ शृङ्खलाबन्धस्य[२] प्रश्नश्लोकः—

सम्पादयन्ति वणिजः किमुदन्वतः का
जाता घनात् क्षरति का क च दण्डनीतिः।
सम्बुद्धिवाक् च विजिते तु कथं सुकीर्तिः
कीदृक् च का नरपतौ वसति विधत्ते ॥ १५ ॥

---

* चपाठे एतदनन्तरं रथबन्धः परं दृश्यते,

---

१. ' ना ॥ अत्रापि पूर्ववत् ॥ अथ शृङ्खला ' घ.
२. बन्धः। तस्य प्रश्न ' घ.

अत्र वसुधाराजितता इत्युत्तरम् । इह वर्णद्वयात्मकपदादुपरितनमेकमेकमादायादाय पूर्वपूर्वमेकमेकं वर्णं हित्वा हित्वा उत्तराणि भवन्ति । अन्त्यप्रश्नस्याखण्डत्वेनोत्तरं भवति । यथा— वसु, सुधा, धारा, राजि, जित, तता, वसुधाराजितता ॥

अथ शृङ्खलाबन्धस्य प्रश्नश्लोकः— सम्पादयन्तीति । वसुधाराजिततेत्युत्तरम् । इह वर्णद्वयात्मकपदादुत्तरमुत्तरमेकमेकं वर्णमादाय पूर्वपूर्वमेकमेकं हित्वा हित्वोत्तराणि भवन्ति । अन्त्यप्रश्नस्याखण्डत्वेनोत्तरम् । यथा— वसु, सुधा, धारा, राजि, जित, तता, वसुधाराजिततता ॥

अथ रथबन्धः—

[2] हेलिमहाधृतभूतिः कोऽमलबोधप्रदो दयाजलधिः ।
रतिपतिदमनो[3] विशदस्मित[4]भूधीराञ्चितोल्लसद्ध्यानः[5] ॥ १६ ॥

---

१. ‘ कं वर्णमादा ’ ग, ‘ कवर्णमादा ’ घ.

२. ‘ शैत्यलसद्द्विजराजद्युतिशालिजटाच्छटास्फुरन्मौलिः ।
सुरनुतमहिमा जेता स्मरस्य को मोदभूश्च कायिनतः‡ ॥ ख.

३. ‘ पतिमदघ्नविशद ’ च. ४. ‘ तवान् धीराहितोल्ल ’ घ.

५. ‘ नः ॥ उत्तरं— हेमभूधरशरासन इति ॥ ’ च.

---

‡ ‘ नतः ॥ अयमन्तर्लापिश्लोकः । इदमार्यावृत्तम् । प्रश्नोत्तरयोः सत्वादन्तर्लापित्वम् । शैलराजसुतादयित इत्युत्तरम् । अत्र पञ्च प्रश्नविशेषणभूताः । तैर्युक्तः क इति प्रश्नार्थः । कायिनतः देहिभिर्नत इति । अस्योद्धारः— आदावन्ते........नवोत्तरम् ॥(P.152. see com)श्लोकान्तरं— हेलिमहा० ’’ च.

इदमार्यावृत्तम्* ।

अथ रथबन्धः— हेळिमहा इति । इदमार्यावृत्तम् । श्लोके एव प्रश्नोत्तरयोः सत्त्वादन्तर्लापिश्लोकोऽयम् । उत्तरं तु हेमभूधरशरासनः इति । अत्र सप्त विशेषणानि । तैर्युक्तः क इति प्रश्नार्थः । तत्र हेमभूधरशरासन इत्युत्तरम् । अस्योद्धारः—

आदावन्ते चैककोष्ठं मध्ये सप्त च पङ्क्तयः ।
त्रिपञ्चसप्तनवकसप्तपञ्चत्रिकोष्ठकाः ॥
चत्वारिंशत्कोष्ठकेषु सैकेषु विलिखेत् क्रमात् ।
आर्यावर्णांस्तावतस्तु मध्ये वर्णा नवोत्तरम् ॥

[1][2]अर्धपादारोहावरोहस्य प्रश्नश्लोकः—

प्रार्थ्याः के क्व वितष्ठतेऽसुहरता सम्बुद्धिशब्दो रिपौ
कीदृक् कीदृगनीकभूर्मधुरिपोर्वक्षःस्थली कीदृशी ।
कीदृक् स्याज्जगतीतले पितृवनं कीदृक् ततिर्वादिनां
वापी कीदृगगाधवारिसहिता कीदृक्छरच्छर्वरी ॥ १७ ॥

[3]अथास्योत्तरश्लोकः—

---

* इतः परं गपाठो नास्ति ।

---

१. 'वृत्तम् । श्लोके एव प्रश्नोत्तरयोः सत्वादन्तर्लापि । उत्तरं तु हेमभूधरशरासन इति । अत्र सप्त विशेषणानि । तैर्युक्तः क इति प्रश्नार्थः । हेमभूधरशरासन इत्युत्तरम् । अस्योद्धारः– 'आदावन्ते ...... नवोत्तरम् ॥' (sea com)अथार्धपादा' घ
२. 'अर्धपादावरोहस्य' ख. च. ३. 'अथास्य चित्रश्लोकः' ख, 'अथ चित्रश्लोकः' ग. ङ.

सु ता ग रे ऽरे ग ता सु मा न वा[1] शि शि वा न मा ।
प ला दि का का दि ला प भा सु रा शि शि रा सु भा ॥

पदविभागे[2]स्तु— सुताः, गरे, अरे, गतासुमानवा[3]शिशिवा, अनमा, पलादिकाकादि, लापभासुरा, शिशिरा, सुभा[4] ॥

अथार्धपादारोहावरोहाख्यं चित्रम् । आदौ तस्य प्रश्नश्लोकः- **प्रार्थ्याः क** इति । अत्र श्लोके नव प्रश्नाः । तेषां चित्रश्लोके सुता इत्यादि नव उत्तराणि । आनुलोम्येन पठितानां चतुर्णां प्रातिलोम्येन पठने पादपूर्तिः स्यात् । यथा- सुता गरेऽरे गतासु इति । उपरितनपादत्रयेऽप्येवमेव द्रष्टव्यम् । सुबोधार्थं चित्रश्लोकपदानि लिख्यन्ते- सुता, गरे, अरे, गतासुमानवाशि-शिवा, पलादिकाकादि, लापभासुरा, शिशिरा, सुभा ॥

अथ पा[5]दारोहावरोहस्य प्रश्नश्लोकः—

कीदृग्[6]धन्विघटा रणे पुरभिदः का वल्लभा कर्मणः
कः कर्ता विकृताकृतिश्च विततिः क[7]व्याशिनां कीदृशी ।
गङ्गा कीदृगपां निधेश्च तनया कास्ते कया राजते
रत्नं तिष्ठति शारदा क्व च पुनः केनाङ्गमाच्छाद्यते[8] ॥ १९ ॥

[9]अथ पादारोहावरोहस्योत्तरश्लोकः—

---

१. 'या शशि' घ. २. 'भागः' ख. ङ.
३. 'वाशशि' घ. ४. 'सुभा ॥ एतानि पदानि प्रश्नैर्यथा-संख्यं योजनीयानि ॥ अथ पादा' घ. ५. 'पादावरोहस्य प्रश्नः' ख. च.
६. 'कीदृक् चण्डरतौ वधूः पुर' ख. च. ७. 'व्यादिनां' ख.
८. 'ते ॥ कीदृक्षा रणरङ्गके इति पाठान्तरम् ॥ अथ' च.
९. 'अथ पादावरोहः' ख, 'अथ पादारोहावरोहः' घ, 'अथ पादावरोह-स्योत्तरश्लोकः' च, 'अथास्योत्तरश्लोकः' ङ.

कैा य दा र द ना ळी का का ळी ना द र दैा य का ।
सा स वा व न जे चा रु रु चा जे न व वा स सा ॥ २० ॥

पैदविभागस्तु—

कैायदारदनाळीका, काळी, ना, दरदौयका, सासवा, वनजे, चारुरुचा, अजे, नववासस्सैा ॥

अथ पादारोहावरोहस्य प्रश्नश्लोकः— कीदृगिति। अत्र श्लोके नव प्रश्नाः। तेषां चित्रश्लोके कायदारदनाळीका इत्यादीनि नव पदानि यथाक्रममुत्तराणि। तानि तु– कायदारदनाळीका, काळी, ना, दरदायका, सासवा, वनजे, चारुरुचा, अजे, नववाससा । अत्र पादस्य आरोहोऽवरोहश्च द्रष्टव्यः॥

अथैार्धारोहावरोहस्य प्रश्नश्लोकः—

कीदृङ्मूर्तिर्भीमसेनस्य कीदृक्
प्रौढा भर्त्री कीदृशी शम्भुसेवा।
ैसेनोदारा कीदृशी कोकिला स्यात्
कीदृक् चैत्रे मासि कीदृक् च नारी ॥ २१ ॥

---

१. 'कायि' ग. ङ. २. 'दायि' घ. ङ.
३. 'पदम्' ख. ४. 'कायि' घ. ङ. ५. 'दायि' घ. ङ.
६. 'सा ॥ एतानि पदानि पूर्ववद् योजनीयानि। अथा' ग, 'सा ॥ कायदारदनाळीना इति च पाठान्तरम्। अथा' च.
७. 'थार्धावरोहप्रश्नः' ख, 'थार्धावरोहस्य प्रश्नश्लोकः' च.
८. 'केनोदारा' ख. च

अथास्योत्तरश्लोकः[१]—

सा ह सा न घ सा रा सा ला पा भू ह रि दा र दा ।
दा र दा रि ह भू पा ला सा रा सा घ न सा ह सा ॥२२॥

पदविभागस्तु[२]—

साहसानघसारा, सालापा, भूहरिदारदा, दारदारिहभूपाला, सारासा, घनसाहसा[३] ॥

अथार्धारोहावरोहाख्यचित्रस्य प्रश्नश्लोकः— कीदृङ्मूर्तिरिति । अत्र श्लोके षट् प्रश्नाः । तेषां चित्रश्लोके साहसानघसारेति षट् पदानि यथाक्रममुत्तराणि । तानि च- साहसानघसारा, सालापा, भूहरिदारदा; अस्यार्थः- भूर्भूमिः हरिदारा लक्ष्मीः, ते ददातीति तथोक्ता । दारदारिहभूपाला- दारं दारणं तद्ददतीति दारदाः । तादृशान् अरीन् हन्तीति दारदारिहा । तादृशो भूपालो यस्याः सा तथोक्ता । सारासा आराससहिता । घनसाहसा । इदमारोहेण पठितं पूर्वार्धम् । अवरोहेणोत्तरार्धम् ॥

अथ श्लोकारोहावरोहौ[४][५]—

तत्र आरोहस्य प्रश्नश्लोकः[६]—

का गन्धग्रहणं करोति रजनी कीदृक् सुखं रागिणां[७]
कुर्यात् का तिमिरं निहन्ति भुवि का जागर्ति का कार्मुके ।

---

१. 'अथोत्तरश्लोकः' ख. च, 'अथ चित्रश्लोकः' घ.
२. 'पदम्' ख.
३. 'सा ॥ सर्वं पूर्ववत् । अथ' घ.
४. 'श्लोकावरोहः' ख.
५. 'हः' घ.
६. 'हश्लोकस्य प्रश्नश्लोकः' ख. घ. ङ.
७. 'णः' च.

वामाक्षीकबरी च कीदृगळिनां कार्येषु को वर्तते
कीदृक् चारुतरा पुरी च सरसी कीदृक् शरद्वासरे ॥ २३ ॥

अथारोह[1]स्योत्तरश्लोकः—

ना सि का त त भा रा मा भा जी वा घ न दा म का ।
का ळि मा व न जा भा भू वा पी सा र स मा लि नी ॥ २४ ॥

प[2]दविभा[3]गस्तु—

नासिका, ततभा, रामा, भाः, जीवा, घनदामका, काळिमा, वनजाभाभूवापी, सारसमालि[4]नी ॥

अथावरोह[5]स्य प्रश्नश्लोकः—

आस्ते को जलदे ततिस्सुमनसां कीदृग्घृतप्राशिनां
कायः कीदृगधोक्षजेन धरणीभारो हृतः कीदृशा ।
का भृङ्गी भुवि कीदृशी सुरगवी कीदृक् चमूर्भूभुजां
रत्याः काभिमताश्वगाश्रसमये कीदृक्छिदा केन वा ॥ २५ ॥

अथावरोह[6]स्योत्तरश्लोकः—

नी ळि मा स र सा पी वा भू भा जा न व मा लि का ।
का म दा न घ वा जी भा मा रा भा त त का सि ना ॥ २६ ॥

---

१. 'हस्योत्तरम्' ख, 'हश्लोकः' घ. २. 'पदम्' ख.
३. 'भागः' घ. ङ. ४. 'नी । सर्वं पूर्ववत् ॥ अथा' घ.
५. 'हश्लोकस्य प्रश्नः' ख, 'हश्लोकस्य प्रश्नश्लोकः' ग.
६. 'हश्लोकः' ख. घ. ङ.

पदविभागस्तु[1]—

नीलिमा, सरसा, पीवा, भूभाजा, नवमालिका, कामदा, अनघवाजीभा, माराभा, ततका, असिना[2] ॥

अथ श्लोकारोहावरोहौ— तत्र आरोहस्य प्रश्नश्लोकः । **का गन्धग्रहणमित्यादि** । अत्र श्लोके नव प्रश्नाः । चित्रश्लोके च नव पदान्युत्तराणि । तानि च– नासिका, ततभा, रामा, भाः, जीवा, घनदामका, कालिमा, वनजाभाभूवापी– वनजाभानां भुवः स्थानानि वाप्यो यस्यां सा तथोक्ता । सारसमालिनी, स्पष्टार्था ।

अथावरोहस्य प्रश्नश्लोकः— **आस्ते को जलद इति** । अत्र श्लोके दश प्रश्नाः । तेषां चित्रश्लोके दशपदानि यथाक्रममुत्तराणि । तानि तु– नीलिमा, सरसा, पीवा, भूभाजा, नवमालिका, कामदा, अनघवाजीभा, माराभा, ततका, असिना । एतानि दशप्रश्नानां यथाक्रममुत्तराणि ॥

अथ पादैकाक्षरस्य[3] प्रश्नश्लोकः —

सृष्टं केन जगत् सुरेण न सुखं सम्प्राप्यते केन वा
नो[4] कास्ते चिकुरैः[5] क चूतविततिः कीदृक् च कास्योद्भवा ।
कीदृक्षौ बलभद्रकंसमथनौ बाल्ये बलायुक्तता
[6]केवौघे क्व सुखं झषस्य च पदं किं वोपमावाचकम् ॥ २७ ॥

---

१. ‘ पदम्– ’ ख, ‘ पदविभागः ’ ङ. २. ‘ ना ॥ सर्वं पूर्ववत् । अथ ’ ग. ३. ‘ पादैकाक्षरश्लोकस्य प्रश्न ’ ख, पदाक्षरश्लोकस्य प्रश्नः– ’ ग. ङ. ४. नकास्ते चिकुराः क ’ ख. ग, ‘ नन्वास्ते कुरवः क ’ च. ५. ‘ राः क ’ ङ. ६. ‘ कौघे वा क ’ ग. ङ.

अथ पादैकाक्षर[1]स्योत्तरश्लोकः—

ना ना न ने न नु न्ने न कौ केऽका क कु का कु का ।
ला ला ली ला लो ल लौ[3] ला वा वा वे व[4] वि वा वि वा ॥

प[5]दविभागस्तु—

नानाननेन, नुन्नेन, कै[6], के, अकाकुकककाकुका, लाला, लीला-लोललौ[7]लौ, अवौ एव[8], विवौ, इव[9] ।

अथ पादैकाक्षरश्लोकस्य प्रश्नश्लोकः— **सृष्टमिति** । अथ चित्रश्लोकः- **नानाननेति** । अस्य पदविभागस्तु- नानाननेन, नुन्नेन, कौ, के, अकाककुक-कुका, लाला, लीलालोलललोलौ, अवौ एव, विवौ, इव । अस्य प्रश्नश्लोके दश प्रश्ना वर्तन्ते । तत् कथं यथाक्रममुत्तरत्वमिति चेन्न । अवाविति पदस्य एवेति पदेन साकमेकोत्तरत्वात् । श्लोकस्थपदानामर्थस्तु— नानाननेन चतु-र्मुखेन । नुन्नेन क्षिप्तेन । कौ भूमौ । के शिरसि । अकाककुकाकुका काक-कुकाकुराहिता । अवावेव छाग एव । विवौ विपक्षिणि । अन्यानि पदानि सुबोधानि ॥

अथार्धैकाक्षर[10]स्य प्रश्न[11]श्लोकः—

कस्योदारजवोऽस्ति कीदृगवनी [12]भीतिः कुतश्छाद्यते
कः कस्मिन् सति भीर्मधोः क्षतिभवं किं का च पुंसो[13] दृढा ।

---

१. 'श्लोकः' ख. ग. ङ. २. 'का के' ख. ग. च.
३. 'ला ला' ख. ४. 'वा वि' च.
५. 'पदम्' ख, 'पदविभागः' ङ. ६. 'का, के' ख. ग. च.
७. 'लालौ' ख. ८. 'व, अविवौ' च. ९. 'व । सर्वं पूर्ववत् । अथा' ग. १०. 'रश्लोकस्य प्रश्नः-' ङ. ११. 'क्षः' ख.
१२. 'भित्तिः' ख. च, 'भीतः' ग. १३. 'से दृ' ख. ग.

का वाक् सन्निहितश्रियः स्मरहरं कं पालयेतीरये-
द्भक्तः कां तिथिमिन्दुरेत्य न भवेद् दृश्यः सुताद्रेश्च का ॥२९॥

अथार्धैकाक्षरस्योत्तरश्लोकः[2]—

रुरोरुरुररेरूरुररीरे[3] रुरुरोररी।
मा मा म मा मा मा मे मी मा म मा मा म मा मु मा[4] ॥३०॥

पदविभागस्तु[5]—

रुरोः, उरुः, अरेः, ऊरुः, अरीरे[6], अरुः, उरोररी[7], मा मा[8] मम अमा माम् एमि इमाम् अमा, माम्, अमाम्, उमा[9] ॥

अथार्धैकाक्षरश्लोकस्य प्रश्नश्लोकः— **कस्योदारेति**। अत्रैकादश प्रश्नाः। तत्र कस्योदारजवोऽस्तीत्यादीनामादौ सप्तप्रश्नानां चित्रश्लोके रुरोरित्यादीनि सप्त पदान्युत्तराणि। अष्टमस्य 'का वाक् सन्निहितश्रिय' इति प्रश्नस्य यद्यपि बहूनि पदान्युत्तराणि तथापि तेषां वाक्त्वेन क्रोडीकारात्। सन्निहिता उपस्थिता श्रीर्यस्य तस्य पुरुषस्य वाक् कीदृशीत्यर्थः। अस्य प्रश्नस्य चित्रश्लोकस्थिता बहुपदात्मिका वागुत्तरम्। तानि कानीति चेदाह— मा मा मम अमा माम् एमि इमाम् अमा इति। अर्थस्तु अम अलक्ष्मीर्मम मा मा। अमा समीपे इमाम् एनाम् मां लक्ष्मीम् एमि श्रयामि। एवंरूपा वागष्टमस्योत्तरं भवति। भक्तः स्मरहरं कं पालयेतीरयेदिति प्रश्नस्य

---

१. 'हरः कं पालयेद् भक्तपो भक्तं कां' च. २. 'श्लोकः–' ख. ग. ङ.
३. 'ररिरे' च. ४. 'मा मो मा मा भि मा मे मी' च.
५. 'गः–' ख. ग. ङ. ६. 'अरिरे' च. ७. 'उरः ररी' च
८. 'मः अम माम् इमाम् एमि' च. ९. 'मा ॥ सर्वं पूर्ववत्। अथै' ग.

मामित्युत्तरम् । इन्दुः कां तिथिमेत्य न दृश्यो भवतीति प्रश्नस्य अमाम् इत्युत्तरम् । अन्यत् सुबोधम् ॥

अथैकाक्षरस्य[1] प्रश्नश्लोकः—

कीदृग्दुष्प्रभुभूस्सुगायकघटा कीदृक् च कार्तस्य वाग्
भेदे किञ्च पदं स्थले सति जले काथार्थकं किं पदम् ।
कीदृग् रात्रिरिनोदयेऽतितुदतः सम्बोधनं किं च के
शब्दास्तत्त्वविकल्पहेत्वधिगतत्वश्रेणिकावाचकाः ॥ ३१ ॥

अथैकाक्षरस्योत्तरश्लोकः[2]—

त ते ति तौ ता त्त त ता ता त ता ते ति तू त्त ता ।
त तो ती ता ति तु त्ते त त त्तो ते ती त ता त तिः ॥३२॥

पदविभागस्तु[3] —

ततेतितौता, आत्तता, तात तात इति, तु, उत्तता, ततः, अतीता, अतितुत्तेत, तत्ता, उत, इति, इतता, ततिः[4] ॥

अथैकाक्षरस्य प्रश्नश्लोकः— कीग्दुष्प्रभुभूरिति । अत्र त्रयोदश प्रश्नाः । तेषां चित्रश्लोके क्रमेणोत्तराणि । चित्रश्लोकस्तु— ततेतितौतेत्यादि । पदविभागस्तु— ततेतितौता, आत्तता, तात तात इति, तु, उत्तता, ततः, अतीता, अतितुत्तेत, तत्ता, उत, इति, इतता, ततिः । कीदृग् दुष्प्रभुभूरिति

१. 'रश्लोकस्य प्रश्नः' ख., 'रश्लोकस्य प्रश्न' ग. ङ.
२. 'रश्लोकः' ख. ग. ङ. ३. 'गः–' ग.
४. तिः ॥ सर्वं पूर्ववत् । अथ' ग.

प्रश्नस्य ततेतितौतेत्युत्तरम् । विस्तृतेतितत्वप्रोता । द्वितीयस्य आत्ततेति । आत्तवीणादिवाद्या । आर्तवाक् केति प्रश्नस्य तात तातेति । भेदे किं पदमिति प्रश्नस्य तु इत्युत्तरम् । जले सति स्थले केति प्रश्नस्य उत्तता सिक्तता । अथार्थकं पदं किमिति प्रश्नस्य ततः इति । इनोदये सति रात्रिः कीदृगिति प्रश्नस्य अतीतेति । अतिशयेन तुदतः सम्बोधनं किमिति प्रश्नस्य अतितुत्तेत ! अतितुत्तया इत ! । तत्त्वादिवाचकशब्दाः के इति प्रश्नस्य तत्ता, उत, इति, इतता, ततिः इत्येतानि पदानि तत्त्वादीनां पञ्चानां क्रमेणोत्तराणि ॥

अथ द्व्यक्षर[1]स्य प्रश्नश्लोकः—

कीदृक् [2]स्यान्मनुजोऽसिदारिततनुः कीदृक् [3]शरत् कीदृशः
क्षीराब्धेर्मथनं चकार मधुजित् का मानुषैकास्पदम् ।
कीदृग्योधकदम्बकं च दिवसो निस्तोयदः कीदृशः
कीदृक् प्रीतिभरं व्यधत्त हृदये का वा प्रलम्बद्विषः ॥ ३१ ॥

अथ द्व्यक्षर[4]श्लोकः—

सा स्र स्स सा र सा रा स स र सी स सु रा सु रः ।
र सा सा सि स सू रो स्र स्सा र सा र र सा सु रा ॥३२॥

[5]पदविभागस्तु—

सास्रः, ससारसाराससरसी, ससुरासुरः, रसा, सासि, ससूरोस्रः,

1. 'रश्लोकस्य प्रश्नः—' ख, 'रश्लोकस्य प्रश्नश्लोकः—' क. ग. ङ.

2. 'स्यान्नयनामयी शरदतौ वन्या भवेत् कीदृशी कीदृक् क्षीरसमुद्रमन्थनमयः काधारभूता रणम् । कीदृग् वर्षणपूतलोकनिचयः स्यात् तोयदः कीदृशः कीदृक् प्रीतिभरं' च,

3. 'शरः कीदृशः' ग. ङ.

4. 'रस्योत्तरश्लोकः' ख.

5. 'पदम्' ख, 'पदविभागः' ग. ङ.

सारसाररसा, सुरा ॥*

अथ द्व्यक्षरस्य प्रश्नश्लोकः— कीदृक् स्यादिति । अत्राष्टौ प्रश्नाः । तेषां चित्रश्लोकस्थितानि अष्टौ पदान्युत्तराणि । चित्रश्लोकः पदरूपेण लिख्यते- सारसः, ससारसारासससरसी, ससुरासुरः, रसा, सासि, ससूरोस्रः, सारसाररसा, सुरा ॥

§अथ गूढचतुर्थस्य प्रश्नश्लोकः—

कस्मिन् रूपं को विरुन्ध्यान्नृपः किं
रक्षेच्छिन्द्यात् कः क्व पद्मानि दूरम् ।
सादी गच्छेत् केन शौरिस्थितिः क्व
क्ष्मां पायात् कः कीदृशश्चन्द्रमौलिः ॥ ३३ ॥

अथ गूढचतुर्थस्योत्तरश्लोकः[2]—

द र्प के वि म तो रा ज्यं बा णः स र सि वा जि ना ।
घो ष सी म नि भू पा लः स र्प रा जि वि भू ष णः ॥ ३४ ॥

स्पष्टः पदविभागः[1] ॥

+अथ निरोष्ठ्यस्य प्रश्नश्लोकः[3]—

---

* द्व्यक्षरानन्तरं ख. ङ च पाठेषु शृङ्खलाबन्धो दृश्यते ।

§ गपाठे गूढचतुर्थो नास्ति ।

‡ एतदनन्तरं कपाठे तुल्याख्यातं दृश्यते ॥

\+ कपाठे ' निरोष्ठ्यं ' नास्ति । गपाठे तु तुल्याख्यातानन्तरं वर्तते ।

---

१. ' रा ॥ सर्वं पूर्ववत् । अथ तुल्याख्यातम् ।' (P. 163.) ग.

२. ' तुर्थः ' क. ३. ' श्नः- ' ख

शम्भुः कीदृक् को निहन्तासुराणां
विष्णोर्नाभीपुण्डरीकादभूत् कः ।
भूषा रात्रेः को निधिस्तेजसां को
वर्षेत् कः को वैरिसेनां निरुन्धे ॥ ३५ ॥

अथ निरोष्ठ्यस्योत्तरश्लोकः[1]—

हारनीहारनीकाशकायश्रीर्नळिनेक्षणः ।
शारदादयितश्चन्द्रस्तरणिर्जलदः करी[2] ॥ ३६ ॥

अथ निरोष्ठ्यस्य प्रश्नश्लोकः— शम्भुरिति । पदरूपेण चित्रश्लोको विलिख्यते— हारनीहारनीकाशकायश्रीः, नळिनेक्षणः, शारदादयितः, चन्द्रः, तरणिः, जलदः, करी । अत्र सप्तप्रश्नानां शम्भुरित्यादीनामुत्तराण्युक्तानि ॥

अथ तुल्याख्यातम्—

प्रश्नोत्तरं तिङन्तं यत् तुल्यरूपं भवेद्यदि ।
आरोहे चावरोहे च तुल्याख्यातं तदुच्यते ॥ ३७ ॥

तद् यथा—

किमाचरति वीरोऽरीन् रणे दृष्ट्वा विशस्त्रिणः ।
प्रतिलोमानुलोमाभ्यां तुल्यरूपमिहोत्तरम् ॥ ३८ ॥

॥ तिष्ठति ॥ १ ॥

अथ तुल्याख्यातं नाम चित्रम्— प्रश्नोत्तरमित्यादि । तद् यथा–

---

१. ' ष्ठ्यश्लोकः ' ख. ङ. २. ' री ॥ स्पष्टोऽर्थः । प्रश्नोत्तरं० ' ङ.

किमाचरतीत्यादि । तस्य प्रश्नस्यारोहेऽवरोहे च तुल्यरूपं तिष्ठतीति पदमुत्तरम् ॥

बाणः प्रयुज्यते वीरैर्विमते किं करोत्विति ।
प्रतिलोमानु० ॥ ३९ ॥

॥ तुदतु ॥ २ ॥

बाण इति प्रश्नस्य तुदत्वित्युत्तरम् ॥

स्वर्गेच्छा चेज्जना धर्ममित्यत्र खलु का क्रिया ।
प्रतिलोमानु० ॥ ४० ॥

॥ तनुत ॥ ३ ॥

स्वर्गेच्छेति प्रश्नस्य तनुतेत्युत्तरम् ॥

किमूचे सन्धये पार्थैर्यतस्वेतीरितो हरिः ।
प्रतिलोमानु० ॥ ४१ ॥

॥ यतेय ॥ ४ ॥

किमिति । अत्र यतेयेत्युत्तरम् ॥

किं वचो जपतः पुंसः सिद्ध्यन्तं स्वमनुं प्रति ।
प्रतिलोमानु० ॥ ४२ ॥

॥ सिद्ध्यसि ॥ ५ ॥

किं वच इति । अत्र सिद्ध्यसीत्युत्तरम् ॥

जनो वदेत् किं [1]तटिनीप्रवाहं तर्तुमिच्छतः ।
प्रतिलोमानु० ॥ ४३ ॥

॥ तरत ॥ ६ ॥

जन इति । अत्र तरतेत्युत्तरम् ॥

गुरुणोक्ते यजस्वेति स्वर्गार्थी किं वदेद् द्विजः ।
प्रतिलोमानु० ॥ ४४ ॥

॥ यजेय ॥ ७ ॥

गुरुणेति । अत्र यजेयेत्युत्तरम् ॥

वाक्ये क्रिया का शिवयोरावां भक्ताशयेष्विति ।
प्रतिलोमानु० ॥ ४५ ॥

॥ वसाव ॥ ८ ॥

वाक्य इति । अत्र वसाव इति ॥

कल्पान्ते द्वादशादित्यान् किं ब्रूयात् परमेश्वरः ।
प्रतिलोमानु० ॥ ४६ ॥

॥ तपत ॥ ९ ॥

कल्पान्त इति । अत्र तपतेत्युत्तरम ॥

कथां वदतमित्युक्तौ शिवौ स्कन्दं किमूचतुः ।
प्रतिलोमानु० ॥ ४७ ॥

---

१. ' तटिनीं नरान् सन्तर्तुमिच्छतः ' ग.

॥ वदाव* ॥ १० ॥

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्बा चाजनयत् सतीजननुता यं मानितं सज्जनैः ।
षष्ठोऽजायत तत्कृताविह परिच्छेदो हि भीमात्मजा-
कल्याणावरजे मनोहरतरश्रीचित्ररत्नाकरे ॥ ४८ ॥

‡ दृप्यन्मन्मथगाढकर्षणदलत्पर्वेक्षुचापक्षरत्-
सारस्फाररसोर्मिनिर्मितरणक्रीडा यदीया गिरः ।
यत्कीर्तिः शरदिन्दुसुन्दरमहःसन्दोहसन्देहदा
सोऽयं चक्रकविर्विभाति विनयी सौजन्यसम्पन्निधिः ॥४९॥

समाप्तश्चित्ररत्नाकरः ॥

इति सेनापतिविरचितायां चित्ररत्नाकरव्याख्यायां
शरच्चन्द्रिकायां षष्ठः परिच्छेदः ।
॥ समाप्तश्चायं ग्रन्थः ॥

---

* अतः परं खपाठे 'इति चित्ररत्नाकरे षष्ठः परिच्छेदः । अष्टादशपद्म-बन्धप्रश्नः– आस्ते को भुवि० (see page 149) इति दृश्यते, गपाठे 'वदावे'-त्यनन्तर 'किमाचरति०' (see page 163) दृश्यते । ततः– 'निरोष्ठ्यं-

नीहारहारनीकाशकायश्चन्द्रकलाधरः ।
नीलकण्ठः कालहन्ता रक्षिता नः सदा हरः ॥
त्रिपुरारिमहं वन्दे वाचाथ मदनद्विषम् ।
सोऽपि शं सहसानीयादर्धनारीश्वरो विभुः ॥(?) पुत्रं चक्र० 'इति च दृश्यते ।

‡ श्लोकोऽयं कपाठे नास्ति ॥

१. सर्वतोभद्रबन्धः । [P. No. 142]

वरा ह्वा वाहराव राजता ननताजरा ।
हतारि काकारिताह्वानका रुरुका नवा ॥

व	रा	ह	वा	वा	ह	रा	व
रा	ज	ता	न	न	ता	ज	रा
ह	ता	रि	का	का	रि	ता	ह
वा	न	का	रु	रु	का	न	वा
वा	न	का	रु	रु	का	न	वा
ह	ता	रि	का	का	रि	ता	ह
रा	ज	ता	न	न	ता	ज	रा
व	रा	ह	वा	वा	ह	रा	व

२. कविकाव्यनामचक्रबन्धः । [P. No. 144]

कल्याणाचलरोचिरन्तकसपत्नाप्तास्त्रविद्याश्रिया
दृप्यच्चक्रममित्रबाधकपृषत्कव्यूहकृत्तार्जुनि ।
पद्माक्षे कचभारशोभि कमनोरः पद्धतिः कोकिला
लाक्षाश्रीकघना दृढद्विपमुखायातध्वनिद्योतला ॥



३. मुरजबन्धः । [P. No. 145]

सेनासारजसारश्री-
घना साधुरसारसा ।
सारसाररसायुक्त-
भी रसा रजसा युता ॥

४. गोमूत्रिकाबन्धः । [P. No. 147]

धराधरसुतानेता
क्षीराब्धितनयापतिः ।
सुरासुरनता माता
हारा गतभया रतिः ॥



५. अर्धभ्रमकबन्धः । [P. No. 148]

मेघराजिनिभा नाग-
घटाजितजनासिना ।
राजितायातासनाभा
जितया साजिताजनि ॥

मे	घ	रा	जि	नि	भा	ना	ग
घ	टा	जि	त	ज	ना	सि	ना
रा	जि	ता	या	ता	स	ना	भा
जि	त	या	सा	जि	ता	ज	नि

६. अष्टदलपद्मबन्धः । [P. No. 149]

ना कोकस्तोमरक्षी कृतबहुळतरक्षेमभक्त्या सगाना
नागासक्त्या भमक्षे निखिलजनुतत्यागवत्या ससेना ।
नासे सत्यावगत्या वितरणसफलश्रीघनक्ष्मापलीना
नाळी पक्ष्मानघश्रीरधिकरसयुतक्षीरसस्तोककोना ॥



७. रथबन्धः । [P. No. 151]

हेलिमहाधृतभूतिः
  कोऽमलबोधप्रदो दयाजलधिः ।
रतिपतिदमनो विशद-
  स्मितभूर्धीराञ्चितोल्लसद्ध्यानः ॥



श्लोकानुक्रमणी

श्लोकादिः	पृष्ठम्
अकरोदेकचक्रायां	१२९
अकृत्रिमं किं	४३
अचन्द्रिकायां	५१
अजस्रपदपर्याय	११८
अण्डात् को भजते	,,
अतृप्तस्त्वं दधल्लोकै	९७
अदितेः प्रीतिमातन्वन्	१०४
अद्रिः कीदृक्	२३
अधिष्ठितं द्विजकुलैः	९६
अनन्ताहितसञ्चाराः	१०२
अनिशं त्रिदशैः	१०६
अनुकूलो मरुत्	१३७
अनेकवर्णयुक्ताभिः	७१
अबाणः किं	४६
अब्धिः कीदृग्	१७
अब्धिमेखलया	१२३
अभिन्नमर्थशब्दाभ्यां	८६
अभ्यस्तवेद	१०८
अभ्रसीमासिताम्भोज	६५
अम्भोजलोचनायाः	११६
अम्भोजिनीवल्लभस्य	७
अयत्नं सञ्चरति	११२
अर्थान् बहिश्चरान्	९३
अर्थेनाच्युतवर्णस्य	९५
अलं कः के	८८
अलङ्करोति काजस्रं	१२३
अलिः श्रयति कंकेलिं	१२६
अवमत्य चरन्	१०५
अवहन् के	११८
अवाप्ततापानुभवे	१०५
असिदारितभूपाल	१०१
अस्य लोकस्य	९०
अस्य वाक्यस्य	१३९
अहारि केन	४४
आचारतपसोर्धाम	७३
आभीरः काः	१२
आभीरजातौ	१३७
आवासतां वहति	११४
आस्ते कस्मिन्	४३
आस्ते कुत्र	६८

श्लोकादिः	पृष्ठम्	श्लोकादिः	पृष्ठम्
आस्ते को जलदे	१५६	कंसं को	६८
आस्ते को भुवि	१४९	कः कन्दर्पं	१४६
आस्ते धराधरे	१३६	कः कर्माणि	१०
आस्थानं कीदृशं	८३	कः काठिन्य	२९
आस्वाद्यते कीदृशं	१२७	कः के समुन्मूलयितुं	८८
आह्लादयति किमिन्दु	२३	कः क्रूरशूर	२५
इन्दीवरदलश्यामा	७४	कः पत्री का	८०
इन्दोर्मूर्तिः	३१	कः शब्दः	११
उक्तप्रश्नस्योत्तरं	५	कः श्रीमान्	७६
उक्तवन्तं कविं	६२	कङ्कणाब्जाक्षि	५५
उत्तरप्रश्ननामाद्यं	४	कथं शिष्येभ्य	६४
उत्पादयुति को	११२	कथां वदतमित्युक्तौ	१६५
उत्पादितमहानादाः	१०१	कमलैर्विराजते	३६
उद्देशं प्रथमं	४	कया विराजते	४१
उद्धर्तुमुदधेः	१३१	कर्मजातमलं	८६
उन्मूलनं विधत्ते	११३	कलं कूजन्	५७
उपक्रमे रतेः	५८	कलकण्ठमिथुनसङ्घः	३६
उपश्रमे कीदृशीं	१३१	कलयामास कं	५०
उपास्यमानोऽविरतं	९८	कल्पान्ते द्वादशादित्यान्	१६५
एकावृत्तिर्द्विरावृत्ति	७८	कल्याणाचल	१४४
एकैकस्योत्तर	५	कस्तमस्तोम	१२३
ऐक्यस्य तेजस्तमसो	२	कस्मात् स्रवति	२०
ओघा विशन्ति	८३	कस्मादुदभूद्	२१
और्वः क	८०	कस्मादुदेति	३०

श्लोकादिः	पुटम्
कस्माद्बिभेति	२०
कस्मिन् रूपं	१६२
कस्मिन् सति	४५
कस्य स्यात्	१७
कस्याः क्रौर्यं	३७
कस्याः सर्वं	३९
कस्याश्चक्षु	३८
कस्योदारजवो	१५८
कां तनुते	२०
कां राजा	७९
का कीदृक्	४७
का गन्धग्रहणं	१५५
का तमो हन्ति	८०
का पापं	६८
का प्रार्थ्या	१३
कामं द्विषन्	९९
कामध्यास्ते	८५
कामयन्ते स्म	५९
का मेनादुहिता	७०
कायदारदनालीका	१५४
काव्ये गुणाः	२
का सम्बुद्धिर्भवति	१४
का सुधीभूषिता	८४
कासूत कुञ्जरमुखं	९

श्लोकादिः	पुटम्
का स्यान्मग्ना	४३
काहलीनां विरावे	५८
का हेमकान्ति	४२
किं कान्ताजन	५३
किं कीदृशं	४२
किं चक्रिरे	१३८
किं चक्रुः	,,
किं चलं यान्ति	८१
किं धामेन्द्रस्य	,,
किं परिहार्यं	२६
किं भिद्यते	२४
किं मुखावरणं	७७
किं लक्ष्मीसद्म	७८
किं लोके	११
किं वचो	१६४
किं वहन्ति	५४
किं विचिनोति	२२
किं विनिहन्ति	२३
किं विराजति	११५
किं विहारपदं	५३
किं साधनमभूदिन्द्र	११४
किन्नरः कुरुते	१२५
किमाचरति वीरो	१६३
किमूचे सन्धये	१६४

श्लोकादिः	पृष्ठम्	श्लोकादिः	पृष्ठम्
कियत्पर्यन्तमात्मार्थे	६४	कीदृशस्तापसजनो	८२
कीदृक् तटिनी	२४	कीदृशा भिषजा	५६
कीदृक् प्रदोष	२६	कीदृशीं कां क्षितितले	१३२
कीदृक् स्यान्मनुजो	१६१	कीदृशीं कां क्षितिभुजां	,,
कीदृक्षाः साधु	२७	कीदृशीं कां प्रदिशति	१३३
कीदृगगस्त्य	,,	कीदृशीं कां भीम	१२७
कीदृगब्धिरधीरं	७६	कीदृशीं कामजनयन्	१३१
कीदृग् जनः	७८	कीदृशीं कामरण्यानी	१२७
कीदृग् दुष्प्रभु	१६०	कीदृशी का भवेद् राज्ञां	१३४
कीदृग् धन्विघटा	१५३	कीदृशी का भवेद् वीर	१३३
कीदृग् भिन्नः	२९	कीदृशी का भाग्यवतो	१३४
कीदृङ्मलयाद्रि	२७	कीदृशी नाटककृति	६०
कीदृङ्मूर्तिर्धूर्जटे	१६	कीदृशी प्रेमसम्पत्तिः	५७
कीदृङ्मूर्तिर्भीम	१५४	कीदृशी भजते	१३५
कीदृशः कः	१२८	कीदृशीषु वनक्षोणी	५९
कीदृशं कं कामयते	१३४	कीदृशेनारविन्देन	५४
कीदृशं कं पुरा	१२९	कीदृश्यः सारसुवः	३४
कीदृशं कं भजेद्वीरो	१२८	कीदृश्यः स्वैरिण्यः	,,
कीदृशं कं वितन्वन्ति	१३३	कीदृश्यौ मधु	४७
कीदृशं कं समालोक्य	१३०	कीदृशि शशि	३६
कीदृशं किं समादत्ते	१२९	कुञ्जराशनवृक्षस्य	१२४
कीदृशं दारु वक्रत्वं	१२१	कुत्र चरन्ति	२१
कीदृशं दृश्यते	६१	कुत्रास्ते बन्धुभिः	४२
कीदृशं यातुधानानां	१२१	कुत्रास्ते श्रीः	२६

श्लोकादिः	पृष्ठम्
कुन्तिभोजस्य कन्यायां	५६
कुन्देन्दुहिमगौरश्रीः	१०३
कुबेराधवयोर्हान्यो	६५
कुमार्गाहितसञ्चारा	७४
कुलसीमन्तिनीचित्ते	१२४
कृष्णपक्षक्षपा	४९
कृष्णपक्षनिशा	४८
के काननस्य	४५
केन विनिर्माति	३२
केन श्रुत्योः	३१
केनान्नस्य	३०
के पाण्डवे	२९
के भूमौ न	६९
के मधु पुष्पप्रभवं	२७
केषां पङ्कजशोभा	३७
केषां रात्रौ वृद्धिः	३८
के सञ्चरन्ति	२८
के विलसन्ति	४०
कोऽधारि त्रिपुरभिदा	३५
को भीषणो	७८
को भूमिधर	६७
को भूमिस्थः	१३
को रक्षोनिकरान्ध	६६
को रामेण	२४
को वा गजास्य	११३
को विषाण	१२०
को वेगवान्	७७
क्रमाद् गन्तुं	१०८
क कच्छजत्वं	४३
क्वास्ते विरचित	९३
क्षणदाचरलोकस्य	११४
क्षिप्तामरावती	१०९
क्षुधार्दिता	,,
गण्डस्थली	१२४
गतिभेदेषु	११८
गन्तुं झटिति	८९
गुरुणोक्ते	१६५
गृह्णन्ति चापलतिका	४०
गोमयेन विलन्वन्ति	११७
गौणी का ग्रीष्म	४९
गौणी का तार्क्ष्य	३८
घोषभूर्नन्द	६१
चक्षुरानन्दने	१०८
चञ्चरीकावलि	१०३
चमूपतिर्गन्तुमिच्छन्	१३०
चरतीन्दुः कीदृशे	४६
चिकीर्षितं यद्	१०१
चित्रं तमःसमूह	९१

श्लोकादिः	पृष्ठम्
चेष्टन्ते भुवने	२८
छन्दोगैर्गीयते	८१
छन्दोरूपं वहन्ती	५४
जनयन्तः सुखं	१००
जनानां कास्वसञ्चरत्वं	६२
जनानां सुखसञ्चारे	१०६
जनो वदेत् किं	१६५
जलैर्विरहिता	८
जायते काधिवदनं	११६
जिता कया	४५
ततेतितौताचतता	१६०
तथैव चिन्दुच्युतकं	५
तपस्विनां का	८
तप्तं किं मृदु	२५
तमोपहा का	८४
तरङ्गिणीनां रमणः	११७
तरङ्गिणीनाथमयीं	११२
तरङ्गिणीवल्लभस्य	६१
तरुणी चकास्ति	३३
तरुणीजनसौन्दर्य	११६
तुल्यार्थकं पदं	१११
तुल्यार्थकं वर्ण	५
तृतीये विग्रहः	७
तृषातुराः शुष्क	११०
दत्तच्युताक्षराद्यन्तं च्युत	४
दत्तच्युताक्षराद्यन्तं भवेत्	६६
दधदुद्दामसौरभ्य	९६
दरं दधानो	१००
दर्पके विमतो	१६२
दशकण्ठे विनिहते	९१
दावदग्धलता	५१
दावप्लुष्टमरण्यं	३४
दृप्यन्मन्मथ	१६६
देवः प्रसन्नः	१२४
द्वाराहितप्रवेशो	११०
द्विरावृत्तं च	४
धरणीमण्डले	६
धराधरसुता	१४७
धर्माधर्मावलं	८९
धारागृहार्यसम्बुद्धी	४७
धृतराष्ट्रस्य भार्यायाः	१३८
ध्वान्तं का	१२
ध्वान्तध्वंसः कस्मात्	२२
नभस्तलं प्रावृषि	५३
नरसर्पौ मिथो	१२८
नवाम्भोदनिभच्छायो	१०४
न व्रजेच्चलनं	१२०
ना कोकस्तोमरक्षी	१४९

श्लोकादिः	पृष्ठम्	श्लोकादिः	पृष्ठम्
नाट्यं कुत्र	६९	पिपासवः कीदृशं	१२८
नानागममयीं	७३	पिपासुतामलं	८७
नानाननेन	१५८	पीतं किं सहितः	१४३
नासिका ततमा	१५६	पीतासवा कीदृशी	४४
निखिलानां जनानां	८८	पुत्रं चक्रकविं	४०
निजसञ्चारतो	९८	,,	७४
निजेन तेजसा	१०५	,,	९४
निबिडानि कानि	३५	,,	११०
निम्बवृक्षाटवी	६०	,,	१४०
निर्गन्धैरपि	११५	,,	१६६
निर्धूतहुतभुग्	९४	पुम्भावविभ्रमे	५३
नीलिमा सरसा	१५६	पुरारण्यं सदावं	९०
नूतनाम्भोधर	९८	पुरुषं तनुते	८
नूलतारुण्य	५७	पुलोमपुत्री	१०९
पङ्क्तिशब्दस्य	१२१	पुष्पितैर्फलितैः	७२
पचन्ति सूदाः	१३०	पुष्पेषु कलितानल्प	,,
पदबन्धनसामर्थ्याद्	९०	पूः कीदृक्	१५
पदयोः परिवृत्ति	७१	पृच्छन्तीं किं वदेत्	५५
पदाकलितसञ्चाराः	१०८	प्रकृष्टताया देशस्य	१०२
पद्मासनं विदधती	१०३	प्रणतान् किं	१३६
परवाङ्मुद्रणं	३	प्रतापभूम्ना सहितो	९७
पाणिर्विलासिनीनां	३३	प्रतिकूला क्षितिरुहां	५९
पादविन्यासरहिता	११३	प्रतिलोमानुलोमाभ्यां यदि	४१
पालयति को	१९	प्रतिलोमानुलोमाभ्यां सरूपं	५०

श्लोकादिः	पृष्ठम्	श्लोकादिः	पृष्ठम्
प्रदर्शयन्नातितरां	९९	भवन्ति वर्षासमये	१३७
प्रयुज्यते किं	१२१	भासन्ते के	१४१
प्रवहत्युपविन्ध्यं	४४	भिनत्ति किं	१२२
प्रश्नयोर्भेदकं	१२६	भीष्मादिभीम	२
प्रश्नश्लोकान् प्रथमतः	१४१	भुञ्जते के प्रहर्षेण	११९
प्रश्नेषु प्रथमं	७५	भुवनं सृज्यते	४४
प्रश्नोत्तरं तिङन्तं	१६३	भुवने कस्तमस्तोम	१२२
प्रश्नोत्तरस्य क्रमशो वर्णवृद्धि	१०	भेद्यभेदकसंज्ञं	५
प्रश्नोत्तरस्य क्रमशो वर्णह्रासो	१४	मदान्धसिन्धुरघटा	५८
प्रश्नोत्तरात्मकैः श्लोकैः	३	मध्येसमुद्रमास्ते	९२
प्रसन्नवदनाम्भोजः	१२७	मनोहरवनोपेतो	१०२
प्राणिहिंसापरो	९७	मरुत्स्वरूपोपेता	१०६
प्रार्थ्याः के	१५२	मरुद्दमनदक्षाणां	९८
प्रालम्बविलसत्तेजो	१०२	महाग्रहत्वं बिभ्राणः	१०७
फलितैः पादपैर्युक्तं	५६	महानदी कीदृशं	१३०
बन्धुवर्गैः सनाथेन	७२	मुखपूर्णेन्दुभिः	४८
बर्हिर्मुखाः सुधां	११२	मुरारेः कीदृशं	८५
बाणः प्रयुज्यते	१६४	मूलं धर्मचयस्य	७०
बिन्दुमात्राव्यञ्जनानां	९५	मृगैः खगैर्नगैर्नागैः	९६
बिभर्ति वर्षासमये	१३५	मृतमद्यपदेशस्य	६२
बृंहितैर्हेषितैर्युक्ता	६०	मेघराजिनिभा	१४८
भक्तोऽनन्ते शयानां	६३	मेना का	२४
भयाकुलः कं	४२	मैनाकेन हिमाद्रिः	२५
भर्तारं स्वमतिक्रम्य	५१	याचकं प्रति	५२

श्लोकादिः	पृष्ठम्	श्लोकादिः	पृष्ठम्
या मन्दराद्रि	९४	वराहवावाह	१४२
युद्धप्रियः को	७७	वर्णैर्द्वित्रिचतुः	४१
यूनां मनांसि	१२२	"	५०
यूनोः क्रीडा	१७	वर्तन्ते भुवने	११७
यौवतं युवभिः	५७	वर्षासु जलदः	८३
रक्षन्तीन्द्रप्रमुखाः	३८	वर्षेत् कानि	६१
रञ्जयति कः	२८	वर्षे महति	१२०
राक्षसराजः कीदृक्	३५	वशा कीदृक्	७९
राक्षसलोकः कीदृक्	३०	वाक्ये क्रिया	१६५
राज्ञः का जय	१४५	वाचां विलासेन	१२५
राज्ञां कुलं	९३	वात्सल्यं बिभ्रति	५४
राज्ञां प्रिया	८१	वार्षुकजलदः	२०
रुरोरुरुररेरूरुररीरे	१५९	विदार्यन्ते शरीराणि	५९
रूपं शब्दं तथा	११७	विभक्तिभिन्नं प्रथमं	४
लङ्कानगरं कीदृङ्	२६	विभक्तिलिङ्गभिन्नं तु	"
लङ्कापुरे यदुद्यान	१००	विभक्तिलिङ्गवचन	"
लोके माद्यति	८६	विभक्तिलिङ्गवचनै	१८
लोकेशः कः	१२	विरहार्तिविनिद्राणां	५५
वनस्त्रियोः के	४७	विलसत्पुण्डरीकेण	१०३
वनानि शुष्काशुष्काणि	११५	विलिख्य श्लोकरूपेण	१४१
वनीषु कीदृक्षु	४६	विलोलवालव्यजन	१०६
वने रामं घनं	१३९	विशेषणेषु	१०७
वन्दे वपुस्तद्	१	विश्वं कीदृग्	१७
वन्या कीदृगनीकिनी	१४८	विस्तीर्णः को	७६

श्लोकादिः	पुटम्	श्लोकादिः	पुटम्
वीणादिकस्य वाद्यस्य	५२	सदाशयः को	१२५
वीरः प्रयुङ्क्ते	११९	सन्ततं भूधरभुवो	९२
वृक्षषण्डेन निबिडा	९	सन्तापं कः शमयति	१२३
वृद्धस्य च्युतदन्तस्य	५२	सन्ति गुणौघाः	३१
शब्दचित्रस्वरूपं च	३	समागते शरद्दतौ	६३
शम्भुः कीदृक्	१४	समानवेगो मरुता	१११
,,	१६३	समुद्वहन् शरच्चन्द्र	७३
शरत्समयभिन्नानां	७	समुल्लसत्कर्कटक	१०४
शाद्वलदेशः कीदृग्	३९	सम्पत्कामाः	७५
शास्त्रार्थमखिलं	८९	सम्पादयन्ति वणिजः	१५०
शिशिरापगमे	१३६	सम्पादितसमित्पुष्पः	१३२
शीतलैर्निजसंस्पर्शैः	७३	सम्प्रापितायां शुभ्रत्वं	९२
शेषः केषामधिभूः	३९	सम्बुद्धयो ब्रह्मशम्भु	८४
श्रीलोकनाथं जनकं	२	सम्बुद्धिः कथमण्डजस्य	८२
श्रेणिका चञ्चरीकाणां	५८	सम्बुद्धिः का च	५६
श्रेयोर्थी कलयेत्	२२	सम्बुद्धिः का भवति	१३
षष्ठीविभक्तावेकत्व	५२	सम्बुद्धिः कीदृशी	५२
संवर्तपवने वाति	६३	सम्बुद्धिशब्दौ कीदृक्षौ	६५
सखीभिस्सहिता	९	सम्बोध्य शम्भुं	६२
सञ्चारं कमलाकरे	७०	सरसः शरदारम्भे	६६
सञ्चारं रचयन्	१००	साकमच्युतवर्णेन	९५
सञ्चारमनिशं कर्तुम्	८८	साधोर्वाणी कीदृक्	३२
सति कारणपौष्कल्ये	११६	साभिलाषो भवति	१२०
सदग्रहारो वहते	१२६	साम्यं वोढुमलं कः	८७

श्लोकादिः	पुटम्	श्लोकादिः	पुटम्
सासस्ससारसा	१६१	स्थूलाङ्गे सम्बुद्धिः	२१
साहसानघसारासा	१५५	स्वर्गेच्छा चेज्जना	१६४
सुतागरेऽरेगतासु	१५३	स्वसम्पर्केण शीतार्तान्	१०५
सुधामयूखप्रमुखा	१०७	स्वेदाम्बुभिः सरभवैः	९९
सुधाशनसमूहानामावासस्त्वं	११३	हरिः कुत्रेति	५५
सुक्षिङन्ततया द्वेधा	१३५	हस्ती कीदृग्	१६
सुभटकदम्बं कीदृक्	१९	हारनीहारनीकाश	१६३
सुभ्रूः कीदृक्	१५	हुताशनेन सार्धं	११५
सुरभिः का	४६	हृष्टा जनता	३२
सृष्टं केन जगत्	१५७	हेलिमहाधृतभूतिः	१५१
सेनासारजसारश्री	१४५		